The first method of worship called Durgā-paṭala given here (drawn from *Rudra-yāmala*) deals with the `mantroddhāra' in the first section, details of worship (pūjā-paddhati) including ritual placements (nyāsa), contemplation (dhyāna) and offerings (bali) in the second section, `kavacha' in the third section, followed by Durgā-sahasra-nāma-stotra.

The entire text is in the nature of a dialogue between the goddess (Devī) and her spouse, Śiva (called here Bhairava or Īśvara). The goddess asks to be told about the ritualistic worship of hereself, and Śiva replies.

The second method is said to be drawn from *Kulārṇava-tantra* (although the present editions of the text do not contain this section). It begins with pedestal worship (pīṭha-pūja) and ends with `mantroddhāra'. It includes the recital of *Devyatharva-śīrsha-upanishat* and of 108 names of Durgā (śata-nāmā-shṭaka), and also of the 1000 names (sahasra-nāma).

The third method (which will be given later) is Durgā-pūjā-prayoga (also called Durgā-paddhati) taken from *Durgā-kalpa.* It is an elaborate account in the form of a dialogue between Himālaya and Devī. The mountain personified as Himālaya is in legend the father of the goddess. He requests Durgā to tell him in detail the procedure of worship; and Durgā responds. This account includes besides the usual sequence the Durgā-makhotsava-paddhati, (worship with fire-rituals in a pavalion), Kumārī-pūjā (worship of young girls as representatives of the goddess) , chhāgādi-bali-dāna (offering of animal sacrifices).



I

INTRODUCTION

अथ श्रीदुर्गापञ्चाङ्गम्।।

श्रीदेव्युवाच।।
भगवन् सर्वतत्त्वज्ञ साधकानां जयावह।
यत् पुरा सूचितं देव दुर्गापञ्चाङ्गमुत्तमम्।।१।।

सर्वस्वं सर्वदेवानां रहस्यं सर्वमन्त्रिणाम्।
तदद्य कृपया ब्रूहि यद्यस्ति मयि ते दया।।२।।

The rest of the text is uttered by Bhairava :

श्रीभैरव उवाच।

(Introduction)

एतद् गुह्यतमं देवि पञ्चाङ्गं तत्त्वलक्षणम्।
दुर्गायाः सारसर्वस्वं न कस्य कथितं मया।।३।।

तव स्नेहात् प्रवक्ष्यामि दुर्गापञ्चाङ्गमीश्वरि।
गुह्यं गोप्यतमं दिव्यं न देयं ब्रह्मवादिभिः।।४।।

या देवी दैत्यदमनी दुर्गेत्यष्टाक्षरा शिवा।
देवैराराधिता पूर्वं ब्रह्माच्युतपुरःसरैः।।५।।

पुरन्दरहितार्थाय वधार्थाय सुरद्विषाम्।
सैवं सृजति भूतानि राजसी परमेश्वरी।।६।।

सात्विकी रक्षति प्रान्ते संहरिष्यति तामसी।
इत्थं गुणत्रयीरूपा सृष्टिस्थितिलयात्मिका ।।७।।

अष्टाक्षरी महाविद्या संख्यातीता परात्मिका।
तस्याः पञ्चाङ्गमधुना रहस्यं त्रिदिवौकसाम्।।८।।

वक्ष्यामि परमप्रीत्या न चाख्येयं दुरात्मने।
पटलं तव वक्ष्यामि दुर्गायास्तत्त्वमुत्तमम्।।९।।

(अभक्ताय न दातव्यामित्याज्ञा पारमेश्वरी।।)

येन श्रवणमात्रेणा कोटिपूजाफलं लभेत्।
दुर्गाया देवि वक्ष्यामि मन्त्रोद्धारं पराश्रयम्।
सर्वतन्त्रेष्वविख्यातं सर्वकामफलप्रदम्।।१०।।

Mahisha-mardinī

I

1.MŪLA-MANTRODDHĀRA

तारं माया चाक्रिकं चक्रिदूर्वा
वायव्यार्णं विश्वमन्ते भवानि।

दुर्गायास्ते वर्णितो मूलविद्या।
मन्त्रोद्धारो गोपितोऽष्टात्तरोऽयम्॥११॥

नास्यान्तरायबाहुल्यं नाप्यमित्रादिदूषणम्।
नो वा प्रयाससंयोगो नाचारयुगविप्लवः॥१२॥

साक्षात् सिद्धिप्रदो मन्त्रो दुर्गायाः कलिनाशनः।
अष्टाक्षरोऽष्टसिद्धीशो गोपनीयो दिगम्बरैः॥१३॥

महाचीनक्रमस्थानां साधकानां जयावहः।
मन्त्रराजो महादेवि सद्यो भोगापवर्गदः॥१४॥

वर्णालक्षं पुरश्चर्या तदर्धं वा महेश्वरि।
एकलक्षावधि कुर्यान्नातो न्यूनं कदाचन॥१५॥

मूलोत्कीलनसिद्धं तु सञ्जीवनसुसंस्कृतम्।
पुरश्चर्यां चरेत् पश्चात् संपुटाढ्यं चरेन्मनुम्॥१६॥

ततो मन्त्रं जपेन्नित्यं दुर्गायास्त्वष्टसिद्धिदम्।
यं जप्त्वा साधको भूमौ विचरेद्भैरवो
यथा॥१७॥

ऋषिरस्य स्मृतो देवि मन्त्रस्याद्यो महेश्वरः।
छन्दोऽनुष्टुब् देवता च श्रीदुर्गाष्टाक्षरा स्मृता॥१८॥

चाक्रिकं बीजमीशानि माया शक्तिरिति स्मृता।
तारं कीलकमाशानां विश्वं बन्धनमीश्वरि॥१९॥

धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः।
तारमायाक्षरैर्देवि न्यासं षड्दीर्घभागिभिः॥२०॥

निहत्य षड्रिपून् देवि ध्यायेद् दुर्गां
कुलेश्वरीम्।

2. DHYĀNA

(Contemplation on the Devi)

दूर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्गशरखेटकशूलचापान्।
संतर्जनीं च दधतीं महिषासनस्थां
दुर्गां नवारकुलपीठगतां भजेऽहम्॥२१॥

3. YANTRODDHĀRA

(Preparation of Durgā-yantra)

यन्त्रोद्धारं प्रवक्ष्यामि दुर्गायाः कुलमन्दिरम्।
सर्वसिद्धिप्रदं चक्रं सर्वाशापरिपूरकम्॥२२॥

बिन्दुत्रिकोणं रसकोणबिम्बं
वृत्ताष्टपत्राञ्चितवह्निवृत्तम्।
धरागृहोद्भासितमिन्दुचूडे दुर्गाश्रियं यन्त्रमिदं
प्रदिष्टम्॥२३॥

लयाङ्गमस्य यन्त्रस्य सर्वतन्त्रेषु गोपितम्।
येनोच्चारणमात्रेणा कोटियज्ञफलं लभेत्॥२४॥

(a) Four entrances of the yantra, guarded by Gaṇeśa, Kārtikeya, Pushpadanta and Vikartana.

गणेशं च कुमारं च पुष्पदन्तं विकर्त्तनम्।
चतुर्द्वारिषु देवेशि पूजयेत् साधकेश्वरः॥२५॥

(b) Eight petals representing the Mother-goddesses (mātrikās)

ब्राह्मी नारायणी देवि चामुण्डाप्यपराजिता।
माहेश्वरी च कौमारी वाराही नारसिंहिका॥२६॥

(c) Eight petals on which are visualized the Bhairavas.

पूज्या वसुदले देवि भैरवांश्चाष्ट पार्वति।
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तकपालिकाः॥२७॥

भीषणाश्चैव संहारो वामावर्तेन साधकैः।
पूज्याः पृथक् पृथग् देवि गन्धपुष्पाक्षतैः
शिवे॥२८॥

(d) The six-cornered figure representing the six Kula-nāyikās : Śailaputrī, Brahma-chāriṇī, Chaṇḍa-ghaṇṭa, Kushmāṇḍā, Skanda-mātā and Kātyāyanī

दत्त्वा पुष्पाञ्जलिं चक्रे मूलमुच्चार्य साधकः।
पूजयेत् पद्मकिञ्जल्कैः षडश्रे षट्
कुलाम्बिकाः॥२९॥

शैलपुत्रीं स्ववामाग्रात् पूजयेद् ब्रह्मचारिणीम्।
चण्डघण्डां च कूष्माण्डां
स्कन्दमातरमीश्वरि।।३०।।

कात्यायनीं च संपूज्य दूर्वागन्धाक्षतैः परम्।
पुनः पुष्पाञ्जलिं दत्त्वा श्रीचक्रे परमार्थदे।।३१।।

(e) The triangle signifies the three goddesses : Kālarātri, Mahāgaurī, and Deva-dūtī.

पूजयेद् देवतास्तिस्त्रः कुलस्थास्त्रिपुराम्बिकाः।
कालरात्री महागौरी देवदूतीति पार्वति।।३२।।

त्रिकोणाग्राच्छिवे पूज्याः सिन्दुराक्षतपुष्पकैः।
दुर्वादलाञ्जलिं दत्त्वा यन्त्रराजेऽष्टसिद्धिदे।।३३।।

(f) The central point (bindu) representing the Devī with eight arms together with her consort, Siva.

पूजयेदम्बिकां दुर्गामष्टाक्षरविभूषणाम्।
बिन्दौ देवीमष्टभुजां विद्यामष्टाक्षरीं शिवे।।३४।।

नीलकण्ठं शिवं बिन्दौ पूजयेज्जगदम्बिकाम्।
तत्रायुधानि देवेशि पूजयेदष्ट साधकः।।३५।।

(g) The eight weapons the Devī carries in her eight hands : conch, lotus, sword, arrows, bow, shield, spear and the gesture of warning (tarjanī)

शङ्खं पद्ममसिं बाणान् धनुः खेटकमीश्वरि।
शूलं संतर्जनीं दिव्यां नानापुष्पैः समर्चयेत्।।३६।।

(Procedure for securing Eight-fold Attainments).

ASHṬA-SIDDHI

देवदेव्यौ बिन्दुपीठे पूजयेत् सर्वसिद्धये।
अथ वक्ष्ये महादेवि प्रयोगानष्टसिद्धये।।३७।।

यान् विधाय कलौ मन्त्री भवेत् कल्पद्रुमोपमः।
स्तम्भनं मोहनं चैव मारणाकर्षणे ततः।।३८।।

वशीकारं तथोच्चाटं शान्तिकं पौष्टिकं तथा।
एषां साधनमाचक्षे प्रयोगाणां महेश्वरि ।।३९।।

महाचीनक्रमस्थानां साधकानां हिताय च।



Durgā from Kailāsanātha temple , Kānchīpuram

1. Stambhana

(१) अयुतं प्रजपेन्मूलं श्मशाने निशि साधकः।।४०।।

हुनेव दशांशतः सर्पिर्यवान्मांसासृगच्युतान्।
स्तम्भनं जायते क्षिप्रं वादिकामिजनाम्भसाम्।।४१।।

2. Mohana

(२) अयुतं प्रजपेद् देवि वटे रुद्राक्षमालया।
होमो दशांशतः कार्यो घृतपद्माक्षपङ्कजैः।।४३।।

अरग्वधैः सुधामूलैर्मोहनं जायते क्षणात्।
देवानां दानवानां च का कथाऽल्पधियां नृणाम्।।४३।।

3. Māraṇa

(३) अयुतं प्रजपेन्मूलं वने साधकसत्तमः।
वेतसीमूलगो वापि हुनेत् तत्र दशांशतः।।४४।।

(घृतपायसशम्बूकान् रिपुर्मृत्युमुखं व्रजेत्।)

4. Ākarshaṇa

(४) अयुतं प्रजपेद्रात्रौ शून्यागारे कुलेश्वरि।।४५।।

होमो दशांशतः कार्यो घृतव्योषशटीशरैः।
कपिबीजैरपि प्रातर्भवेदाकर्षणं स्त्रियाम्।।४६।।

5. Vaśīkaraṇa

(५) आयुतं प्रजपेन्मूलं चत्वरे त्वरितं हुनेत्।
आज्याब्जक्षुरपाषाण्ड रक्तपुष्पाणि पार्वति।।४७।।
शक्रोऽपि वशतामेति किं पुनः क्षुद्रभूमिपः।

6. Uchchāṭana

(६) अयुतं प्रजपेन्मूलं साधकोऽश्वत्थमूलगः।।४८।।

हुनेदाज्यं दशांशने केशं स्त्रीणां त्वचं कणाः।
रिपुमुच्चाटयेत् शीघ्रं यदि शक्रसमो भवेत्।।४९।।

7. Śāntika

(७) अयुतं प्रजपेन्मूलं सुरद्रुमतले हुनेत्।
घृताक्तकुक्कुटाङ्गानि नानापुष्पाणि साधकैः।
रोगोपद्रवकालस्य सद्यः शान्तिर्भविष्यति।।५०।।

8. Paushṭīka

(८) अयुतं प्रजपेन्मूलं लीलोपवनमण्डले।
होमो दशांशतः कार्यो घृतमीनाजमस्तकैः।
पदैरष्टभिरीशानि सद्यः पुष्टिः प्रजायते।।५१।।

इत्येष पटलो दिव्यो मन्त्रसर्वस्वरूपवान्।
दुर्गारहस्यभूतोऽपि गोपनीयो मुमुक्षुभिः।।५२।।



II

PRELIMINARIES

1. Paddhati (worship-rituals)

श्रीभैरव उवाच।

श्रृणु पार्वति वक्ष्यामि पद्धतिं गद्यरूपिणीम्।
यस्याः श्रवणमात्रेणा कोटियज्ञफलं लभेत्॥१॥

(a) Prātas-sandhyā-vidhi (The early morning rites)

ब्राह्मे मुहूर्ते चोत्थाय, बद्धपद्मासनः स्वशिरःस्थसहस्राराधोमुखकमलकर्णिकान्तर्गतं निजगुरुं श्वेतवर्णं श्वेतालङ्कारालङ्कृतं द्विभुजं स्वशक्त्या श्वेताम्बरभूषितया वामाङ्गे सहितं ध्यात्वा, मानसैरुपचारैः संपूज्य दण्डवत् प्रणमेत्॥

(i) Guru-Pūjā

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः।
गुरुरेव जगत् सर्वं तस्मै श्रीगुरवे नमः॥

(ii) Ablutions, bath

इति नत्वा तदाज्ञां गृहीत्वा बहिरागत्य मलमूत्रादि संत्यज्य, वर्णोक्तं शौचं विधाय नद्यादौ गत्वा सुकूर्चे द्वादशाङ्गुलं दन्तधावनं कुर्यात्॥ ''ओं क्लीं कामदेवाय सर्वजनप्रियाय नमः '' इति दन्तान् विशोध्य, चाक्रिकबीजेन गंडूषषट्कं विधाय, प्रणवेन मुखं त्रिः प्रोक्ष्य ''ओं ह्रीं मणिधरि वज्रिणि शिखापरिसरे रक्ष रक्ष हुं फट् स्वाहा '' इति शिखां बद्ध्वा, तत्त्वत्रयेणाचम्य, मूलेन प्राणायामं विधाय मलापकर्षणां स्नानं कृत्वा मन्त्रस्नानं चरेत्। ततो मूलेन मृदमानीय जलं प्रोक्षयेत्। मन्त्रमृदा सूर्यमण्डलं विचिन्त्य, ''गङ्गे च यमुने चेति'' तीर्थान्यावाह्य जले यन्त्रं विभाव्य सनीलकण्ठां दुर्गामावाहयेत्॥

(iii) Holy sprinkling, sipping, Prāṇāyāma and sandhyā

तत्र षडङ्गं विधाय देवीं सशिवां ध्यात्वा, मूलं यथाशक्त्या जप्त्वा विनिज्योन्मज्जोत्। तत्र

कुम्भमुद्रां बद्ध्वा स्वमूर्ध्नि देवदेव्यौ जलेन स्नपयित्वा ''ओं ह्रां हां सः मार्तण्डभैरवाय प्रकाशशक्तिसहिताय एष तेऽर्घ्यो नमः।'' इति सूर्यायार्घ्यत्रयं दत्त्वा वासोऽन्यत् परिधाप्य, तत्त्वत्रयेणाचम्य, त्रिः प्राणायामं विधाय, पूर्वसंध्यां कृत्वा षडङ्गं कृत्वा,

(iv) Aghamarshaṇa

चुलकेन जलमादाय तत्त्वमुद्रयाच्छाद्य यंरंलंवंहं इति त्रिरभिमन्त्र्य मूलमुच्चरंस्तद्गलितो दकबिन्दुभिः सप्तधा स्वशिरस्यभ्युक्ष्य, सव्यहस्ते शेषमुदकं धृत्वा इडयान्तर्नीत्वा देहान्तः पापं प्रक्षाल्य पिङ्गलया विरेच्य, पुरः कल्पित वज्रशिलायां वामतः फडिति निक्षिपेत् ॥

(v) Tarpaṇa

इत्यघमर्षणां विधाय पूर्ववदाचम्य, जले यन्त्रं ध्यात्वा मूलं यथाशक्त्या जप्त्वा, मूलविद्यान्ते साङ्गे सवाहने सायुधे सपरिच्छदे श्रीनीलकण्ठसहिते मातर्दुर्गे तृप्यतामित्यष्टवारं संतर्प्य, नीलकण्ठं त्रिः संतर्प्य, एकैकाञ्जलिना परिवारदेवताः संतर्प्य, देवदेव्यौ हृदि ध्यात्वा, जले चतुरश्रं विलिख्य, तत्रेशानादिक्रमेण गुरुपंक्तिं संतर्प्य देवीं गायत्रीं जपेत्॥

(vi) Japa

ओं ह्रीं दुं दुर्गायै विद्महे अष्टाक्षरायै धीमहि तन्नः चण्डी प्रचोदयात्।

इति यथाशक्त्या प्रजप्य, गायत्र्यानया देवदेवयोरर्घ्यत्रयं दत्त्वा जपं समर्प्य, यागमण्डप मागच्छेदिति - संध्याविधिः॥

(b) Shaḍanga-nyāsa (Placement of divinities)

(i) Entering into ones own house

ततो गृहमागत्य पादौ प्रक्षाल्य द्वारदेवताः पूजयेत्। ओंगांगूं गणेशाय नमः पूर्वे। ओं क्षां ह्रीं वटुकाय नमो दक्षिणे। ओं क्षां क्षें क्षेत्रपालाय नमः पश्चिमे। ओं यां यूं योगिनीभ्यो नमः उत्तरे। गं गङ्गायै नमो देहल्यां । यां यमुनायै नमः अधः। सौः सरस्वत्यै नमो मध्ये। इति संपूज्य, गृहान्तः प्रविश्य यथार्हमासनं शोधयेत्।

(ii) Being seated for worship and getting ready

आं आसनशोधनमन्त्रस्य, मेरुपृष्ठ ऋषिः सुतलं छन्दः, कूर्मो देवता, असनमन्त्रेण विनियोगः। ओंप्रीं पृथिव्यै नमः । "महि (पृथ्वित्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।" (ओंध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विश्वामसि।।)" ओं आं आधारशक्तये नमः। मं मूलप्रकृत्यै नमः। अं अनन्ताय नमः। पं पद्माय नमः। प्रीं पद्मनालाय नमः। तत्रोपविश्य तालत्रयं कुर्यात्। "अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।" इति तालत्रयं दत्त्वा, वामपार्ष्णिघातत्रयेण विघ्नानुत्सार्य नाराचमुद्रां प्रदर्श्य गुरुं प्रणमेत्।

(iii) Adoration of guru

गुरुर्ब्रह्मा गुरुर्विष्णुरिति, अज्ञानतिमि रन्धस्येति, अखण्डमण्डलाकारिमिति च पठित्वा, श्रीगुरवे नमः स्ववामे । गुं गुरुभ्यो नमः। परमगुरुभ्यो नमः। परापरगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो नमः। इति गन्धाक्षतैरभ्यर्च्य न्यासपूर्वं संकल्पं कुर्यात्।

(iv) Durgā-gāyatrī for nyāsa

अस्य श्रीदुर्गादेवी (योगपीठपूजा) मन्त्रस्य, महेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गा देवता, दुं बीजं , ह्रीं खाक्तिः, ऊँ कीलकं, नमः इति दिग्बन्ध, धर्मार्थकाममोक्षार्थे दुर्गापूजायां विनियोगः। अथ न्यासः न्यासः। महेश्वरऋृषये नमः शिरसि। अनुष्टुप्छन्दसे नमो मुखे । श्रीदुर्गादेवतायै नमो हृदि। दुं बीजाय नमो नाभौ । ह्रीं शक्तये नमो गुह्ये। ओं कीलकाय नमः पादयोः। नमो दिग्बन्धः इति सर्वाङ्गेषु। ओं ह्रां अङ्गुष्ठाभ्यां नमः। ओं ह्रीं तर्जनीभ्यां नमः। ओं ह्रूं मध्यमाभ्यां नमः। ओं हैं अनामिकाभ्यां नमः । ओं हौं कनिष्ठिकाभ्यां नमः। ओं हः करतलपृष्टाभ्यां नमः। इति करन्यासः। एवं हृदादिषडङ्गन्यासः।।

(c) Śuddha-mātṛkā-nyāsa (Placement of letter-deities on limbs)

अथ मूलन्यासः । ओं नमः शिरसि । ह्रीं मुखे। दुं वक्षसि। दुं भुजयोः। गीं नाभौ । यै पृष्ठे । नं जान्वोः । मः पादयोः । इति त्रिर्व्यापयेत्। आं आत्मतत्त्वाय नमः शिरसि । ह्रीं विद्यातत्त्वाय नमो मुखे। दुं शिवतत्त्वाय नमो हृदये। अं गुरुतत्त्वाय नमो नाभौ। ओं ह्रीं शक्तितत्त्वाय नमो जङ्घयोः । ओं दुं शिवशक्तितत्त्वाय नमः पादयोः। ओं अं आं कं खं गं घं ङं इं ईं हृदयाय नमः । ह्रीं उं ऊं चं छं जं भं ञं ऋं ॠं शिरसे स्वाहा। दुं लृंटंठंडंढंणंलॄं शिखायै वषट्। ऊें एं तं थं दं धं नं एं कवचाय हुं । ह्रां आंपंफंबंभंमंश्रीं नेत्रेभ्यो वौषट् । दुं अंयंरंलंवंशंषंसंहंळंक्षः अः अस्त्राय फट् इति हृदयादिन्यासः । एवं करन्यासः इति शुद्धमातृकान्यासः।।

(d) Mūla-mātṛkā-nyāsa (Placement of letter-deities on limbs)

अथ मूलमातृकान्यासः । आं नमः शिरसि । आं नमो मुखवृत्ते । इं दक्षनेत्रे । ईं वामनेत्रे । उं दक्षकर्णे । ऋं दक्षगण्डे । ॠं वामगण्डे । लृं दक्षनासापुटे । लॄं वामनासापुटे । एं ऊर्ध्वोष्ट । ऐं अधरेष्ठे ।आं उर्ध्वदन्तपंक्तौ । औ अधोदन्तपंक्तौ । अं ललाटे। अः जिह्वायाम्। कं नमो दक्षबाहुमूले । खं कुर्परे। गं मणिबन्धे । घं अङ्गुलिमूले। ङं अङ्गुल्यग्रे। चं वामबाहुमूले । छं कुर्परे । जं मणिबन्धे । झं अङ्गलिमूले । ञं अङ्गुल्यग्रे। टं नमो दक्षपादमूले । ठं जानुनि। डं गुल्फे। ढं अङ्गुलिमूले । णं अङ्गल्यग्रे । तं वामपादमूले। थं जानुनि। धं गुल्फे । धं अङ्गुलिमूले । नं अङ्गुल्यग्रे । पं दक्षपार्श्वे । फं वामपार्श्वे । बं पृष्टे । भं नाभौ। मं जठरे। यं हृदि । रं दक्षांसे। लं ककुदि। वं वामांसे। शं हृदादिदक्षहस्ताग्रान्तं । षं हृदादिवामहस्ताग्रान्तं । सं हृदादिदक्षपादाग्रान्तं । हं हृदादिवामपादाग्रान्तं । ळंपादादिशिरःपर्यन्तम्। क्षः नमः शिरसः पादपर्यन्तमिति त्रिर्व्यापयेत्।

(e) Bhūta-Śuddhi (Purification of elements)

एवं न्यासं विधाय पूर्ववत् षडङ्गं कृत्वा प्रणावेन प्राणायामत्रयं विधाय, (पूरकं १२ कुम्भकं १६ रेचकं ३२) ओं ह्री आत्मतत्त्वं शोधयामि स्वाहा । औं ह्रीं विद्यातत्त्वं शोधयामि स्वाहा, ओं ह्रीं शिवतत्त्वं शोधयामि स्वाहा, इति त्रिराचम्य, प्राणायामयोगेन भूतशुद्धिं कुर्यात्।

(f) Pāpa-purusha-śodhana (Driving away the evil spirit from the body)

ओं हूं आकुञ्चेन सुषुम्नावर्त्मना प्रदीप कलिकाकारं तेजो ब्रह्मपथान्तर्नीत्वा परमशिवे समानीय, तत्र सुधावृष्ट्यां कुलगुरून् ध्यात्वा तयैव संतर्प्य, पुनस्तेनैव मार्गेण षट्चक्रकुलं भित्वा तत्तेजः स्वस्थानमानीय, यमिति वायुबीजेन षोडशधा जप्तेन वामकुक्षिगतं पापपुरुषं कृष्णावर्णां रक्तश्मश्रुलमङ्गुष्ठमात्राकारं ध्यात्वा शोषयेत्। रमिति वह्निबिजेन षोडशधा जप्तेन तं दाहयेत्। वमित्यमृतबीजेन षोढशधा जप्तेन गलच्चन्द्रामृत वृष्ट्यप्लावयेत्।

(g) Prāṇa-pratishṭhā (Regarding ones own body as divine and installing the vital spirit or prāṇa in the body).

लमितीन्द्रबीजेन षोडशवारजप्तेन (पिण्डीभूतं स्वात्मकं ध्यात्वा, हमित्याकाशबीजेन सकृज्जप्तेन) स्वात्मानं दिव्यदेहं विभावयेदिति भूतशुद्धिं कृत्वा, प्राणप्रतिष्ठां कुर्यात्। आं ओं दओंकों सोहं हंसः मम प्राणा इह प्राणाः एवं ओं मम जीव इह स्थितः, उँ मम सर्वेन्द्रियाणि इह स्थितानि, उं मम वाङ्मनश्चक्षुस्त्वक्श्रोत्र जिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्टन्तु स्वाहा, इति प्राणप्रतिष्ठाक्रमः।।

(h) Dhyāna (contemplation on the Devī)

एवं प्राणान् संस्थाप्य पूर्ववत् षडङ्गं विधायाचम्य मूलदेवीं ध्यायेत्।

भूगेहनागदलवृत्तरसाररार बिन्दुस्थसन्महि षपीठगतां भवानीम्। दूर्वादलाग्रसदृशच्छविमष्टबाहुं दुर्गा भजे त्रिनयनां विलसत्त्रिबीजाम्।।

III

PŪJA-PADDHĀTI

(The worship proper, after the preliminaries described above)

(a) Pītha-pūjā, visualizing or writing Śrī-chakra.

इति ध्यात्वा मूलाङ्गन्यासौ विधाय, श्रीचक्रं चतुर्द्वारं त्रिवृत्तं साष्टदलं वृत्तं षडश्रं त्रिकोणबिन्दुं विचिन्त्य वा अष्टगन्धेन विलिख्य वा विभाव्य पीठपूजां कुर्यात्। ओं ह्रीं मण्डूकाय नमः। कालाग्निरुद्राय नमः। मूलप्रकृत्यै नमः। आधारशक्तये नमः। कूर्माय नमः। अनन्ताय। वराहाय । पृथिव्यै । इत्युपर्युपरि संपूज्य,

Visualizing the Yoga-pīṭha

सुधार्णावाय नमः मध्ये। नवरत्न विरचित नवखण्डमयद्वीपाय नमः। पद्मरागखण्डाय नमः। स्वर्णगिरये । नन्दनोद्यानाय । कल्पवनाय पद्मवनाय । विचित्ररत्नखचितभूमिकायै। चिन्तामणिमण्डपाय । नवरत्नखचितरत्न मयवेदिकायै। रत्नसिंहासनाय । तन्मध्ये सहस्रारपद्माय । प्रकृतिमयपत्रेभ्यो । विकृतिमयकेसरेभ्यो । तन्मध्ये अष्टबीजवि भूषितकर्णिकायै । तत्पार्श्वे धर्माय । ज्ञानाय । रँ वैराग्यायं । रँ ऐश्वर्यायां । वामतः रँ अधर्मायं । रँ अज्ञानायं रँ अवैराग्यायं । रँ अनैश्वर्यायं । मध्ये रँ सं सत्त्वायं । रँ रं रजसें । रँ तं तमसे । मूलविद्यामुच्चार्य। महिषासनाय नमः। मूलमुच्चार्य मातृकाः प्रोच्चार्य श्रीयोगपीठाय नमः इत्यभ्यर्च्य पात्रार्चनं कुर्यात्।

(b) Arghya-vidhi (offering of water-oblations to the Devi)

ततः स्वदेहं गन्धादिना संपूज्य, तत्र स्ववामे वृत्तत्रिकोणचतुरश्रमण्डलं विधाय मूलेनाभ्यर्च्य, मूलं दुर्गासामान्यार्घ्याय नमः। रं वह्निमण्डलाय दशकलात्मने नमः इत्याधारे, तन्मण्डलं षडङ्गेनाभ्यर्च्य, तत्रास्त्रक्षालितं शङ्खं संस्थाप्य, शङ्खे अं अर्कमाण्डलाय द्वादशकलात्मने नमः इति संपूज्य, विलोममातृकया संपूर्य, सौः सोममण्डलाय षोडशकलात्मने नमः इत्यभ्यर्च्य, मूलाष्टाभिमन्त्रितं कृत्वा ''गङ्गे च यमुने चैव'' इत्यादिना तीर्थमावाह्य, शुद्धं भावयेदिति सामान्यार्घ्यविधिः।।

(c) Kalaśa-sthāpanā (Installation of the sacred water-pots)

सामान्यार्घ्यस्य वामे त्रिकोर्णष्टकोणवृत्तचतुरश्रं मण्डलं विधाय तन्मण्डलं षड्ङ्गेनाभ्यर्च्य, मूलमुच्चार्य, श्रीदुर्गाकलशमण्डलाय नमः। ततः पूर्ववत् तत्रास्त्रक्षालितां त्रिपादिकां संस्थाप्य, रं वह्निमण्डलाय दशकलात्मने नमः इत्यभ्यर्च्य, तत्रास्त्रक्षालितं कलशं संस्थाप्य, अं अर्कमण्डलाय द्वादशकलात्मने नमः इत्यक्षतपुष्पैरभ्यर्च्य, तत्रानामिकाङ्गुष्ठाभ्याममृतधारापातेन कलशमापूर्य, सौः सोममण्डलाय षोडशकलात्मने नमः इत्यभ्यर्च्य, ओं ह्रीं दां दीं दूं दैं दौं दः दुंअं अमृते अमृतोद्भवे श्रमृतवर्षिणि अमृतं स्रावय २ शुक्रशापं मोचय २, ओं ह्रीं दुं सुरादेव्यै वौषट्, इति सप्तधाभिमन्त्र्य, ओं ह्रीं दुं आनन्दभैरवसुरादेवीपादुकाभ्यो नमः इति संपूज्य, धेनुयोनिमुद्रे प्रदर्श्य,

ओं सूर्यमण्डलसंभूते वरुणालयसंभवे, ।
अमाबीजमये देवि शुक्रशापाद्विमुच्यताम्।।

एकमेव परं ब्रह्म स्तूलसूक्ष्ममयं ध्रुवम्।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्।।

पवमानः परानन्दः पवमानः परो रसः।
पवमानं परं ज्ञानं तेन त्वां पावयाम्यहम्।।

वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु।।

कृष्णाशापविनिर्मुक्ता त्वं मुक्ता ब्रह्मशापतः।
विमुक्ता मुनिशापेन पवित्रा भव सर्वदाँ।।

इति कलशं संपूज्य धेनुयोनिमत्स्यमुद्राः प्रदर्श्य गरुडमुद्रयाच्छादयेदिति द्रव्यशुद्धिः ।।

ओं ह्रीं दुं कृतावतारो हरिणा कलिना पीडितं जगत्।
बलिना निगृहीतं तु कौलिकानां हिताय च ।।

श्रीदुर्गापरितोषार्थे स्वयं मीनोऽभवत् प्रभुः। इति, मुद्रात्रयं प्रदर्श्य शुद्धिं शोधयेत्।

ओं ह्रीं दुं छागलादिगवान्तादिकृतरूपाय वै नमः।
बल्यर्थे देवदेव्योश्च पवित्रीभव साम्प्रतम्।।



Durgā

मूलं त्रिधा जप्त्वा मुद्रात्रयं दर्शयेदिति।

ओं ह्रीं दुं श्रीदुर्गार्चनकाले तु यानि यानीह सांप्रतम्।
वस्तूनि सौरभेयानि परित्राणीह सिद्धये ॥

इति मूलं त्रिधा जपन् मुद्रात्रयं सर्वस्योपरि दर्शयेदिति कलशादिविधिः॥

(d) Āvaraṇa-Pūjā (worship of the Enclosures) of the Śrī-chakra)

ततो मूलेनान्दभैरवाङ्कोपविष्टां नीलकण्ठेशी श्रीदेवीं ध्यात्वा मूलेनावाह्य श्रीचक्रमर्चयेत्। तत्र मूलेन पाद्यार्घ्याचमनीयादि परिकल्पयेत्। मूलेन देवदेव्योमधुपर्काचमनीयादि निवेदयेत्। मूलेन ताम्बूलादि समर्पयेत्। ततो मूलषडङ्गं विधाय चतुरश्रं पूजयेत्। ओं ह्रीं दुं सर्वसिद्धिप्रदाय चक्राय नमः इति पुष्पाञ्जलिं दत्त्वा, ओं ह्रीं दुं गं गणेशाय नमः पूर्वे । ओं हौं कुमाराय नमः दक्षिणे । ओं प्रीं पुष्पदन्ताय नमः पश्चिमे । ओं वैं विकर्तनाय नमः उत्तरे । इति गन्धाक्षतपुष्पैरभ्यर्च्य प्रथमावरणम्।

ओं असिताङ्गभैरवयुत - ब्राह्मीश्रीपादुकां। ओं रुरुभैरवयुतापराजिताश्रीपा। ओं चण्डभैरवयुत - चामुण्डाश्रीपा । ओं कपालिभैरवयुत - कौमारीश्रीपा । ओं चण्डभैरवयुत - चामुण्डश्रीपा । ओं संहारभैरवयुत - कौमारीश्रीपा। ओं भीषणभैरवयुत - वाराहीश्रीपां । ओं कोधेशभैर वयुतापराजिताश्रीपा । ओं उन्मत्तभैरवयुत - माहेश्वरीश्रीपा । ओं कपालिभैरवयुत -कौमारीश्रीपा । ओं भीषणभैरवयुत - वाराहीश्रीपा । ओं संहारभैरवयुत - नारसिंहीश्रीपा । इति वामावर्तेन गन्धाक्षतपुष्पैरभ्यर्चयेत्। इति द्वितीयावरणाम्॥

ओं ह्रीं दुं सर्वाशापूरकचक्राय नमः इति पुष्पाञ्जलिं दत्त्वा षट्कोणं पूजयेत्। ओं ह्री दुं शैलपुत्रीश्रीपा । ओं ब्रह्मचारिणीश्री । ओं चण्डघण्टाश्री । ओं कूष्माण्डाश्री । ओं स्कन्दमातृश्री । ओं कात्यायनीश्री । इति वामावर्तेन संपूजयेत्। इति तृतीयावरणम्॥

ओं ह्रीं दुं सौभाग्यप्रदाय चक्राय नमः, इति पुष्पाञ्जलिं दत्त्वा त्रिकोणं पूजयेत् ।ओं कालरात्रीश्रीपां । ओं महागौरीश्रीं । ओं देवदूतीश्रीं । इति अग्रेशानाग्नेयतोऽभ्यर्चयेत्। इति चतुर्थावरणम्॥

ओं ह्रीं दुं अष्टसिद्धिप्रदाय चक्राय नमः इति पुष्पाञ्जलिं दत्त्वा मूलमुच्चर्य श्रीनीलकण्ठश्रीदुर्गाश्रीपां इति सप्तवारं बिन्दौ अभ्यर्चयेत्। इति पञ्चमावरणम् ॥

बिन्दूपरि मूलं अम्बिकाश्रीपां । ओं अष्टाक्षराश्रीपां । ओं अष्टभुजाश्रीं । ओं नीलकण्ठश्रीपां । ओं जगदम्बिकाश्रीं । इत्यभ्यर्चयेत्। इति षष्ठावरणम्।।

बिन्दूपरि मृं शङ्खाय नमः। पद्मायं । स्वङ्गायं । वाणेभ्यों । धनषें । खेटकायं । शूलायं । तर्जन्यै नमः । मूलविद्यां त्रिकोणेभ्यों । धनुषे । खेटकायं । शूलाय । तर्जन्यै नमः । मूलविद्यां त्रिरुच्चार्य श्रीनीलकण्ठश्रीदुर्गाश्रीपां पूं तं इति मूलेन गन्धाक्षतपुष्पधूपदीपनैवेद्याचमनीयताम्बूलच्छत्रचामरारात्रिकादीन् समर्पयेदिति सप्तमावरणम्।

(e) Bali-samarpaṇa (offering of food)

तत्र मूलेन बलिं निवेद्य सौः सर्वविघ्नकृद्भ्यो भूतेभ्यो नमः स्वाहा। यांयोंयूं योगिनीगणेभ्यो नमः स्वाहा । वां वीं देवीपुत्रवटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख एह्येहि

इमं बलिं यथोपचितं गृह्ण २ स्वाहा। क्षां क्षीं क्षेत्रपालाय नमः ।

(f) Samāpanam (conclusion)

इति बलिं दत्त्वा , सङ्कल्पपूर्वं न्यासादि विधाय, देव्यग्रे मालामादाय, यथाशक्ति मूलविद्यां जप्त्वा ''गुह्याती'' ति जपं समर्प्य, देव्यग्रे कवच - सहस्रनाम - स्तवपाठं विधाय तदपि देवदेव्योः समर्प्य,

''प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः । यत्करोमि जगन्मातस्तदस्तु तव पूजनम्॥ ''

इति पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्रणम्य, संहारमुद्रया देवदेव्यौ हृदि विसृज्य स्वयमपि सदाशिवो भूत्वा स्वशक्तया सह पात्रार्पणां विधाय सुखं विहरेदिति॥

इति श्रीनित्यपूजायाः पद्धतिं गुह्यगोपिताम्।
श्रीदुर्गासारसंभूतां गोपयेत् साधकेश्वरि॥

IV

DURGĀ-KAVACHA

(After the worship proper, detailed above, the kavacha is recited. (see also Durgā-kavacheśvara given later)

(a) Introduction

श्रुणु देवि प्रवक्ष्यामि कवचं मन्त्रगर्भितम्।
दुर्गाया प्रीतिजनकं कवचेश्वरसंज्ञकम्॥१॥

पुण्यौधप्रदं दिव्यं सर्वापद्विनिवारकम्।
योगिप्रियं योगगम्यं देवानामपि दुर्लभम्॥२॥

विनाऽऽनेन मन्त्रस्य न सिद्धिर्देवि कलौ भवेत्।
धारणादस्य भवति शिवस्त्रैलोक्यनायकः॥३॥

भैरवो भैरवेशानो विष्णुर्नारायणो विभुः।
देवो पार्वति देवेशो विघ्नध्वंसी गजाननः॥४॥

सेनानीश्च महासेनो जिष्णुर्लोकर्षभः प्रिये।
सूर्यस्तमोपहश्चैव चन्द्रोऽमृतनिधिस्तथा॥५॥

बहुनोक्तेन किं देवि दुर्गाकवचधारणात्।
मर्त्योऽप्यमर्त्यतां याति सिद्धो भवति साधकः।।६।।

(b) Details of the Kavacha

कवचस्यास्य देवेशि ऋषिः प्रोक्तो गणेश्वरः।
छन्दोऽनुष्टुप् देवि दुर्गा देवताष्टाक्षरा स्मृता।।१।।

चक्रिबीजं च बीजं स्यान्माया शक्तिरितीरिता।
तारं कीलकमीशानि दिग्बन्धो वर्णितोऽश्मरी।
धर्मार्थकाममोक्षार्थे विनियोग इति स्मृतः।।२।।

अस्य श्रीदुर्गाकवचस्य गणेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गा देवता, दुं बीजं, ह्रीं शक्तिः, ओं, कीलकं, चतुर्वर्गाप्तये विनियोगः । नम इति दिग्बन्धः ।।

(c) Dhyāna

ध्यानम्।।
दूर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्गशरखेटकशूलचापान्।
संतर्जनीं च दधतीं महिषासनस्थां
दुर्गां नवारकुलपीठगतां भजेऽहम्।।

(d) Kavacha

ओं दुर्गा मे शिरः पातु ह्रीं पातु ललाटकम्।
दुं नेत्रेऽष्टाक्षरा पातु देवी पातु श्रुती मम।।१।।

मठं गण्डौ च मे पातु देवेशी रक्तकुण्डला।
वायुर्नासां सदा पातु सर्वासुरनिषूदिनी।।२।।

लवणं पातु मे चोष्ठौ चामुण्डा मुण्डमर्दिनी।
भेकीबीजं सदा पातु दन्तान् मे रक्तदन्तिका।।३।।

ओ ह्रीं श्रीं पातु मे कण्ठं विषकण्ठमनोहरी।
ओं ऐं क्लीं पातु मे स्कन्धौ स्कन्दमाता
सुरेश्वरी ।।४।।

ओं सौः क्लीं मे पातु बाहू देवेशी बगलामुखी।
ऐं श्रीं ह्रीं पातु मे वक्षो देवता विन्ध्यवासिनी।
ओं ह्रीं श्रीं क्लीं पातु कुक्षिं कामाक्षी
परदेवता।।५।।

श्रीं ह्रीं ऐं पातु मे पार्श्वौ परमेशकुटुम्बिनी।
ओं स्त्रिं हूं ऐं पातु पृष्ठं मम दुर्गार्तिहारिणी।।६।।

ओं क्रीं हूं पातु मे नाभिं देवी नारायणी सदा।
ओं ऐं क्लीं सौः सदा पातु कटिं कात्यायनी
मम॥७॥

ओ ह्लीं श्रीं ह्लीं पातु शिश्नं देवी श्रीभगमालिनी।
ऐं सौः क्लीं सौः पातु गुह्यं गुहेश्वरविलासिनी
॥८॥

ओं ऐं ह्लीं श्रीं ह्सौः पायादूरू मे मनोन्मनी।
ओं जुं:सौः पातु जानू जगदीश्वरपूजिता॥९॥

ओं ऐं क्लीं मे पातु जङ्घे जम्भारिवरप्रदा।
ओं ह्लीं श्रीं गीं सदा पातु गुल्फौ मम गणेश्वरी॥१०॥

ओं ह्लीं दुं पातु मे पादौ पार्वती परमेश्वरी।
पूर्वे मां पातु ब्रह्माणी वह्नौ मां वैष्णवी तथा॥११॥

दक्षिणे चण्डिका पातु नैर्ऋत्ये नारसिंहिका।
पश्चिमे पातु वाराही वायव्ये वनशङ्करी॥१२॥

उत्तरे पातु कौमारी चैशान्यां शाम्भवी तथा।
ऊर्ध्वे उमा सदा पातु पात्वधस्तात्परदेवता॥१३॥

प्रभाते त्रिपुरा पातु मध्याह्ने मां महेश्वरी।
सायं सरस्वती पातु निशीथे च्छिन्नमस्तका॥१४॥

निशान्ते भैरवी पातु सर्वदा भद्रकालिका।
अग्नेरपर्णा मां पातु जलान्मां जगदीश्वरी॥१५॥

वायोर्मा पातु वाग्देवी वनाद् वनजलोचना।
सिंहात् सिंहासना पातु सर्पात् सर्पान्तकासना॥१६॥

रोगान्मां राजमातङ्गी भूताद् भूतेशवल्लभा।
यक्षेभ्यो यक्षिणी पातु रक्षेभ्यो राक्षसान्तका॥१७॥

भूतप्रेतपिशाचेभ्यः सुमुखी पातु मां सदा।
सर्वत्र सर्वदा पातु ओं ह्लीं दुर्गा नवाक्षरा॥१८॥

(e) Phala

इतीदं कवचं गुह्यं दुर्गासर्वस्वमुत्तमम्।
मन्त्रगर्भं महेशानि कवचेश्वरसंज्ञकम्॥१॥

वित्तदं पुण्यदं पुण्यं वर्म सिद्धिप्रदं कलौ।
अष्टसिद्धिप्रदं गोप्यं परापररहस्यकम्॥२॥

श्रेयस्करं मनुमयं रोगनाशकरं परम्।
महापातककोटिघ्नं मानदं च यशस्करम्।।३।।

अश्वमेधमहस्रस्य फलदं परमार्थदम्।
अत्यन्तगोप्यं देवेशि कवचं मन्त्रसिद्धिदम्।।४।।

पठनात् सिद्धिदं लोके धारणान्मुक्तिदं शिवे।
रवौ भूर्जे लिखेद् धीमान् कृत्वा कर्माह्निकं प्रिये।।५।।

(f) Dhāraṇa-Kavacha

श्रीचक्राग्रेऽष्टगन्धेन साधको मन्त्रसिद्धये।
लिखित्वा धारयेद् बाहौ गुटिकां पुण्यवर्धिनीम्।।१।।

किं किं न साधयेल्लोके गुटिका वर्मणोऽचिरात्।
गुटिकां धारयेन्मूर्ध्नि राजानं वशमानयेत्।।२।।

धनार्थी धारयेत् कण्ठे पुत्रार्थी कुक्षिमण्डले।
तामेवं धारयेद् देवि लिखित्वा भूर्जपत्रके।।३।।

श्वेतसूत्रेणा संवेष्ट्य लाक्षया परिवेष्टयेत्।
सुवर्णेनाथ संवेष्ट्य धारयेद् रक्तरज्जुना।।४।।

गुटिका कामदा देवि देवानामपि दुर्लभा।
कवचस्यास्य गुटिका धृता मुक्तिप्रदायिनी।।५।।

कवचस्यास्य देवेशि वर्णितुं नैव शक्यते।
महिमा च महादेवि जिह्वाकोटिशतैरपि।।६।।

अदातव्यामिदं वर्म मन्त्रगर्भं रहस्यकम्।
अवक्तव्यं महापुरायं सर्वसारस्वतप्रदम्।।७।।

अप्रदीक्षिताय नो दद्यात् कुचैलाय दुरात्मने।
अन्यशिष्याय दुष्टाय निन्दकाय कुलार्थिनाम्।।८।।

दीक्षिताय कुलीनाय गुरुभक्तिरताय च।
शान्ताय कुलसक्ताय शाक्ताय कुलकामिने।।९।।

इदं वर्म शिवे दत्त्वा कुलभागी भवेन्नरः।
इदं रहस्यं परमं दुर्गाकवचमुत्तमम्।
गुह्यं गोप्यतमं गोप्यं गोपनीयं स्वयोनिवत्।।१०।।

V

DURGĀ-SAHASRA-NĀMA

The recitation of one thousand names of Durgā is next resorted to. There are several versions of the thousand names. The one given here is from *Rudra-yāmala.* This is also called `Mantra-garbha-sahasra-nāma', because it is said to incorporate the details of the mūla-mantra of the goddess. The mūla-mantra here expatiated into one thousand names is `Om hrīm dum durgāyai namah'. Mahādeva (viz. Śiva) is the seer (ṛshi), Durgā is the deity (devatā) and anushṭup is the meter (chhandas) of this text in 98 verses, enumerating the thousand names. This is followed by an elaborate tail-piece (phala-stuti) of 29 verses detailing the benefits, according from the recitation of the text.

(a) Introduction

अधुना श्रृणु वक्ष्यामि दुर्गासर्वस्वमीश्वरि।
रहस्यं मम देवानां दुर्लभं जन्मिनामपि॥१॥

श्रीदुर्गातत्त्वमुद्दिष्टसारं त्रैलोक्यकारणम्।
मन्त्रनामसहस्त्रं च दुर्गायाः पुण्यदं परम्॥२॥

यं पठित्वा शिवे धृत्वा देवीनामसहस्त्रकम्।
इह भोगी परत्रऽपि जीवन्मुक्तो भवेन्नरः॥३॥

इदं नामसहस्त्रं ते मन्त्रगर्भं रहस्यकम्।
अश्वमेधायुतात् पुण्यं लोके सौभाग्यवर्धनम्॥४॥

श्रेयस्करं विश्ववन्द्यं सर्वदेवनमस्कृतम्।
गुह्यं गोप्यतमं देवि पठनात् सिद्धिदायकम्॥५॥

(b) Details and Dhyāna

अस्य श्रीदुर्गानामसहस्त्रपाठस्य, श्रीमहेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गा देवता, दुं बीजं, ह्रीं शक्तिः, ओं कालिकं, धर्मार्थकाममोक्षार्थे सहस्त्रनामपाठे विनियोगः ।

ध्यानम् -

दूर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्ग शरखेटकशूलचापान्।

संतर्जनीं च दधतीं महिषासनस्थां।
दुर्गां नवारकुलपीठगतां भजेऽहम्।।

(d) Text of Sahasra-nāma

ओं ह्रीं दुं जगदम्बाभा भद्रिका भद्रकालिका।
प्रचण्डा चण्डिका चण्डी चण्डमुण्डनिषूदिनी।।१।।

अनसूया तुटिस्तारा कृत्तिका कुब्जिका लया।
प्रलया स्थितिः संभूतिर्विभूतिर्भयनाशिनी।।२।।

महामाया महाविद्या मूलविद्या चिदीश्वरी।
मदालसा मदोत्तुङ्गा मदिरा मदनप्रिया।।३।।

अलिर्व्यालप्रसूः पुण्या पवित्रा परमेश्वरी।
आदिदेवि कला कान्ता त्रिपुरा जगदीश्वरी।।४।।

मनोन्मना महालक्ष्मीः सिद्धलक्ष्मीः सरस्वती।
सरित्कादम्बरी गोधा गुह्यकाली गणेश्वरी।।५।।

गणाम्बिका जया तापी तपना तापहारिणी।
तपोमयी दुरालम्बा दुष्टग्रहनिवारिणी।।६।।

दुःखहा सुखदा साध्वी परमामृतसूः सुरा।
सुधा सुधाशुनिलया प्रलयानलसंनिभा।।७।।

समस्ता संपदम्भोजनिलया कर्णिकालया।
विद्येश्वरी विश्वमयी विराट् छन्दो गतिर्मतिः।।८।।

धृतिदा दाम्भिकी दोला लोपामुद्रा पटीयसी।
गरिष्ठारिष्टहाऽदुष्टा कृपा काशी कुलाकुला।।९।।

अकुलस्था पदन्यासा न्यासरूपा विरूपिणी।
विरूपाक्षी कोटराक्षी कुलकान्तापराजिता।।१०।।

अजिता कुलिका लम्पा लम्पटा त्रिपुरेश्वरी।
त्रितयी (१००) वेदविन्यासा संन्यासा
सुमतिर्भया।।११।।

अभया स्वर्मुखा देवी महौषधिरलम्बुषा।
चपला चन्द्रिका चण्डा चण्डमुण्डनिषूदिनी।।१२।।

चापलाक्षी मदाविष्टा मदिरारुणलोचना।
पुरी त्रिपुरम् रास्ना रसा रामा मनोहरी।।१३।।

संध्या संध्याभ्रशीला च शाला श्यामपयोधरा।
शशाङ्कमुकुटा श्यामा सुरा सुन्दरलोचना॥१४॥

विषमाक्षी विशालाक्षी वशा वागीश्वरी शिला।
मनःशिला च कस्तूरी मृगनाभिर्मृगेक्षणा॥१५॥

मृगारिवाहना माध्वी मानदाऽमृतभाषिणी।
नारसिंही वामदेवी वामा वामश्रुतिप्रिया॥१६॥

पुण्या पुण्यगतिः पुण्या पुत्री पुण्यजनप्रिया।
चामुण्डा चोग्रचण्डा च
महाचण्डाऽतमाऽतमाः॥१७॥

तपस्विनी प्रभा ज्योत्स्ना महज्ज्योतिःस्वरूपिणी।
सुरूपा स्वर्गतिः साध्वी सदसद्रूपराजिता॥१८॥

सृष्टिः स्थितिः क्षेमकरी क्षमा क्षामोन्नतस्तनी।
क्षोणी क्षयकरी क्षीणा शवस्था शिववल्लभा॥१९॥

दन्तुरा दाडिमप्रीतिर्दया दाम्भिकसूदिनी।
राक्षसी डाकिनी योग्या योगिनी योगिवल्लभा॥२०॥

कबन्धा कन्धरा कृष्णा कृत्तिका कण्टकान्तका।
कलङ्करहिता काली कम्पा काश्मीरवल्लभा॥२१॥

काशी कीर्तिप्रदा काञ्ची काश्मीरी कोकिलस्वना।
प्रभावती (२००) महारौद्री रुद्रपत्नी
रुजापहा॥२२॥

रतिः स्तुतिस्तरीस्तुर्या तोतुलाऽतलवासिनी।
तपःप्रिया शरच्छ्रेष्ठा पङ्कुपुत्री यमस्वसा॥२३॥

यामी यमान्तका याम्या यमुना स्वर्नदी तडित्।
नारायणी विश्वमाता भवानी पापनाशिनी॥२४॥

विगता विगतप्रश्ना कृष्णा कृष्टासिधारिणी।
वारी वारा वरधरा वरदा वीरसूदिनी॥२५

वीरसूर्वामनाकारा दीर्घसूत्रा दयावती।
दरी धनप्रदा धात्री धात्रीवल्ली महोदरी॥२६॥

गणेश्वरी गया काञ्ची काञ्चीकिङ्किणिघण्टिका।
माया मायावती मत्ता प्रमत्ता प्रवरेश्वरी॥२७॥

पौरन्दरी शची शीता शीतातपस्वभावजा।
स्वाभाविकगुणा गण्या गाम्भीर्यगुणभूषणा॥२८॥

सूतिः सूर्यकला सुप्ता सप्तसप्तिस्वरूपिणी।
तेजस्विनी सदानन्दा सभासन्तोषवर्धिनी॥ २९॥

Mahisha-Mardinī (after a Hoysaḷa sculpture)

तर्पणा कर्षणा होता सङ्कल्पा शुभमन्त्रिका।
दर्भा द्रोणिकला श्रान्ता समिद्धा सुरवेदिका॥३०॥

धूम्राहुतिश्चरमतिश्चामीकररुचिश्चिता।
चिन्तानलेश्वरी नेला काला नीलसरस्वती॥३१॥

अपर्णा सुफला यज्ञा सभया निर्भयाभया।
भीमस्वना भर्गशिखा भास्वती भाकरा विभा॥३२॥

विभावरी नदी नन्द्या नन्द्यावर्तप्रवर्तिनी।
पृथ्वीधरा विषधरा (३००) विश्वगर्भा
प्रवर्तिका॥३३॥

विश्वमाया विश्वभाला विश्वम्भरविलासिनी।
उरगेशा पद्मनागा पद्मनाभप्रसूः प्रजा॥३४॥

तोरणा तुलसी दीक्षा दक्षा दाक्षायणी द्युतिः।
संपुटा शयना शय्या शासना शमनान्तका॥३५॥

श्यामाकवर्णा शर्दूली शम्पा शीलांशुवल्लभा।
स्तुत्या प्रणीता नियतिः कम्पना कम्पहारिणी॥३६॥

चम्पकाभा चरा चीनादीना दीनजनप्रिया।
वसुन्धरा वासवेशी वसुनाथा वटेश्वरी॥३७॥

समुद्रा सङ्गमा पूर्णा तरली तरुवासिनी।
पार्वती पामरी मान्या माननीया मधुप्रिया॥३८॥

माधवी मधुपानस्था मन्दिरा मन्दुरा मृगी।
मोमूषा रूरुषा रेवा रेवती रमणी रमा॥३९॥

ऋद्धिहस्ता सिद्धिहस्ता अन्नपूर्णा महेश्वरी।
अन्नरूपा जगज्ज्योतिः समस्तासुरघातिनी॥४०॥

गारुडी गगनालम्बा लम्बमानकचप्रिया।
पीताम्बरा पीतपुष्पा पूतना गीतवल्लभा॥४१॥

बलाका जगदन्ता च जरा जयवरप्रदा।
प्रीतिः कठोरवदना करालरदना रसा॥४२॥

जिह्वाहस्ता च बगला प्रणया विनयप्रदा।
किरी करालवपुषी शेमुषी मक्षिका मषी॥४३॥

उत्तीर्णा पणिका तीक्ष्णा श्लक्ष्णा कामेश्वरी शिवा।
शिवपत्नी सरोजाक्षी पद्महस्ता (४००)
सरस्वती॥४४॥

कमलाक्षी कमलजा करवालविहारिणी।
कविपूज्या कविगतिः कविरूपा कविप्रिया॥४५॥

कदली कदलीरूपा कदलीवनवासिनी।
कलप्रीता कलहदा कलहा कलहातुरा॥४६॥

कस्तूरीमृगसंस्था च कस्तूरीमृगरूपिणी।
कठोरा करमाला च कठोरकुचधारिणी॥४७॥

यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसंभवा।
यज्ञसिद्धिः क्रियासिद्धिर्यज्ञाङ्गी यज्ञरक्षिका॥४८॥

वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी।
विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला॥४९॥

शिवमाता शिवाख्या च शिवदा शिवरूपिणी।
गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी॥५०॥

दुर्गस्था दुर्गरूपा च दुर्गा दुर्गतिनाशिनी।
माहेश्वरी च सर्वाद्या शर्वाणी सर्वमङ्गला॥५१॥

सूर्यकोटिसहस्राभा चंद्रकोटिनिभानना।
समुद्रकोटिगम्भीरा वायुकोटिमहाबला॥५२॥

सोमसूर्याग्निमध्यस्था मणिमण्डलवासिनी।
द्वादशारसरोजस्था सूर्यमण्डलवासिनी॥५३॥

अकलङ्कशशाङ्काभा षोडशारनिवासिनी।
हृत्पद्मनिलयाऽभीमा महाभैरवनादिनी॥५४॥

वर्णाढ्या वर्णारहिता पञ्चाशद्वर्णभेदिनी।
भवानी भूतिदा भूतिर्भूतिदात्री च भैरवी॥५५॥

भैरवाचारनिरता भूतभैरवसेविता।
कामेश्वरी कामरूपा कामतापविमोचिनी॥५६॥

गणेशजननी देवी गणेशवरदायिनी।
गतिदा गतिहा गीता गौतमी गुरुसेविता॥५७॥

दीनदुःखहरा दीनतापनिर्मूलकारिणी।
दयाशीला दयासारा दयासागरसंस्थिता॥५८॥

नृत्यप्रिया नृत्यरता नर्तकी नर्तकप्रिया।
नारायणी नरेन्द्रस्था नरमुण्डास्थिमालिनी॥५९॥

भैरवी भैरवाराध्या भीमा भीमवरप्रदा (५००)।
भुवना भुवनाराध्या भवानी भूतिवर्धिनी॥६०॥

महिषासुरहन्त्री च रक्तबीजविनाशिनी।
धनुर्बाणधरा नित्या धूम्रलोचननाशिनी॥६१॥

कुलीना कुलमार्गस्था कुलमार्गप्रकाशिनी।
पञ्चाशद्वर्णबीजाढ्या पञ्चाशन्मुण्डमालिका॥६२॥

षडङ्गयुवतीपूज्या षडङ्गरूपवर्जिता।
कालमाता कालरात्रिः काली कमलवासिनी॥६३॥

कमला कान्तिरूपा च कामराजेश्वरी क्रिया।
माया मतिर्महामाया भयदा भयहारिका॥६४॥

नारी नारायणी गण्या नारायणगृहप्रिया।
मदिरापानसन्तुष्टा मदिरामोदधारिणी॥६५॥

तथ्या पथ्या कृती रथ्या रथस्था विततस्वरा।
महती रागिणी भार्गी शुचिहासा हरीश्वरी॥६६॥

हरिद्रत्नांशुलसिता लक्ष्मीनायकसुन्दरी।
अम्बालिकाम्बा देवेशी अनघाग्निशिखा
श्रुतिः॥६७॥

अलसाल्पगतिश्चान्त्यानन्तानन्तगुणाश्रया।
अद्या चादित्यसङ्काशा आदित्यकुलसुन्दरी॥६८॥

आत्मरूपाधिशमनी आदिमायादिदेवता।
इन्द्रप्रसूरिनद्योतिरिनाग्निशशिलोचना॥६९॥

इन्द्रावरजसंस्तुत्या इला चेक्षुरसप्रिया।
ईश्वरी ईशवनिता ईशा केशववल्लभा॥७०॥

उमा उर्वी उरुभुजा उत्तुङ्गा चोक्षवाहना।
उत्तङ्का चोत्तमा ध्येया उल्लासा चोरुगर्विणी॥७१॥

ऊष्मा ऊर्णा च गुर्वङ्गी ऊर्ध्वाक्षी ऊर्ध्वमस्तका।
ऋद्धिर्ऋचा ऋवर्णेशी ऋणहर्त्री ऋवान्तकी॥७२॥

ऋढिजा चारुवस्त्रा च ऋणिवासा (६००)
महालया।
लृकारा लृक्कुरा लीना लृकारा वरधारिणी॥७४॥

एणाङ्कमुकुटा चेहा चारुचन्द्रकला कला।
ऐकारगतिरैश्वर्यदायिनी चैश्वरी गतिः॥७५॥

ओंकारा बीजरूपा च औत्रिकी वेत्रधारिणी।
अम्बिका लम्पिका पम्पा अः
स्वरोद्गाररूपिणी॥७६॥

काली च भद्रकाली च कालिका कालवल्लभा।
कदम्बनिलया कन्था काञ्चीमण्डनमण्डिता॥७७॥

कलङ्करहिता कूर्मा काञ्चनाभा करीरगा।
कनकाचलवासा च कारूण्याकुलमानसा॥७८॥

कुलस्था कौलिनी कुल्या कुरुकुल्ला कपालिनी।
कपालकुलनिर्विण्णा क्लींकारा कञ्जलोचना॥७९॥

खञ्जनाक्षी खड्गधरा खेटकायुधभूषणा।
खर्पराढ्या च खलहा खेटिनी खेचरी खगा॥८०॥

खगायुधा खगगतिः खकाराक्षरभूषणा।
गणाध्यक्षा गजगतिर्गणेशजननी गदा॥८१॥

गोधा गदाधरा प्राज्या गगनेशी मही मला।
घुर्घुरा घटभूर्घूका घुसृणाभा गणेश्वरी ॥८२॥

घनसारप्रिया साम्या घवर्णकृतभूषणा।
ङान्ता ङवर्णमुकुटा कवर्गकृतभूषणा॥८३॥

चान्द्री चान्द्रिस्तुता चार्वी चन्द्रिका चण्डनिःस्वना।
चञ्चरीकस्वना देवी चञ्चञ्चामीकराङ्गदा॥८४॥

छत्रिका छुरिका छुच्छा छत्रचामरभूषणा।
ज्रंकारी जलजिह्वा च जृम्भिका जलयोगिनी॥८५॥

जटाजूटधरा जातिर्जातीपुष्पसमानना।
जलेश्वरी जगद्ध्येया जानकी जननी जटा॥८६॥

झंझा झरी झरत्कारी (७००)
झरत्काञ्चीरकिङ्किणी।
झिण्ठिका झम्पकृद् झम्पा झम्पत्रासनिवारिणी॥८७॥

ञाणुरूपा ञङ्कहस्ता ञवर्णाक्षरसंमता।
टङ्कायुधा महातथ्या टङ्कारकरुणा टसी॥८८॥

ठकुरा ठत्करा ठानी डिण्डीरवसना ढला।
ढण्ढानिलमयी ढण्डा ढणत्कारकरा ढसा॥८९॥

णान्ता शीलायुधा नम्रा णवर्णाक्षरभूषणा।
तरुणी तुन्दिला तोन्दा तामसी तामसप्रिया॥९०॥

ताम्रानना ताम्रकरा ताभ्राम्बरधरा तुला।
तापत्रयहरा तापी तैलासका तिलोत्तमा॥९१॥

स्थाणुपत्री स्थली स्थूला स्थितिः स्थैर्यधरा स्थुला।
दन्तिनी दन्तुरा दार्वी देवकी देवनायिका॥९२॥

दमिनी शामिनी दण्ड्या दण्डहस्ता दुरानतिः।
दुर्वारा दुर्गतिर्द्राक्षी द्राक्षा द्राविडवासिनी॥९३॥

दूरस्था दुन्दुभिध्वाना दरदा दरनाशिनी।
दुःखघ्नी द्रुतगाऽदुष्टा दया
दाम्भिक्यनाशिनी॥९४॥

धर्म्या धर्मप्रसूर्धन्या धनदा धातृवल्लभा।
धनुर्धरा धनुर्वल्ली धानुष्कवरदायिनी॥९५॥

धूमाली धूम्रवदना धूमश्रीर्धूम्रलोचना।
नलिनी नर्तका नान्ता नङ्गा नलिनलोचना॥९६॥

निर्मला निगमाचारा निम्नगा नगजा निमिः।
नीलग्रीवा निरीहा च नीपोपवनासिनी॥९७॥

निरञ्जना जनी जन्या (८००) निद्रालुर्नीरवासिनी।
नटिनी नाट्यनिरता नवनीतप्रियाऽनिला॥९८॥

नारायणी निराकारा निर्लेपा नित्यवल्लभा।
पद्मावती पद्मकरा पुत्रदा पुत्रवत्सला॥९९॥

परोत्तरा पुरी पाठा पीनश्रोत्रा पुलोमजा।
पुष्पिणी पुस्तककरा पटुः पाठीनवाहना॥१००॥

पापघ्नी षष्पिणी पाली पल्ली परमसुन्दरी।
पिशाची च पिशाचघ्नी पानपात्रधरा पुटा॥१०१॥

पूसिमा पञ्चमी पौत्री पुरूरववरप्रदा।
पञ्चयज्ञा पञ्चशरी पञ्चाशतिमनुप्रिया॥१०२॥

पाञ्चाली पञ्चमुद्रा च पूजा पूर्णमनोरथा।
फलिनी फलदात्री च ल्गुहस्ता फणिप्रिया॥१०३॥

फिरङ्गहा स्फीतमतिः स्फीतिः स्फीतिमती स्फुरा।
बलमाया बलस्तन्या बिल्वसेना बलाबला॥१०४॥

बगलेश्वरपूज्या च बलिनी बलवर्धिनी।
बुद्धमाता बौद्धमतिर्बद्धा बन्धनमोचिनी॥१०५॥

भगिनी भगमाला च भगलिङ्गामृतद्रवा।
भीमेश्वरी च भेरूण्डा भगेशी भगसर्पिणी॥१०६॥

भगलिङ्गस्थिता भाग्या भाग्यदा भगमालिनी।
मत्ता मनोहरा मीना मैनाकजननी मुरी॥१०७॥

मुरली मानवी होत्री महस्विजनमोदिता।
मत्तमातङ्गगा माद्री मरालगतिरञ्चला॥१०८॥

यक्षेश्वरेश्वरी यज्ञा यजुर्वेदप्रियाश्रिता।
यशोवती पतिस्था च यतात्मा
यतिवल्लभा॥१०९॥

यवनी यौवनस्था च यवा यक्षजनाश्रया।
यज्ञसूत्रप्रदा ज्येष्टा यज्ञभू (९००)
यूपमूलिनी॥११०॥

रञ्जिता राजपत्नी च राजसूयफलप्रदा।
रजोवती रजश्चित्रा राज्यदा राज्यवर्धिनी॥१११॥

राज्ञी रात्रिञ्चरेशानी रोगघ्नी त्रिपुरेश्वरी।
लुलिता लतिका लाप्या लोपा
ललनलालसा॥११२॥

लाटीरद्रुमवासा च पाटीरद्रुमवर्तिनी।
लङ्का ललज्जटाजूटा लङ्घिता लोकसुन्दरी॥११३॥

लोकेशवरदा लीया लयकर्त्री महालया।
वेदिर्विलग्ना वाणी च वीणा वेणुर्वनेश्वरी॥११४॥

वन्दमाना ववर्णाढ्या वाराही वीरमातृका।
शङ्खिनी शङ्खवलया शङ्खायुधधरा शमा॥११५॥

शशिमण्डलमध्यस्था शीतलाम्बुनिवासिनी।
श्मशानस्था महाघोरा श्मशाननिलयेश्वरी॥११६॥

सिन्धुः सूत्रधरा सत्रा समस्तकुलचारिणी।
सप्तमी सात्त्विकी सत्त्वा सत्रस्थाऽसुरमूदिनी॥११७॥

सुरेश्वरी सम्पदाद्या समस्ताचलचारिणी।
समदा संमितिः समा सवना सवनेश्वरी॥११८॥

हंसी हरप्रिया हास्या हरिनेत्रा हराम्बिका।
हेषा हठेश्वरी हेरा हलिनी हलदायिनी॥११९॥

हेहा हाहारवा हाला हालाहलहताशया।
क्षमा क्षेमप्रदा क्षामा क्षौमाम्बरधरा क्षया॥१२०॥

क्षितिः क्षीरप्रिया लक्ष्मीः क्षितिभृत्तनया क्षुधा।
क्षत्रियी ब्राह्मणी क्षेत्रा क्षपा क्षःबीजमण्डिता॥१२१॥

ळंक्षः बीजस्वरूपा च क्षकाराक्षरमातृका।
दुर्गन्धनाशिनी दूर्वा दुर्गमा दुर्गवासिनी॥१२२॥

दुर्गा दुर्गार्तिशमनी ओं ह्रीं दुं बीजमण्डिता (१०००)।
इति नामसहस्रं तु मन्त्रगर्भं महाफलम्॥१२३॥

(e) Phala-stuti

(Benefits accuring from reciting the text or wearing the written text as an amulet on the arms are enumerated here. Even listening to text being recited has its benefits)

दुर्गाया दुर्गतिहरं सर्वदेवनमस्कृतम्।
सर्वमन्त्रमयं दिव्यं देवदानवपूजितम्॥१२४॥

श्रेयस्करं महापुण्यं महापातकनाशनम्।
यः पठेत् पाठयेद्वापि श्रृणेति श्रावयेदपि॥१२५॥

स महापातकैर्मुक्तो देवदानवसेवितः।
इह लोके श्रियं भुक्त्वा परत्र त्रिदिवं व्रजेत्॥१२६॥

The vīra-sādhaka must recite the text at midnight ; others may recite it three times (morning, noon and evening). The benefit is invincibility.

दुर्गानामसहस्रं तु मूलमन्त्रैकसाधनम्।
अर्धरात्रे पठेद्वीरो मधुरस्मयसेवितः॥१२७॥

त्रिवारं वर्मपूर्वं तु भवेद्वागीशसंनिभः।
यः पठेद् देवि मध्याह्ने स्त्रीयुतो मुक्तकुन्तलः॥१२८॥

तस्य वैरिकुलं त्रस्येद् दर्शनाद् दैत्यसूदिनि।
दहनादिव देवेशि पतङ्गकुलमद्रिजे॥१२९॥

Reciting the text in the evening sitting under the vetasi-tree one will become learned, eloquent and brilliant.

यः पठेद्वेतसीमूले सायं पूजितभैरवः।
तस्यास्यकुहराद् वाणी निःसरेद्गद्यपद्यभाक्॥१३०॥

यः पठेत् सततं देवि शयने स्त्रीरताकुलः।
स भवेद्वैरिविध्वंसी धनेन धनदोपमः॥१३१॥

वाग्भिर्वागीशसदृशः कवित्वेन सितोपमः।
तेजसा सूर्यसङ्काशो यशसा शशिसन्निभः॥१३२॥

बलेन वायुतुल्योऽपि लक्ष्म्या गीर्वाणनायकः।
देवि किं बहुनोक्तेन स भवेद्भैरवोपमः॥१३३॥

The text must be written in the night on the bhūrja-leaves with ashṭa-gandha mixed with breast-milk. The leaves are then rolled and tied with white thread and covered by lac. This must be inserted in a gold or silver amulet (guṭika), and tied with yellow thread. This must be worn on the head or on the arms.

The benefits include procurement of magical powers like stambhana, ākarshaṇa, ucchhāṭana and vaśīkaraṇa.

स्तम्भनाकर्षणोच्चाटवशीकरणक्षमः।
रवौ भूर्जे लिखेद् देवि निशीथे
वाष्टगन्धकैः॥१३४॥



सस्तन्यरेतोराजस्कैः साधको मन्त्रसाधकः।
लिखित्वा वेष्टयेन्नामसहस्रमणिमीश्वरि॥१३५॥

श्वेतसूत्रेणा संवेष्ट्य लाक्षया परिवेष्टयेत्।
सुवर्णरजताद्यैश्च वेष्टयेत् पीतसूत्रकैः॥१३६॥

संपूज्य गुटिकां देवि शुभेऽह्नि साधकोत्तमः।
धारयेन्मूर्ध्नि वा बाहौ गुटिकां कामदायिनीम्॥१३७॥

रणे रिपून् विचित्याशु कल्याणी गृहमाविशेत्।
वन्ध्या वामभुजे धृत्वा कृत्वा साधकपूजनम्॥१३८॥

पुत्रान् लभेन्महादेवि साक्षाद्वैश्रवणोपमान्।
गुटिकैषा महादिव्या गोप्या कामफलप्रदा॥१३९॥

साधकैः सततं पूज्या साक्षाद् दुर्गास्वरूपिणी।
योऽर्चयेत् साधको दुर्गागुटिकां धारयेत्
प्रिये॥१४०॥

(The Sahasranāma must be recited after the recital of the kavacha)

पठेद्वर्म शिवे मन्त्रनामसाहस्त्रिकीं पराम्।
अङ्गस्तोत्रं फलं तस्य देवि वक्ष्येऽधुना श्रृणु॥१४१॥

वने राजकुले वापि दुर्भिक्षे शत्रुसङ्कटे।
अरण्ये प्रान्तरे दुर्गे श्मशाने सिन्धुसङ्कटे॥१४२॥

वात्ये यक्षपिशाचादिभूतप्रेतभये तथा।
वीरो विगतभीर्देवि सर्वत्र विजयी भवेत्॥१४३॥

स्तम्भयेद्वातसूर्याम्बुचन्द्रादीन् साधकोत्तमः।
मोहयेत् त्रिजगत् सद्यः कान्ताश्चाकर्षयेद्
ध्रुवम्॥१४४॥

मारयेदखिलाच्छत्रूनुच्चाटयति वैरिणः।
वशयेद् देवताः सद्यः किं
पुनर्मानवाश्छिवे॥१४५॥

शमयेदखिलान् रोगान् महोत्पातानुपद्रवान्।
किं किं न लभते वीरो दुर्गापञ्चाङ्गपूजनात्॥१४६॥

This completes the Durgā-pañchānga or the Pentad relating to the goddess Durgā.

इदं रहस्यं दुर्गाया अष्टाक्षर्या महेश्वरि।
सर्वस्वं सारतत्त्वं च मूलविद्यामयं परम्॥१४७॥

महाचीनक्रमस्थानां साधकानां यशस्करम्।
पठेत् संपूजयेद् देव्या मन्त्रनामसहस्रकम्॥१४८॥

इदं सारं हि तन्त्राणां तत्त्वानां तत्त्वमुत्तमम्।
दुर्गानामसहस्रं तु तव भक्त्या प्रकाशितम्।।१४९।।

अभक्ताय न दातव्यं गोप्तव्यं पशुसङ्कटे।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा नरकमाप्नुयात्।।१५०।।

दीक्षिताय कुलीनाय गुरुभक्तिरताय च।
शान्ताय भक्तियुक्ताय देयं नामसहस्रकम्।।१५१।।

VI

After the Durgā-pañchānga, some laudatory hymns are recited. called Stotra-pāṭha, this sequence is optional, and the choice among the hymns is also wide. What is given here is described as Durgā-stotra-rāja, the authorship of which is credited to Maheśvara, viz. Śiva himself. This is said to be the crest-jewel of Durgā-pañchānga (śiro-maṇi).

अधुना देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम्।
मूलमन्त्रमयं दिव्यं सर्वसारस्वतप्रदम्।।१।।

दुःखार्तिशमनं पुण्यं साधकानां जयप्रदम्।
दुर्गाया अङ्गभूतं तु स्तोत्रराजं परात्परम्।।२।।

श्रीदुर्गास्तोत्रराजस्य ऋषिर्देवो महेश्वरः।
छन्दोऽनुष्टुब् देवता च श्रीदुर्गाष्टाक्षरा शिवे।।३।।

दुं बीजं च परा शाक्तिर्विश्वं कीलकमद्रिजे।
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः।।४।।

Mahisha-mardinī (Rāvaḷphaḍi cave, Aihoḷe Karnātaka)

अस्य श्रीदुर्गास्तोत्रराजस्य, श्रीमहेश्वर ऋषिः अनुष्टुप् छन्दः श्रीदुर्गाष्टाक्षरा देवता, दुं बीजं, ह्रीं शक्तिः, नमः कीलकम् धर्मार्थकाममोक्षार्थे पाठे विनियोगः ॥

ध्यानम्॥

(b) Dhyāna

दुर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्ग शरखेटकशूलचापान्।
सन्तर्जनीं च दधतीं महिषासनस्थां दुर्गां
नवारकुलपीठगतां भजेऽहम्॥५॥

It may be noted that although the meter (chhandas) is given as anushṭup in the above formation, the meters of the stotra stanzas are different and various.

(c) The stotra-text

तारं हारं मन्त्रमालासु बीजं ध्यायेदन्तर्योऽम्ब
लम्बालकान्तः।
तस्य स्मारं स्मारमंघ्रिद्वयीं द्राग् रम्भायाति
स्वर्गता कामवश्या॥१॥

मायां जपेद्यस्तव मन्त्रमध्ये दुर्गे सदा
दुर्गतिखेदखिन्नः।
भवेत् स भूमौ नृपमौलिमालामाणिक्य
निर्घृष्टपदारविन्दः॥२॥

चाक्रिकं यदि जपेत्तवाम्बिके
चक्रमध्यगत ईश्वरेश्वरी।
साधको भवति चक्रवर्तीनां नायको नयविला
सकोविदः॥३॥

चक्रिबीजमपरं स्मरेच्छिवे
योऽरिवर्गविहिताहितव्यथः।
आजिमण्डलगतो जयेद्रिपून्
वाजिवारणरथाश्रितो नरः॥४॥

दूर्वाबीजं यो जपेत् प्रेतभूमौ सायं मायाभस्मना
लिप्तकायः।
गीर्वाणानां नायको देवि मन्त्री भूत्वा राज्यं
प्राज्यमाढ्यं करोति॥५॥

वायव्यबीजं यदि साधको जपेत्
प्रियाकुचद्वन्द्वविमर्दनक्षमः।
समस्तकान्ताजननेत्रवागुरा विलासहंसो भविता स
पार्वति॥६॥

विश्वं विश्वेश्वरि यदि जपेत् कामकेलीकलान्ते
रात्रौ मात्राक्षरविलसितन्यास ईशानिवासः।
तस्य स्मेराननसरसिजाभ्राजमनाङ्गलक्ष्मी -
र्वश्यावश्यं सुरपुरवधूमौलिमालावशी सा॥७॥

भूगेहाञ्चितवह्निवृत्तविलसन्नागारवृत्ताञ्चित -
द्व्यग्न्यारोल्लसिताग्निकोणविलसच्छ्रीबिन्दुपीठस्थिताम्।
ध्यायेच्चेतसि शर्वपत्नी भवती माध्वीरसाघूर्णितां
यो मन्त्री स भविष्यति स्मरसमः स्त्रीणां धरण्यां
दिवि॥८॥

(d) Phala-stuti

दुर्गास्तवं मनुमयं मनुराजमौलि -
माणिक्यमुत्तमशिवाङ्गरहस्यभूतम्।
प्रातः पठेद्यदि जपावसरेऽर्चनायां
भूमौ भवेत् स नृपतिर्दिवि देवनाथः॥१॥

इति स्तोत्रं महापुण्यं पञ्चाङ्गैकशिरोमणिम्।
यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम्॥२॥

इदं पञ्चाङ्गमखिलं श्रीदुर्गाया रहस्यकम्।
सर्वसिद्धिप्रदं गुह्यं सर्वाशापरिपूरकम्॥३॥

गुह्यं मन्त्ररहस्यं तु तव भक्त्या प्रकाशितम्।
अभक्तायाप्रदातव्यमित्याज्ञा पारमेश्वरी॥४॥

श्रीदेव्युवाच।
भगवन् भवतानेन कथनेन महेश्वर।
श्रीपञ्चाङ्गस्य दुर्गाया ह्यद्य क्रीतास्म्यहं परम्॥१॥

श्रीभैरव उवाच।
इदं रहस्यं परमं दुर्गासर्वस्वमुत्तमम्।
पञ्चाङ्गं वर्णितं गोप्यं गोपनीयं स्वयोनिवत्॥१॥

VII

DURGĀ-RAHASYA-TANTRA

Before concluding the pañchānga-worship, it is customary to recite the tantra section known as Durgā-rahasya, a part of *Rudra-yāmala* where the principle of the mother-goddess is explained. This is in the form of a dialogue between Pārvati and her consort Bhairava.

(a) Introduction

अथ दुर्गारहस्यम्।।

श्रीशैलराजशिखरे नानाद्रुमसमाकुले।
वसन्तलक्ष्मीनिलये समासीनमुमापतिम्।।१।।

एकदा देवमीशानं शशिशेखरमीश्वरम्।
उमाश्रितार्धवपुषं देवदानवसेवितम्।।२।।

ध्यानासक्ताक्षित्रितयं जटाजूटलतारुणम्।
भस्माङ्गरागधवलं नारायणनमस्कृतम्।।३।।

ब्रह्मादिदेवप्रणतं गान्धर्वजनवन्दितम्।
यक्षराक्षसनागेन्द्रनगेन्द्रकुलपूजितम्।।४।।

भैरवं भैरवाकारं गिरीशं परमेश्वरम्।
उत्थाय विनता भूत्वा पर्यपृच्छत पार्वती।।५।।

(b) Pārvatī asks :

भगवन् सर्वलोकेश सर्वलोकनमस्कृत।
गुणातीत गुणाध्यक्ष भूतेश्वर महेश्वर।।६।।

सृजत्यवति नित्यान्ते संहरत्यमितं जगत्।
चराचरं भवानेव किं पुनर्जपसि प्रभो।।७।।

किं ध्यायसि महादेव सततं भक्तवत्सल।
वद शीघ्रं दयाम्भोधे यद्यहं प्रेयसी तव।।८।।

(c) Bhairava answers :

श्रीभैरव उवाच।
देवि किं ते प्रवक्ष्यामि रहस्यमिदमद्भुतम्।
सर्वस्वं सारभूतं मे सर्वेषां तत्त्वमुत्तमम्।।९।।

लक्षवारसहस्राणि वारितासि पुनः पुनः।
स्त्रिस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि।।१०।।

अद्य भक्त्या तव स्नेहाद्वक्ष्यामि परमाद्भुतम्।
देवीरहस्यतन्त्राख्यं तन्त्रराजं महेश्वरि॥११॥

सर्वागमैकमुकुटं सर्वसारमयं ध्रुवम्।
सर्वमन्त्रमयं दिव्यं पटलैर्दशभिर्युतम्॥१२॥

अनुक्रमणिकां दिव्यां श्रृणु तन्त्रस्य पार्वति।
यस्याः श्रवणमात्रेणा कोटिपूजाफलं लभेत्॥१३॥

श्रीविद्यानिर्णयो देवि मन्त्रसाधनकोऽपरः।
शिवमन्त्रप्रकाशाख्यो दीक्षाविधिरनुत्तमः॥१४॥

पुरश्चर्याविधिर्देवि पञ्चरत्नेश्वरीक्रमः।
होमसाधनकश्चैव चक्रपूजाविधिः परः॥१५॥

आचारनिर्णयो देवि दशमो दशमीविधिः।
तत्रादौ देवि वक्ष्येऽहं दुर्गाभुवनमद्भुतम्॥१६॥

(d) Description of Durgā-bhuvana :

जयं नाम महादिव्यं बहुविस्तारविस्तृतम्।
नानारत्नसमाकीर्णा सूर्यकोटिसमप्रभम्॥१७॥

इन्द्रगोपकवर्णं च चन्द्रकोटिमनोहरम्।
अप्रमेयमसंख्येयमगम्यं सर्ववादिनाम्॥१८॥

इदं दिव्यं जयं नाम भुवनं परमेश्वरि।
तत्रैव वसते दुर्गा नवरूपात्मिका परा॥१९॥

या देवदेवी वरदा सर्वलोकैकसुन्दरी।
या दुर्गेति स्मृता लोके ब्रह्माण्डोदरवर्तिनी॥२०॥

(e) Appearance of Durgā as Vidyā :

विष्णुना तपसा पूर्वमाराध्य परमेश्वरीम्।
महिषस्यासुरेन्द्रस्य वधार्थायावतारिता॥२१॥

योगमाया महामाया सर्वदा परमेश्वरी।
तामेवाहर्निशं ध्याये श्रीविद्यां परमां जपे॥२२॥

तामद्याहं प्रवक्ष्यामि विद्याचरणदायिनीम्।
यां श्रुत्वा स शिवो जातः पञ्चनादात्मकः
शिवोयदाभूद्धरिहीना सा दुर्गा निष्कलरूपिणी।
साक्षाद्भुवनरूपापि महाज्योतिःस्वरूपिणी॥२४॥

(f) Primordial light and sound

तदा शफककाले तु ज्योतीरूपो महेश्वरि।
शिवः प्रभामण्डलतो निर्गतोऽचेतनो विभुः॥२५॥

अश्रृणोन्नादमाधारं जगतां बीजमुत्तमम्।
अपि संस्मर मायां त्वं सृष्टोऽग्रमनुनायकः॥२६॥

इति श्रुत्वा परानादं तारमित्यभिधीयते।
शिवो जजाप सहसा बीजं त्रिजगतां शिवे॥२७॥

तेन मायेतिशब्दं स शुश्राव गगनात्ततः।
दामं भज महेशान सदानन्दालयं परम्॥२८॥

बिन्दुनादमयो देवः शिवोऽभूत् परमेश्वरः।
ततो नादं स शुश्राव दुष्टवर्णविवर्जितम्॥२९॥

(g) Śiva creates :

दुर्गा भजेति स शिवः पञ्चनादात्मकोऽभवत्।
ततो जप्त्वा परां विद्यामसृजज्जगदम्बिके॥३०॥

आदौ वायुं शिवः सृष्ट्वा ततः सृष्टिर्यथेच्छया।
इच्छामात्रं शिवे विश्वं विश्वेश्वरि चराचरम्॥३१॥

(h) The Secret lore :

ससर्ज लवमात्रं स सितिसण्ठः शिवः शिवे।
इतीमां गुप्तविद्यां तु लब्ध्वा गुरुपदार्चनात्॥३२॥

किं किं न साधयेल्लोके साधको मन्त्रसाधकः।
वस्त्रं वह्निं च कामं च धनं वृत्तं च साधकः॥३३॥

वशीकुर्याद्यथाबुद्ध्या येन तुर्याकुलं भवेत्।
श्रीचक्रमिदमाधारं देव्या विभवकारणम्॥३४॥

गुह्यं सर्वस्वमम्बायाः पूज्यं साधकसत्तमैः।
चक्रं लिखेन्महादेवि पूज्यमब्जार्कयोर्दलैः॥३५॥

येन देवी महामाया श्रीदुर्गाऽशु प्रसीदति।
चक्रे संपूजयेद्यस्तु नीलाभां दाहनीं द्युतिम्॥३६॥

(i) Phala-stuti

वह्नीन्दुसूर्याम्बरजं मण्डलाकारमर्चयेत्।
लसन्मुकुटरोचिष्णुः स भवेत् साधकोत्तमः॥३७॥

तस्य शङ्खनिभा कीर्तिर्भ्रमते भुवनत्रये।
ससुरासुरगन्धर्व वशं याति महेश्वरि॥३८॥

मारासनरसानन्दमयो भूत्वा जपेन्मनुम्।
खेटकास्तस्य तुष्यन्ति साधकस्याङ्गपूजनात्॥३९॥

तस्य रोगा विनश्यन्ति सर्वे शूलादयोऽचिरात्।
तर्जनीं तस्य वाक्ष्यापि रिपवो यान्ति विद्रुताः॥४०॥

तस्य गेहे धनं गावो महिष्या विष्टरं गजाः।
दुर्गा रत्नवती भूमिस्तस्य पीठं मनोहरम्॥४१॥

साधकस्य भवेदेवं संपत्तिर्बहुधार्चनात्।
एवं ध्यायेन्महादेवीं दुर्गां दुर्गतिनाशिनीम्॥४२॥

भविष्यति हि साधकः।
इतीदं देवि तत्त्वं ते कथितं परमाद्भुतम्।
अवक्तव्यमदातव्यं गोपनीयं स्वयोनिवत्॥४३॥

MANTRA-SĀDHANA

This is a sequel to *Durgā-rahasya-tantra* given above, and it deals with the mantra-siddhi along with the Kīlaka and sañjīvana. This section also explains the `tattva' (reality or essence) of Durgā, according to Kulāchāra

मन्त्रसाधनकं वक्ष्ये रहस्यं सर्वमन्त्रिणाम्।
येन साधनमात्रेणा मन्त्रः सिद्धिमुपैष्यति॥१॥

विनोत्कीलनमत्रेणा न मन्त्रः सिद्धिदायकः।
विना सञ्जीवनेनापि संपुटेन विना शिवे॥२॥

विश्वमादौ मनोर्दद्यात् तारं दद्यात् तथाञ्जले।
मनुरुत्कीलनाख्योऽयं सर्वसिद्धिप्रदः शिवे॥३॥

चाक्रिकं नाम बीजं तु दद्यादादौ मनोः शिवे।
तदग्रे नाम विन्यास तारमाये तदग्रतः॥४॥

मनोरन्तेऽश्मरीं दद्यान्मनुः सञ्जीवनाभिधः।
ततः सिद्धमनुं देवि जपेन्मान्त्रिकसत्तमः॥५॥

यथाशक्त्या ततो दद्यात् संपुटं साधकोत्तमः।
तारं परां चक्रिबीजं विश्वमन्तेऽभिधं न्यसेत्॥६॥

संपुटांख्योऽयं मन्त्रः सर्वाशापूरकः स्मृतः।
एवं संस्कृतमीशानि मनुं देव्या जपेत् सदा॥७॥

सर्वसिद्धिमवाप्नोति साधको मन्त्रसाधकः।
इतीदं मन्त्रतत्त्वं ते साधनाख्यं महेश्वरि।
गुह्यातिगुह्यगुप्तं च गोप्तव्यं साधकोत्तमैः॥८॥

श्रीभैरव उवाच।
अधुना देवि वक्ष्यामि दुर्गायास्तत्त्वमुत्तमम्।
आचाराणां विधिं येन कलौ दुर्गा प्रसीदति॥१॥

द्वौ मार्गौ चागमे स्यातां वामाचारस्तु दक्षिणः।
तयोस्तत्वं कुलाचारः श्रृणु तेषां विधिं शिवे॥२॥

साधको दीक्षितो भूत्वा केन सिद्धिमवाप्नुयात्।
तद्वदामि तव स्नेहान्नाचाख्येयं दुरात्मने॥३॥

The three paths :
(a) Dakshiṇāchāra

त्रीणि बीजानि दुर्गायास्तदाचारास्त्रयः स्मृताः।
प्रथमो दक्षिणाचारो वामाचारो द्वितीयकः॥४॥

तृतीयस्तु कुलाचारो विधिं तेषां श्रुणु प्रिये।
प्रभाते स्नानसन्ध्यादि मध्याह्ने जपमीश्वरि॥५॥

और्णामासनमाख्यातं भक्ष्यं पायसशर्कराः।
माला रुद्राक्षसंभूता पात्रं पाषाणसंभवम्॥६॥

भोगः स्वकीयकान्ताभिर्दक्षिणाचार इत्ययम्।
द्रव्येण मधुना देवि सिद्धिहानिकरो मतः॥७॥

(b) Vāmāchāra :

वामाचारं प्रवक्ष्यामि श्रीदुर्गासाधनं परम्।
यं विधाय कलौ शीघ्रं मान्त्रिकः
सिद्धिभाग्भवेत्॥८॥

माला नृदन्तसंभूता पात्रं पाषाणमुण्डकम्।
आसनं सिंहचर्मादि कङ्कणं स्त्रीकचोद्भवम्॥९॥

द्रव्यमासवतत्त्वाढ्यं भक्ष्यं मांसादिकं शिवे।
चर्वणं वालमत्स्यादि मुद्रा वीणारवः कथा॥१०॥

मैथुनं वरकान्ताभिः सर्ववर्णसमानतः।
वामाचार इति प्रोक्तः सर्वसिद्धिप्रदः शिवे॥११॥

अन्यथा सिद्धिहानिः स्यान्मन्त्रस्यास्य महेश्वरि।
तस्माद्वामं भजोन्नित्यं वाम एव परा गतिः॥१२॥

दक्षिणं च कुलं चैव वीरैः साधकसत्तमैः।
त्याज्यं दूरात् कलौ देवि वाममेव भजेत्
कलौ॥१३॥

(c) Kulāchāra :

कुलाचारं प्रवक्ष्यामि सेव्यं योगिभिरुत्तमैः।
कुलास्त्रियं कुलगुरुं कुलदेवीं महेश्वरि॥१४॥

नित्यं यत् पूजयेदित्थं स कुलाचार उच्यते।
कुलास्त्रियं शिवे ज्ञात्वा नुत्वा नुत्वा महेश्वरी॥१५॥

हठादानीय संपूज्य तथा भोगं विधाय च।
रेतसा तर्पयेद् देवीं श्रीदुर्गां चक्रनायिकाम्॥१६॥

नीलकण्ठं च विधिना जपं कुर्याद्विशेषतः।
तत्पूर्वकं चरेध्दामं कुलकान्तां विभूषयेत्॥१७॥

पानैः पेयैस्तथा भक्ष्यैः सन्तर्प्य कुलयोषितम्।
प्रत्यहं वै चरेदेवं कुलाचार इति स्मृतः॥१८॥

इत्याचारपरः श्रीमान् कुलस्त्रीगुरुपूजकः।
वामाचारपरो मन्त्री मुक्तिभाग् भविता ध्रुवम्॥१९॥

इत्येष पटलो गुह्यो देव्याश्चाचारवल्लभः।
अदातव्योऽप्यभक्तेभ्यो न प्रकाश्यो मुमुक्षुभिः॥२०॥

Daśamī-pūjā

श्रीभैरव उवाच।
अधुना कथयिष्यामि श्रीदुर्गाया रहस्यकम्।
तत्त्वं मन्त्रस्य देवेशि दशमीपूजनं परम्॥१॥

दीक्षागुरुः शिवे यस्तु दशमी स प्रकीर्तितः।
पूजनं तस्य वक्ष्यामि सर्वतन्त्रेषु गोपितम्॥२॥

दीक्षां गृहीत्वा विधिवद् गुरोः कुलविचक्षणात्।
तदाज्ञां शिरसाऽदाय साधयेत् स्वमनुं ततः॥३॥

एकदा पुण्यदिवसे मुहूर्ते शुभदे तथा।
गुरुमानीय देवेशि शून्यगेहे चतुष्पथे॥४॥

श्मशाने वा वने वापि स्वगृहे वापि पार्वति।
तत्र भूमौ लिखेद्यन्त्रं यथावद् वर्ण्यते मया॥५॥

Guru-yantra : lineage

बिन्दुत्रिकोणं वसुकोणबिम्बं
वृत्ताष्टपत्रं शिखिवृत्तयुक्तम्।
धरागृहं वह्नितुटीभिरीढ्यं
यन्त्रं गुरेर्देवि मया प्रदिष्टम्॥६॥

सिन्दूरेण विलिख्यातः पूजयेच्चक्रमीश्वरि।
गणेशधर्मवरुणाः कुबेरसहिताः शिवे॥७॥

पूज्या द्वाःस्थाः सुपुष्पैश्च गन्धाक्षतपुरःसरैः।
असिताङ्गो रुरुश्चण्डो क्रोधेशोन्मत्तभैरवौ॥८॥

कपाली भीषणो देवि संहारोऽर्च्योऽष्टपत्रके।
परमानन्दनाथं च प्रकाशानन्दनाथकम्॥९॥

श्रीभोगानन्दनाथं च समयानन्दनाथकम्।
भुवनानन्दनाथं च सुमनानन्दनाथकम्॥१०॥

गगनानन्दनाथं च श्रीविश्वानन्दनाथकम्।
अष्टौ कुलगुरून् देवि पूजयेद् वसुपत्रके॥११॥

मदनानन्दनाथं च श्रीलीलानन्दनाथकम्।
महेश्वरानन्दनाथं पूजयेद्वै त्रिकोणके॥१२॥

बिन्दौ गुरुं च संपूज्य गन्धाक्षतप्रसूनकैः।
तत्र बिन्दौ गुरुं देवि स्थापयेद् भक्तिपूर्वकम्।।१३।।

संपूजयेत् स्वमूलेन दक्षिणां कालिकां यजेत्।
महाकालं यजेत् तत्र कामं कामेश्वरीं तथा।।१४।।

गुरुं च परमं देवि परापरगुरुं तथा।
परमेष्ठिगुरुं चैव स्वगुरोर्मूर्ध्नि पूजयेत्।।१५।।

संपूज्य विविधैः पुष्पैर्माल्यैराभरणोत्तमैः।
दक्षिणाभिर्महेशानि भक्ष्यैर्भोज्यैश्च लेह्यकैः।।१६।।

चोष्यैः पेयैश्च खाद्यैश्च बलिं दत्त्वा च तर्पयेत्।
आनन्दरससंपूर्णा गुरुं दृष्ट्वा महेश्वरि।।१७।।

ततो देवि गुरुं नत्वा प्रार्थयेत् स्वमनोरथम्।
य एवं पूजयेद् देवि स्वगुरुं पुण्यवासरे।।१८।।

EULOGY OF GURU

स एव भैरवः साक्षाद्विचरेद् भुवनत्रये।
गुरुरेव परो मन्त्रो गुरुरेव परो जपः।।१९।।

गुरुरेव परा विद्या नास्ति किञ्चिद्गुरुं विना।
यस्य तुष्टो गुरुर्देवि तस्य तुष्टा महेश्वरी।।२०।।

येन संतोषितो देवि गुरुः स हि सदाशिवः।
यन्न दृष्ट्वापि वै ब्रूयाद्गुरुस्तन्न समाचरेत्।।२१।।

पुण्यं वाऽपुण्यमीशानि त्याज्यं ग्राह्यं कुलार्चिते।
गुरुर्वदति यत् सद्यस्तत् कुर्यात् साधकोत्तमः।।२२।।

विना गुरूपदेशेन न सिद्ध्यति कलौ मनुः।
तस्माद् गुरुं भजेद् भक्त्या तोषयेत् सततं गुरुम्॥२३॥

गुरोर्यत्र परीवादो निन्दा यत्र प्रवर्तते।
कर्णौ तत्र पिधातव्यौ नो वा दूरं पलायनम्॥२४॥

गुरुर्देवि परो धर्मो गुरुरेव परा गतिः।
गुरुमभ्यर्चयेन्नित्यं येन देवी प्रसीदति॥२५॥

CONCLUSION

इतीदं दशमीतत्त्वं सर्वागमरसह्यकम्।
सारात्सारतरं देवि गोपनीयं मुमुक्षुभिः॥२६॥

इतीदं परमं तत्त्वं तत्त्वं सर्वस्वमुत्तमम्।
दुर्गारहस्यसाराढ्यं गुह्यं गोप्यं च साधकैः॥२७॥

इति देवीरहस्याख्यस्तन्त्रोऽयं तन्त्रसागरः।
सर्वस्य मे रहस्यं मे सर्वागमनिधिः परः॥२८॥

श्रीदुर्गायास्तत्त्वभूतो मन्त्रराजमयो ध्रुवः।
सिद्धिप्रदो महादेवि पूजनीयोऽस्ति साधकैः॥२९॥

श्रीदेव्युवाच।
भगवन् भवता भक्त्या प्रसादोऽयं मयि कृतः।
यत्त्वया वर्णितस्तन्त्रः श्रीदुर्गायाः कुलेश्वर॥३०॥

क्रीतास्मि तव दास्यस्मि भक्तास्मि त्रिपुरान्तक।
सर्वथा रक्षणीयास्मि किमन्यत् कथयामि ते॥३१॥

इदं देवीरहस्याख्यं तन्त्रराजं महेश्वरि।
अदातव्यामभक्तेभ्यो दुरात्मभ्यो महेश्वरि॥३२॥

स्वपुत्रेभ्योऽन्यशिष्येभ्यो न देयं तु मुमुक्षुभिः।
इदं हि सारं तन्त्राणां तत्त्वं सर्वस्वमुत्तमम्॥३३॥

The ritual ends by contemplation of the goddess (dhyāna) and the extraction of the yantra and mantra (hrīm dum durgāyaī namah)

अथ दुर्गाध्यानम्॥

सिंहस्कन्धसमारूढां नानालङ्कारभूषिताम्।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम्।

रक्तवस्त्रपरीधानां बालार्क्कसदृशीतनुम्।
नारदाद्यैर्म्मुनिगणैः सेविताम्भवगेहिनीम्।।

त्रिवलीवलयोपेतनाभिनालसुवेशिनीम्।
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते।
प्रफुल्लकमलारूढा ध्यायेत्ताम्भवगेहिनीम्।।

अथ यन्त्रोद्धारः।।
दुर्गायन्त्रंप्रवक्ष्यामि श्रृणुष्व हरवल्लभे।
त्रिकोणं विन्यसेत्पूर्वं नवकोणसमन्वितम्।।

त्रैबिम्बसहितं सर्व्वमष्टपत्रसमन्वितम्।
त्रिरेखासहितं वज्रं भूपुरद्वयसँय्युतम्।।

समीकृत्य यथोक्तेन विलिखेद्विधिनामुना।
नानास्त्रसँय्युतँ लेख्यं चक्रमन्त्रविभूषितम्।
तत्र तां पूजयेद्देवीं मूलप्रकृतिरूपिणीम्।।

अथ दुर्ग्गामनुँ वक्ष्ये दृष्टादृष्टफलप्रदम्।
मायादिः कर्ण्णविद्धाढ्यो भूयोसौ सर्गवान्भवेत्।
चान्तकश्च प्रतिष्ठावान्मारुतो भौतिकासनः।
तारादिहृदयान्तोयं मन्त्रो वस्वक्षरात्मकः।।

II

दुर्गापूजाविधिः

(from Kulārṇava-tantra)

(1) Now begins the ritualistic worship (pūjā) of Durgā. The text presupposes that the devotee has finished his bath and gone through the customary morning rituals proper to his varṇa and āśrama. The prescriptions given here beign with the placement (nyāsa) of the pedestal divinities (pīṭha-śaktis) in accordance with the seed-syllables of the vowel-group of the alphabet followed by the worship of the pedestal (Pīṭha-pūjā), the great throne in the form of a lion.

प्रातः कृत्यादि पीठन्यासान्तँ विधाय केसरेषु मध्ये च पीठशक्तीर्व्विन्यसेत्।। तद्यथा।। आं प्रभायै नमः। ईं मायायै नमः। ऊं जयायै नमः। ॠँ सूक्ष्मायै नमः। लृँ विशुद्धायै नमः। ऐ नन्दिन्यै नमः।। औं सुप्रभायै नमः। अं विजयायै नमः। अः सर्वसिद्धिदायै नमः।।

वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूं फट् नम ।। इति पूजयेत्।।

(2) Then the placement is done with respect to the seer (ṛshi), who is the sage Nārada on the head, the metre (chhandas, Gāyatri) in the mouth; and the deity (devatā, Durgā) in the heart.

ततः ऋष्यादिन्यासः।।

शिरसि नारदऋषये नमः।। मुखे गायत्री छन्दसे नमः।। हृदि दुर्गादेवतायै नमः।।

(3) Then follows the placement on the fingers and the organs (shaḍanga-nyāsa).

ततः कराङ्गन्यासौ।।

हां ह्रीं दुर्गायै अङ्गुष्टाभ्यां नमः।।
ह्रीं ह्रीं दं दुर्गायै तर्ज्जनीभ्यां स्वाहा ।।
हूं ह्रीं दुं दु र्गायै मध्यमाभ्याँ वषट्।।
हैं ह्रीं दुं दुर्गायै अनामिकाभ्यां हूम्।।
हौं ह्रीं दु ं दुर्गायै कनिष्ठिकाभ्याँ वौषट्।।
हूः ह्रीं दुं दुर्गायै करतलकरपृष्ठाभ्यां फट्।।

एवं हृदयादि।।

ह्रां ह्रीं दुं दुर्गायै हृदयाय नमः।।
ह्रीं ह्रीं दुं दुर्गायै शिरसे स्वाहा।।
हूं ह्रीं दुं दुर्गायै कवचाय हूम्।।
हः ह्रीं दुं दुर्गायै नेत्रत्रयाय वौषट्।।
हाँ ह्रीं दुं दुर्गायै कवचाय हुम् ।।
हः ह्रीं दुं दुर्गायै अस्त्राय फडिति
षडङ्गादिन्यासः।।

तथा च निबन्धे।।

नमस्कारनियुक्तेन मूलमन्त्रेण देशिकः।।
ह्रींमाद्यैः सह कुर्वीत षडङ्गानि यथाविधि।।

(4) Some verses which are descriptive of the deity are recited for purposes of contemplation (dhyāna).

अथ ध्यानम्।।

सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भि ब्भुजैः।। शङ्खंश्चक्रधनुः शरांश्च दधती नेत्रस्त्रिभिशशोभिता।। आमुक्ताङ्गदहारकङ्कणरणत्का ञ्चीकणन्नूपुरा।। दुर्गा दर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला।।

(5) This is followed by the ritualistic acceptance of the conch for purposes of worship (śamkha-sthāpānā) and the worship of the pedestal (pīṭha-pūjā).

एवं ध्यात्वा मानसैः शङ्खस्थापनं कुर्य्यात्।।

तत पीठपूजां कुर्य्यात्।। केसरेषु मध्ये च आं प्रभायै नमः, ईं मायायै नमः, उं जयायै नमः।। ॠं सूक्ष्मायै नमः, लृं विशुद्धायै नमः, ऐ नन्दिन्यै नमः।। औं सुप्रभायै नमः।। अं विजयायै नमः।। अः सर्व्वसिद्धिदायैनमः।।

तदुपरि वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूम्फट्नमः।

दद्यादासनमेतेन मूर्तिमूलेन कल्पयेत्॥

(6) Then the worship of the sacred enclosures begins (āvaraṇa-pūjā)

ततः पुनर्ध्यात्वा ऽऽवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तँ विधायावरणपूजामारभेत्॥ अग्निनैऋतिवाय्वीशानकोणमध्ये दिक्षु च॥

हां ह्रीं दुं दुर्गायै हृदयाय नमः॥ इत्यादिना पूजयेत्॥ तत पत्रेषु पूर्वादि॥ जं जयायै विं विजयायै, किं कीर्त्यै, पं प्रीत्यैनमः, पं प्रभायै, शुं शुद्धायै, मं मेधायै, शं श्रुत्यै ॥

पत्राग्रेषु॥

लं खड्गाय नमः, वं खेटकाय नमः, शं बाणाय नमः, षं धनुषे नमः, सं शूलाय, ह ंतर्ज्जन्यै तद्बहिरिन्द्रादिवज्रादीश्च पूजयेत्॥

(7) Following this is the offering of bali.

ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्॥

अस्याः बलिमन्त्रस्तु।

एहि एहि पदद्वन्द्वं मदीयञ्च बलिं देवि लुलायकपदद्वयं साधय । द्वितीयंब्रूयात्खादय द्वितीयं पुनः॥ सर्व्वसिद्धिपदं देवी ततः स्वाहापदं भवेत्॥ बलिदानस्य मन्त्रोऽयं मन्त्रिण्या परिकीर्त्तितः॥

अस्य पुरश्चरणमष्टलक्षः॥

(अष्टसहस्रतिलैर्होमः॥)

(तथा च ॥ वसुलक्षं जपेन्मन्त्रं तत्सहस्रतिलैः सह इत्यादि वचनात्॥)

(8) Eulogy (stotra) is now offered.

अथ स्तोत्रम्॥

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वां न ध्यानं तदपि च न जाने स्तुतिकथाः॥

न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुशरणं क्लेशहरणम्॥१॥

विधेरज्ञानेन द्रविणविरहेणाऽलसतया
विधेयाशक्यत्वात्तव चकणयोर्य्या च्युतिरभूत्।।

तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।।२।।

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः परं तेषां मध्ये विरतलरलोहं तव सुतः।। मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।।३।।

जगन्मातर्म्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।।

तथाऽपि त्वं स्नेहं मयि निरुपमँ यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।।४।।

परित्यक्त्वा देवान्विविधविधिसेवाकुलतया
मया पञ्च शीतेरधिकमुपनीते तु वयसि।।

इदानीञ्चेन्मातस्तव यदि कृपा नाऽपि भविता
निरालम्बो लम्बोदरजननि कँ यामि शरणम्।।५।।

श्वपाको जल्पाको भवति मधुपाकोपमगिरा निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।। तवापर्णे कर्णे विशति मनुवर्णे फलमिदं जन को जानीते जननि जपनीयं जपविधौ ।।६।।

चिताभस्मालेपो गरलमशनं दिक्पटधरो जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।। कपाली भूतेशो भजति जगदीशैकपदवीं भवानि त्वत्पाणिग्रहण परिपाटीफलमिदम्।।७।।

न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न मे न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।। अतस्त्वां सँय्याचे जननि जननँ यातु मम वै मृडानी रुद्राणी शिवशिव भवानीति जपतः।।८।।

नाराधितासि विधिना विविधोपचारैः किं रूक्षचिन्तनपरैर्न्न कृतँ वचोभिः।। श्यामे त्वमेव यदि किञ्चन मय्यनाथे धत्से कृपामुचितमम्ब परन्तवैव।।९।।

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णेविशि।। नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्त्ता जननीं स्मरन्ति।।१०।।

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि।। अपराधपरम्परा वृतं नहि माता समुपेक्षते सुतम्।।११।।

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।। एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु।।१२।।

इति स्तोत्रम्।।

(9) After eulogy, protection of the deity is invoked for the devotee (kavacha).

अथ कवचम्।।

श्रुणु देवि प्रवक्ष्यामि कवचं सर्व्वसिद्धिदम्।
पठित्वा पाठयित्वा च नरो मुच्येत सङ्कटात्।।

अज्ञात्वा कवचं देवि दुर्गामन्त्रञ्च यो जपेत्।
स नाप्नोति फलं तस्य परञ्च नरकं व्रजेत्।।

उमादेवी शिरः पातु ललाटे शूलधारिणी।
चक्षुषी खेचरी पातु कर्ण्णौ चत्वरवासिनी।।

सुगन्धा नासिके पातु वदनं सर्व्वधारिणी।
जिह्वाञ्च चण्डिका देवी ग्रीवां सौभद्रिका तथा।।

अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी।
हृदयँ ललिता देवी उदरं सिंहवाहिनी।।

कटिम्भगवती देवी द्वावूरु विन्ध्यवासिनी।
महाबला च जङ्घे द्वे पादौ भूतलवासिनी ॥

एवं स्ि

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्म्मफलेषु जुष्टाम्॥

दुर्ग्गां देवीं शरणमहं प्रपद्ये असुरान्नाशयित्र्यै ते नमः ॥२॥

देवीं वाचमजनयन्त देवास्ताँ व्विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्ज्जन्दुहाना धेनुर्व्वागस्मानुपसुष्टुतैतु॥ कालरात्रींब्रह्म वापस्तुता नान्ताँ वैष्णवी स्कन्दमातरं सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्॥

महालक्ष्म्यै च विद्महे सर्व्वशक्त्यै च धीमहि॥ तन्नो देवी प्रचोदयात्॥

अदितिर्ह्यजनिष्ट दक्षया दुहिता तव॥ तान्देवा अन्वजायन्त भद्रा अमृतबन्धवः॥ कामो योनिः कमला वज्रपाणिर्गुहाहस्ता मातरिश्वायमिन्द्रः॥ पुनर्गुहा सकला मायया चापृथुकेन विश्वमाताऽदि विद्या॥

एषात्मा शक्तिः॥ एषा विश्वमोहिनी । पाशाङ्कुशधनुर्बाणधरा एषा श्रीमहाविद्या य एवँ वेद स शोकं तरति॥

नमस्ते भगवति मातरस्मान्पाहि सर्व्वतः॥ सैषाष्टौ वसवः सैषा एकादश रुद्राः॥ सैषा द्वादशादित्याः॥ सैषा विश्वेदेवाः सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षसिद्धाः॥

सैषा सत्त्वरजस्तमांसि सैषा ब्रह्मविष्णुरुद्र रूपिणी॥ सैषा प्रजापतीन्द्रमनवः॥ सैषा ह्यहर्नक्षत्रज्योतींषि॥ कलाकाष्ठादीनि भस्मरूपिणी तामहं प्रणतोस्मिनित्यम् ॥ पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीं॥ अनन्ताँ व्विजयां शुद्धां शरण्यां शिवदां शुभाम्॥

वियदाकारसँय्युक्तँ वीतिहोत्रसमन्वितम्॥
अर्द्धेन्दुलसितं देव्या बीजं सर्व्वार्त्थसाधकम्॥

एवमेकाक्षरं मन्त्रयतयः शुद्धचेतसः॥
ध्यायन्ति परमानन्दंमम ज्ञानाम्बुराशयः॥

वामा या ब्रह्मभूस्तस्मात् षष्ठंवक्त्र समन्वितम्।। सूर्य्यो वामश्रोत्रबिन्दुः सँय्युक्ताष्टात् तृतीयकः।।

नारायणेन सम्मिश्रो वायुश्चाधारयुक् ततः ।।
विच्चे नवार्ण्णकाऽर्णः स्यान्महानन्दप्रदायकः।।
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्य्यसमप्रभाम्।।
पाशाङ्कुशधरां सौम्यवरदाभयहस्तकाम्।।

त्रिनेत्रां रक्तवसनां भक्तकामदुहां भजे।। भजामि त्वां महादेवीं महाभयविनाशिनीम्।।
महादारिद्र्यशमनीं महाकारुण्यरूपिणीम्।।

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अनन्ता। यस्या गृहन्नोपलक्ष्यते तस्मादुच्यते अलक्ष्यम्।

यस्या जननं नोपलभ्यते तस्मादुच्यते अजा। एकैव सर्वत्र वर्त्तते तस्मादेका। एकैकविश्वरूपिणी तस्मादनेका। अनन्ततपोवाच्यज्ञेयानन्तालक्ष्याऽजैकानेका।। मन्त्राणां मातृका देवी शब्दनां ज्ञानरूपिणी।। ज्ञानानाञ्चिन्मयातीता शून्यानां शून्यसाक्षिणी।।

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता।।

तांदुर्गदुर्ग्गमां देवीं दुराचारविघातिनीम्।।
नमामि भवभीतोऽहं संसाराण्र्णवतारिणीम्।।

य इदमथर्व्वशीर्षं योऽधीते स पञ्चाथर्व्व शीर्षफलमाप्नोति।।

इदमथर्व्वशीषमज्ञात्वा यो अर्च्चां स्थापयति शतलक्षं जप्त्वा नार्च्चाशुद्धिं च विन्दति।।

शतमष्टोत्तरं चास्य पुरश्चर्य्याविधिः स्मृतः।
दशवारं पठेद्यस्तु सद्यो पापैः प्रमुच्यते।।

महादुर्ग्गाणि तरति महादेव्याः प्रसादतः।। सायमधीयानो दिवसकृतं पापं नाशयति। सायम्प्रातः प्रयुञ्जानो अपापो भवति।

निशीथे तुरीयसन्ध्यायां वा जप्त्वा वाक्सिद्धिर्भवति। नूतनायां प्रतिमासन्निधौ जप्त्वा देवतासान्निध्यं भवति।।

प्राणप्रतिष्ठायाञ्जप्त्वा देवता भवति।।

भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्यं

तरति।। महामृत्युं तरति य एवँ वेद।। इति देव्या अथर्वशीर्षोपनिषत्समाप्ता।।

The deity is worshipped by the ceremonial recital of the 108 names of the goddess.

अथ शतनामाष्टकम्।।

Introduction

ईश्वर उवाच।।

शतनाम प्रवक्ष्यामि श्रृणुष्व कमलानने।
यस्य प्रसादमात्रेण दुर्ग प्रीता सदा भवेत्।।१।।

The text

सती साध्वी भवप्रीता भवानी भवमोचनी।
आर्य्या दुर्गा जया आद्या त्रिनेत्रा
शूलधारिणी।।२।।

पिनाकधारिणी चित्रा चन्द्रघण्टा महातपा।
मनोबुद्धिरहङ्कारा चित्तरूपा चिता चितिः।।३।।

सर्व्वमन्त्रमयी सत्या सत्यानन्दस्वरूपिणी।
अनन्ता भाविनि भाव्या भवा भव्या सदागतिः।।४।।

शम्भुपत्नी देवमाता चिन्तारत्नप्रिया सदा
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी।।५।।

अपर्णा चैव पर्ण्णा च पाटला पटलावती।
पट्टाम्बरपरीधाना कलमञ्जीररीञ्जनी ।।६।।

अमेया विक्रमा क्रूरा सुन्दरी कुलसुन्दरी।
नवदुर्गा च मातङ्गी मतङ्गमुनिपूजिता।।७।।

ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा।
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः।।८।।

विमलोत्कर्षिणी ज्ञानक्रिया सत्या च वाक्प्रदा।
बहुला बहुलप्रेमा सर्ववाहनवाहना।।९।।

निशुम्भशुम्भहननी महिषासुरमर्द्दिनी।
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी।।१०।।

सर्वासुरविनाशा च सर्वदानवघातिनी।
सर्वशास्त्रमयी विद्या सर्वास्त्रधारिणी तथा।।११।।

अनेकशस्त्रहस्ता च अनेकास्त्रविधारिणी।
कुमारी चैव कन्या च कौमारी युवती यतिः।।१२।।

अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा।

Phala-stuti

य इदञ्च पठेत स्तोत्रं दुर्गानाम शताष्टकम्।।१३।।

नासाध्यँ विद्यते देवि त्रिषु लोकेषु पार्वति।
धनन्धान्यं सुताञ्जायां हयं हस्तिनमेव च ।।१४।।

चतुर्वर्गान्तथा चान्ते लभेन्मुक्तिञ्च शाश्वतीम्।
कुमारी पूजयित्वा च ध्यात्वा देवीं सुरेश्वरीम्।।१५।।

पूजयेत्परया भक्त्या पठेन्नामशताष्टकम्।
तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवरैरपि।।
राजानो दासतां यांति राज्यश्रियमवाप्नुयात् ।।१६।।

गोरोचनालक्तककुङ्कुमेन सिन्दूरकर्पूरमधुत्रयेण।
विलिख्य यन्त्रँ व्विधिना विधिज्ञो भवेत्सदा
धारयता पुरारिः ।।१७।।

भौमावास्यानिशाभागे चन्द्रे शतभिषाङ्गते।
विलिख्य प्रपठेत्स्तोत्रं स भवेत्सम्पदां पदम्।। १८।।

इति शतनामाष्टकम्।।

(12) This is followed by a recital of one thousand names of the goddess. These names begin with the letter sacred to Durgā, namely `da' (dakārādi-nāma). The 236 verses containing these names are said to have been given by the goddess herself.

अथ सहस्रनामः।।

श्रीदेव्युवाच।।
मम नाम सहस्रञ्च शिवपूर्वविनिर्म्मितम्।
तत्पठ्यताँ विधानेन तदा सर्वभविष्यति।।१।।

इत्युक्त्वा पार्वती देवी श्रावयामास तच्च तान्।
तदेव नाम साहस्रं दकारादि वरानने।।२।।

रोगदारिद्र्यदौर्भाग्यशोकदुःखविनाशकम्।
सर्वासां पूजितं नाम श्रीदुर्गादेवता मता।।३।।

निजबीजम्भवेद्बीजं मन्त्रङ्कीलकमुच्यते।

सर्वाशापूरणे देवी विनियोगः प्रकीर्त्तितः॥४॥

दुं दुर्गा दुर्गतिहरा दुर्गजलनिवासिनी ॥५॥

दुर्गमार्गप्रविष्टा च दुर्गमार्गप्रवेशिनी।
दुर्गमार्गकृतावासा दुर्गमार्गजयप्रिया॥६॥



दुर्गमार्गगृहीतार्चा दुर्गमार्गस्थितात्मिका।
दुर्गमार्गस्तुतिपरा दुर्गमार्गस्मृतिपरा॥७॥

दुर्गमार्गसदास्थाली दुर्गमार्गरतिप्रिया।
दुर्गमार्गस्थलस्थाना दुर्गमार्गविलासिनी॥८॥

दुर्गमार्गत्यक्तवस्त्रा दुर्गमार्गप्रवर्त्तिनी।
दुर्गासुरनिहन्त्री च दुर्गासुरनिषूदनी॥९॥

दुर्गासुरवधोन्मत्ता दुर्गासुरवधोत्सुका।
दुर्गासुरवधप्रीता दुर्गासुरमोक्षदा॥१०॥

दुर्गासुरवधोत्साहा दुर्गासुरवधोद्यता।
दुर्गासुरवधप्रेप्सुर्दुर्गासुरमखान्तकृत्॥११॥

दुर्गासुरध्वंसतोषा दुर्गदानवदारिणी।
दुर्गविद्रावणकरी दुर्गविद्राविणी सदा॥१२॥

दुर्गविक्षोभणकरी दुर्गशीर्षनिकृन्तिनी।
दुर्गध्वंसनकरी दुर्गदैत्यनिकृन्तिनी॥१३॥

दुर्गदैत्यप्राणहरा दुर्ग्गदैत्यान्तकारिणी।
दुर्गदैत्यहरत्राता दुर्ग्गदैत्यसृगुन्मदा॥१४॥

दुर्ग्गदैत्याशनकरी दुर्ग्गचर्म्माम्बरावृता।
दुर्ग्गा युद्धोत्सवकरी दुर्ग्गयुद्धविशारदा॥१५॥

दुर्ग्गा युद्धासवरता दुर्ग्गयुद्धविमर्द्दिनी।
दुर्ग्गयुद्धहास्यरता दुर्ग्गयुद्धाट्टहासिनी॥१६॥

दुर्ग्गा युद्धमहामत्ता दुर्ग्गयुद्धानुसारिणी।
दुर्ग्गायुद्धोत्सवोत्साहा दुर्ग्गदेशनिषेविणी॥१७॥

दुर्ग्गदेशवासरता दुर्ग्गदेशविलासिनी।
दुर्ग्गदेशार्च्चनरता दुर्ग्गदेशजनप्रिया॥१८॥

दुर्ग्गमस्थानसंस्थाना दुर्ग्गमध्यानसाधना।
दुर्ग्गमा दुर्ग्गमध्याना दुर्ग्गमात्मस्वरूपिणी ॥१९॥

दुर्ग्गमागमसन्धाना दुर्ग्गमागमसंस्तुता।
दर्ग्गमागमदुर्ज्ञेया दुर्ग्गमश्रुतिसम्मता॥२०॥

दुर्ग्गमश्रुतिमान्या च दुर्ग्गमश्रुतिपूजिता।
दुर्ग्गमश्रुतिसुप्रीता दुर्ग्गमश्रुतिहर्षदा॥२१॥

दुर्ग्गमश्रुतिसंस्थाना दुर्ग्गमश्रुतिमानिता।
दुर्ग्गमाचारसन्तुष्टा दुर्ग्गमाचारतोषिता॥२२॥

दुर्ग्गमाचारनिर्व्वृत्ता दुर्ग्गमाचारपूजिता।
दुर्ग्गमाचाररसिता दुर्ग्गमस्थानदायिनी॥२३॥

दुर्ग्गमप्रेमनिरता दुर्ग्गमद्रविणप्रदा।
दुर्ग्गमाम्बुजमध्यस्था दुर्ग्गमाम्बुजवासिनी॥ २४॥

दुर्ग्गनाडीमार्ग्गगतिर्दुर्ग्गनाडीप्रचारिणी।
दुर्ग्गनाडीपद्मरता दुर्ग्गनाढ्यम्बुजस्थिता॥२५॥

दुर्ग्गनाडीगतायाता दुर्ग्गनाडीकृतास्पदा।
दुर्ग्गनाडीरतिरता दुर्ग्गनाडीशसँस्तुता ॥२६॥

दुर्ग्गनाडीश्वररता दुर्ग्गनाडीशचुम्बिता।
दुर्ग्गनाडीशक्रोडस्था दुर्ग्गनाड्युत्थितोत्सुका॥२७॥

दुर्ग्गनाड्यारोहणा च दुर्ग्गनाडीनिषेविता।
दरीस्थानदरीस्थानवासिनी दनुजान्तकृत्॥२८॥

दरीकृततपस्या च दरीकृतहरार्च्चना।
दरीजापितदिष्टा च दरीकृतरतिक्रिया॥२९॥

दरीकृतहरार्हा च दरीक्रीडितपुत्रिका।
दरीसन्दर्शनरता दरीरोपितवृश्चिका॥३०॥

दरीगुप्तिकौतुकाढ्या दरीभ्रमणतत्परा।
दनुजान्तकरी दीना दनु सन्तानदारिणी॥३१॥

दनुजध्वंसिनी दूना दनुजेन्द्रविनाशिनी।
दानवध्वंसिनी देवी दानवानाम्भयङ्करी॥३२॥

दानवी दानवाराध्या दानवेन्द्रवरप्रदा।
दानवेन्द्रनिहन्त्री च दानवद्वेषिणी सती॥३३॥

दानवारिप्रेमरता दानवारिप्रपूजिता।
दानवारिकृतार्च्चा च दानवारिविभूतिदा॥३४॥

दानवारिमहानन्दा दानवारिरतिप्रिया।
दानवारिदानरता दानवारिकृतास्पदा॥३५॥

दानवारिस्तुतिरता दानवारिस्मृतिप्रिया।
दानवार्य्याहाररता दानवारिप्रबोधिनी॥३६॥

दानवारिधृतप्रेमा दुःखशोकविमोचिनी।
दुःखहन्त्री दुःखदात्री दुःखनिर्म्मूलकारिणी॥३७॥

दुःखनिर्म्मूलनकरी दुःखदार्य्यरिनाशिनी।
दुःखहरा दुःखनाशा दुःखग्रामा
दुरासदा॥३८॥

दुःखहीना दुःखधारा द्रविणाचारदायिनी।
द्रविणोत्सर्गसन्तुष्टा द्रविणत्यागतोषिका॥३९॥

द्रविणस्पर्शसन्तुष्टा द्रविणस्पर्शपुत्रिका।
द्रविणस्पर्शहर्षाढ्या द्रविणस्पर्शतुष्टिदा॥४०॥

द्रविणस्पर्शनकरी द्रविणस्पर्शनातुरा।
द्रविणस्पर्शनोत्साहा
द्रविणस्पर्शसाधिता॥४१॥

द्रविणस्पर्शनमता द्रविणस्पर्शपुत्रिका।
द्रविणस्पर्शरक्षिणी द्रविणस्तोमदायिनी॥ ४२॥

द्रविणाकर्षणकरी द्रविणौघविसर्ज्जनी।
द्रविणाचलदानाढ्या द्रविणाचलवासिनी॥४३॥

दीनमाता दीनबन्धुर्दीनविघ्नविनाशिनी।
दीनसेव्या दीनसिद्धा दीनसाध्या
दिगम्बरी॥४४॥

दीनगेहकृतानन्दा दीनगेहविलासिनी।
दीनभावप्रेमरता दीनभावविनोदिनी॥४५॥

दिनमानवचेतःस्था दीनमानवहर्षदा।
दीनदैन्यनिघातेच्छुर्दीनद्रविणदायिनी॥४६॥

दीनसाधनसन्तुष्टा दीनदर्शनदायिनी।
दीनपुत्रादिदात्री च दीनसम्पद्विधायिनी॥४७॥

दत्तात्रेयध्यानरता दत्तात्रेयप्रपूजिता।
दत्तात्रेयर्षिसंसिद्धा दत्तात्रेयविभाविता॥४८॥

दत्तात्रेयकृतार्हा च दत्तात्रेयप्रसाधिता।
दत्तात्रेयहर्षदात्री दत्तात्रेयसुखप्रदा॥४९॥

दत्तात्रेयस्तुता चैव दत्तात्रेयनुता सदा।
दत्तात्रेयप्रेमरता दत्तात्रेयानुमानिता॥५०॥

दत्तात्रेयसमुद्गीता दत्तात्रेयकुटुम्बिनी।
दत्तात्रेयप्राणतुल्या दत्तात्रेयशरीरिणी॥५१॥

दत्तात्रेयकृतानन्दा दत्तात्रेयांशसम्भवा।
दत्तात्रेयविभूतिस्था दत्तात्रेयानुसारिणी॥५२॥

दत्तात्रेयगीतिरता दत्तात्रेयधनप्रदा।
दत्तात्रेयदुःखहरा दत्तात्रेयवरप्रदा॥५३॥

दत्तात्रेयज्ञानदात्री दत्तात्रेयभयापहा।
देवकन्या देवमान्या देवदुःखविनाशिनी॥५४॥

देवसिद्धा देवपूज्या देवेज्या देववन्दिता।
देवमान्या देवधन्या देवविघ्नविनाशिनी॥५५॥

देवरम्या देवरता देवकौतुकतत्परा।
देवक्रीडा देवव्रीडा देववैरिविनाशिनी॥५६॥

देवकामा देवरामा देवद्विष्टविनाशिनी।
देवदेवप्रिया देवी देवदानववन्दिता॥५७॥

देवदेवरतानन्दा देवदेववरोत्सुका।
देवदेवप्रेमरता देवदेवप्रियँव्वदा॥५८॥

देवदेवप्राणतुल्या देवदेवनितम्बिनी।
देवदेवहृतमना देवदेवसुखावहा॥५९॥

देवदेवक्रोडरता देवदेवसुखप्रदा।
देवदेवमहानन्दा देवदेवप्रचुम्बिता॥६०॥

देवदेवोपभुक्ता च देवदेवानुसेविता।
देवदेवगतप्राणा देवदेवगतात्मिका॥६१॥

देवदेवहर्षदात्री देवदेवसुखप्रदा।
देवदेवमहानन्दा देवदेवविलासिनी।।६२।।

देवदेवधर्म्मपत्नी देवदेवमनोगता।
देवदेववधूर्द्देवदेवदेवार्च्चनप्रिया।।६३।।

देवदेवाङ्गनिलया देवदेवाङ्गशायिनी।
देवदेवाङ्गसुखिनी देवदेवाङ्गवासिनी।।६४।।

देवदेवाङ्गभूषा च देवदेवाङ्गभूषणा
देवदेवप्रियकरी देवदेवाप्रियान्तकृत्।।६५।।

देवदेवप्रियप्राणा देवदेवप्रियात्मिका।
देवदेवार्च्चकप्राणा देवदेवार्च्चकप्रिया ।।६६।।

देवदेवार्च्चकोत्साहा देवदेवार्च्चनप्रिया।
देवदेवार्च्चकाविघ्ना देवदेवप्रसूरपि।।६७।।

देवदेवस्य जननी देवदेवविधायिनी।
देवदेवस्य रमणी देवदेवहृदाश्रया।।६८।।

देवदेवेष्टदेवी च देवतापसतापिनी।
देवतामभावसन्तुष्टा देवताभावतोषिता ।।६९।।

देवताभाववरदा देवताभावसिद्धिदा।
देवताभावसंसिद्धा देवताभावसम्भवा।।७०।।

देवताभावसुखिनीर्देवताभाववन्दिता।
देवताभावसुप्रीता देवताभावहर्षदा।।७१।।

देवताविघ्नहन्त्री च देवताद्विष्टनाशिनी।
देवतापूजितपदा देवताप्रेमतोषिता।।७२।।

देवतागारनिलया देवतासौख्यदायिनी।
देवतानिजभावा च देवताहृतमानसा।।७३।।

देवताकृतपादार्च्चा देवताहृतभक्तिका।
देवतागर्व्वमध्यस्था देवतादेवतादनुः।।७४।।

दुन्दुर्गयै नमोनाम्नी दूंफट्मन्त्रस्वरूपिणी।
दूंनमोमन्त्ररूपा च दूंनमोमूर्त्तिकात्मिका।।७५।।

दूरदर्शिप्रिया दुष्टादुष्टभूतनिषेविता।
दूरदर्शिप्रेमरता दूरदर्शिप्रियँव्वदा।।७६।।

दूरदर्शिसिद्धिदात्री दूरदर्शिप्रतोषिता।
दूरदर्शिकण्ठसंस्था दूरदर्शिप्रहर्षिता।।७७।।

दूरदर्शिगृहीतार्च्चा दूरदर्शिप्रतर्प्पिता।
दूरदर्शिप्राणतुल्या दूरदर्शिसुखप्रदा॥७८॥

दूरदर्शिभ्रान्तिहरा दूरदर्शिहृदास्पदा।
दूरदर्श्यरिविद्भावा दीर्घदर्शिप्रमोदिनी॥७९॥

दीर्घदर्शिप्राणतुल्या दीर्घदर्शिवरप्रदा।
दीर्घदर्शिहर्ष्यदात्री
दीर्घदर्शिप्रहर्ष्षिता॥८०॥

दीर्घदर्शिमहानन्दा दीर्घदर्शिगृहालया।
दीर्घदर्शिगृहीतार्च्चा दीर्घदर्शिहृतार्हणा॥७१॥

दया दानवती दात्री दयालुर्दीनवत्सला।
दयार्द्रा च दयाशीला दयाढ्या च
दयात्मिका॥८२॥

दयाम्बुधिर्दयासारा दयासागरपारगा।
दयासिन्धुर्दयाभारा दयावत्करुणाकरी॥८३॥

दयावद्वत्सला देवी दयादानरता सदा।
दयावद्भक्तिसुखिनी दयावत्परितोषिता॥८४॥

दयावत्स्नेहनिरता दयावत्प्रतिपादिका।
दयावत्त्राणकर्त्री च दयावन्मुक्तिदायिनी॥८५॥

दयावद्भावसन्तुष्टा दयावत्परितोषिता।
दयावत्तारणपरा दयावत्सिद्धिदायिनी॥८६॥

दयावत्पुत्रवद्भावा दयावत्पुत्ररूपिणी।
दयावद्देहंनिलया दयाबन्धु दयाश्रया ॥८७॥

दयालुवात्सल्यकरी दयालुसिद्धिदायिनी।
दयालुशरणासक्ता दयालुदहेमन्दिरा॥८८॥

दयालुभक्तिभावस्था दयालुप्राणरूपिणी।
दयालुसुखदा दम्भा दयालुप्रेमवर्ष्षिणी॥८९॥

दयालुवशगा दीर्घा दीर्घाङ्गी दीर्घलोचना।
दीर्घनेत्रा दीर्घचक्षुर्दीर्घबाहुलतात्मिका॥९०॥

दीर्घकेशी दीर्घमुखी दीर्घघोणा च दारुणा।
दारुणासुरहन्त्री च दारुणासुरदारिणी॥ ९१॥

दारुणाहवकर्त्री च दारुणाहवहर्ष्षिता।
दारुणाहवहोमाढ्या दारुणाचलनाशिनी॥ ९२॥

दारुणाचारनिरता दारुणोत्सवहर्षिता।
दारुणोद्यतरूपा च दारुणारिनिवारिणी।। ९३।।

दारुणेक्षणसँयुक्ता दोश्चतुष्कविराजिता।
दशदोष्का दशभुजा दशबाहुविराजिता।।९४।।

दशास्त्रधारिणी देवी दशदिक्ख्यातविक्रमा।
दशरथार्च्चितपदा दाशरथिप्रिया सदा ।।९५।।

दाशरथिप्रेमतुष्टा दाशरथिरतिप्रिया।
दाशरथिप्रियकरी दाशरथिप्रियँव्वदा।।९६।।

दाशरथीष्टसन्दात्री दाशरथीष्टदेवता।
दाशरथिद्वेषिनाशा दाशरथ्यानुकूल्यदा।।९७।।

दाशरथिप्रियतमा दाशारथिप्रपूजिता।
दशाननारिसम्पूज्या दशाननारिदेवता।।९८।।

दशाननारिप्रमदा दशाननारिजन्मभूः।
दशाननारिरतिदा दशाननारिसेविता।।९९।।

दशाननारिसुखदा दशाननारिवैरिहृत्।
दशाननारीष्टदेवी दशग्रीवारिवन्दिता ।।१००।।

दशग्रीवारिजननी दशग्रीवारिभाविनी।
दशग्रीवारिसहिता दशग्रीवसभाजिता।।१०१।।

दशग्रीवारिरमणी दशग्रीववधूरपि।
दशग्रीवनाशकर्त्री दशग्रीववरप्रदा।। १०२।।

दशग्रीवपुरस्था च दशग्रीववधोत्सुका।
दशग्रीवप्रीतिदात्री दशग्रीवविनाशिनी।।१०३।।

दशग्रीवाहवकरी दशग्रीवानपायिनी।
दशग्रीवप्रियावन्द्या दशग्रीवाहृता तथा।।१०४।।

दशग्रीवाहितकरी दशग्रीवेश्वरप्रिया।
दशग्रीवेश्वरप्राणा दशग्रीववरप्रदा।।१०५।।

दशग्रीवेश्वररता दशवर्षीयकन्यका।
दशवर्षीयबाला च दशवर्षीयवासिनी।।१०६।।

दशपापहरा दम्या दशहस्तविभूषिता।
दशशस्त्रलसद्दोष्का दशदिक्पालवन्दिता।।१०७।।

दशावताररूपा च दशावताररूपिणी।
दशविद्याभिन्नदेवी दशाप्राणस्वरूपिणी।।१०८।।

दशविद्यास्वरूपा च दशविद्यामयी तथा।
दृक्स्वरूपा दृक्प्रदात्री दृग्रूपा दृक्प्रकाशिनी॥१०९॥

दिगन्तरा दिगन्तस्स्था दिगम्बरविलासिनी।
दिगम्बरसमाजस्था दिगम्बरप्रपूजिता ॥११०॥

दिगम्बरसहचरी दिगम्बरकृतास्पदा।
दिगम्बरहृताचित्ता दिगम्बरकथाप्रिया॥१११॥

दिगम्बरगुणरता दिगम्बरस्वरूपिणी।
दिगम्बरशिरोधार्य्या दिगम्बरहृताश्रया॥ ११२॥

दिगम्बरप्रेमरता दिगम्बररतातुरा।
दिगम्बरीस्वरूपा च
दिगम्बरीगणार्च्चिता॥११३॥

दिगम्बरीगणप्राणा दिगम्बरीगणप्रिया।
दिगम्बरीगणाराध्या दिगम्बरगणेश्वरी॥ ११४॥

दिगम्बरगणस्पर्शा मदिरापानविह्वला।
दिगम्बरीकोटिवृता दिगम्बरीगणावृता॥११५॥

दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा।
दुरन्तदानवद्वेष्टी दुरन्तदनुजान्तकृत्॥११६॥

दुरन्तपापहन्त्री च दस्रनिस्तारकारिणी।
दस्रमानससंस्थाना दस्रज्ञानविवर्द्धिनी ॥११७॥

दस्रसम्भोगजननी दस्रसम्भोगदायिनी।
दस्रसम्भोगभवना दस्रविद्याविधायिनी॥११८॥

दस्रोद्वेगहरा दस्रजननी दस्रसुन्दरी।
दस्रभक्तिविधाज्ञाना दस्रद्विष्टविनाशिनी॥ ११९॥

दस्रापकारदमनी दस्रसिद्धिविधायिनी।
दस्रताराराधिता च दस्रमातुप्रपूजिता॥ १२०॥

दस्रदैन्यहरा चैव दस्रतातनीषेविता।
दस्रपितृशतज्योतिर्दस्रकौशलदायिनी॥१२१॥

दशशीर्षारिसहिता दशशीर्षारिकामिनी।
दशशीर्षपुरी देवी दशशीर्षसभाजिता॥ १२२॥

दशशीर्षारिसुप्रीता दशशीर्षवधूप्रिया।
दशशीर्षशिरश्छेत्री दशशीर्षनितम्बिनी॥१२३॥

दशशीर्षहरप्राणा दशशीर्षहरात्मिका।
दशशीर्षहराराध्या दशशीर्षारिवन्दिता॥१२४॥

दशशीर्षारिसुखदा दशशीर्षकपालिनी।
दशशीर्षज्ञानदात्री दशशीर्षारिदेहिता॥ १२५॥

दशशीर्षवधोपात्तश्रीरामचंद्ररूपता।
दशशीर्षराष्ट्रदेवी दशशीर्षारिसारिणी ॥ १२६॥

दशशीर्षभ्रातृतुष्टा दशशीर्षवधूप्रिया।
दशशीर्षवधूप्राणा दशशीर्षवधूरता॥ १२७॥

दैत्यगुरुरता साध्वी दैत्यगुरुप्रपूजिता।
दैत्यगुरूपदेष्ट्री च दैत्यगुरुनिषेविता॥ १२८॥

दैत्यगुरुगतप्राणा दैत्यगुर्त्तापनाशिनी।
दुरन्तदुःखशमनी दुरन्तदमनीतमी ॥ १२९॥

दुरन्तशोकशमनी दुरन्तरोगविनाशीनी।
दुरन्तवैरिदमनी दुरन्तदैत्यविनाशिनी॥ १३०॥

दुरन्तकलुषघ्नी च दुष्कृतिस्तोमनाशिनी।
दुराशया दुराधारा दुर्ज्जया दुष्टकामिनी॥ १३१॥

दर्शनीया च दृश्या च दृश्या च दृष्टिगोचरा॥
दूतीयागप्रिया दूती दूतीयागकरप्रिया॥१३२॥

दूतीयागकरानन्दा दूतीयागसुखप्रदा।
दूतीयागकरायाता दूतीयागप्रमोदिनी॥ १३३॥

दुर्वासपूजिता चैव दूर्व्वासोमुनिभाविता।
दुर्वासोर्च्चितपादा च दुर्व्वासोमुनिभाविता॥१३४॥

दुर्वासोमुनिवन्द्या च दुर्वासोमुनिदेवता।
दुर्वासोमुनिमाता च दुर्वासोमुनिसिद्धिदा ॥१३५॥

दुर्वासोमुनिभावस्था दुर्व्वासोमुनिसेविता।
दुर्वासोमुनिचित्तस्था दुर्व्वासोमुनिमण्डिता॥ १३६॥

दुर्वासोमुनिसञ्चारा दुर्व्वासाहृदयङ्गमा।
दुर्व्वासोहृदयाराध्या दुर्वासोहृत्सरोजगा॥ १३७॥

दुर्वासस्तापसाराध्या दुर्वासस्तापसाश्रया।
दुर्वासस्तापसरता दुर्वासस्तापसेश्वरी॥ १३८॥

दुर्वासोमुनिकन्या च दुर्वासोद्भूतसिद्धिदा॥१३९॥

दररात्री दरहरा दरयुक्ता दरापहा।
दरघ्नी दरहन्त्री च दरयुक्ता दराश्रया ॥१४०॥

दरस्मेरा दरापाङ्गी दयादात्री दयाश्रया।
दस्रपूज्या दस्रमाता दस्रदेवी दरेन्मदा॥१४१॥

दस्रसिद्धा दस्रसंस्था दस्रतापविमोचिनी।
दस्रक्षोभहरा नित्या दस्रलोकगतात्मिका ॥१४२॥

दैत्यगुर्व्वङ्गनावन्द्या दैत्यगुर्व्वङ्गनाप्रिया।
दैत्यगुर्व्वङ्गनासिद्धा दैत्यगुर्व्वङ्गनोत्सुका॥१४३॥

दैत्यगुरुप्रियतमा दैत्यगुरुनिषेविता।
देवगुरुप्रसूरूपा देवगुरुकृतार्हणा॥ १४४॥

देवगुरुप्रेमयुता देवगुर्व्वनुमानिता।
देवगुरुप्रभावज्ञा देवगुरुसुखप्रदा॥ १४५॥

देवगुरुज्ञानदात्री देवगुरुप्रमोदिनी।
दैत्यस्त्रीगणसम्पूज्या दैत्यस्त्रीगणपूजिता॥ १४६॥

दैत्यस्त्रीगणरूपा च दैत्यस्त्रीचित्तहारिणी।
देवस्त्रीगणपूज्या च देवस्त्रीगणवन्दिता ॥१४७॥

देवस्त्रीगणचित्तस्था देवस्त्रीगणभूषिता।
देवस्त्रीगणसंसिद्धा देवस्त्रीगणतोषिता॥ १४८॥

देवस्त्रीगणहस्तस्थचारुचामरवीजिता।
देवस्त्रीगणहस्तस्थचारुगन्धविलेपिता॥ १४९॥

देवाङ्गनाधृतादर्शदृष्ट्यर्त्थमुखचन्द्रमा।
देवाङ्गनोत्सृष्टनागवल्लीदलकृतोत्सुका॥ १५०॥

देवस्त्रीगणहस्तस्थदीपमालाविलोकना।
देवस्त्रीगणहस्तस्थधूपघ्राणविनोदिनी॥ १५१॥

देवनारीकरगतवासकासवपायिनी।
देवनारीकङ्कतिकाकृत्तकेशनिमार्ज्जना ॥ १५२॥

देवनारीरुष्टयगात्रा देवनारीकृतोत्सुका।
देवनारीविरचिता - पुष्पमालाविराजिता॥ १५३॥

देवनारीविचित्राङ्गी देवस्त्रीदत्तभोजना।
देवस्त्रीगणगीता च देवस्त्रीगीतसोत्सुका॥ १५४॥

देवस्त्रीनृत्यसुखिनी देवस्त्रीनृत्यप्रर्शिनी।
देवस्त्रीयोजितलसद्रत्नपादुपदाम्बुजा॥ १५५॥

देवस्त्रीगणविस्तीर्ण्णचारुतल्पनिषेदुषी।
देवनारीचारुकरा कलिताङ्घ्र्यादिदेहिका॥ १५६॥

देवनारीकरव्यग्रतालवृन्तमरुत्सुखा।
देवनारीवेणुवीणानादसोत्कण्ठमानसा।। १५७।।

देवकोटिस्तुतिनुता देवकोटिकृतार्हणा।
देवकोटिगीतगुणा देवकोटिकृतस्तुतिः।। १५८।।

दन्तदष्ट्योद्वेगफला देवकोलाहलाकुला।
द्वेषरागपरित्यक्ता द्वेषरागविवर्जिता ।। १५९।।

दामपूज्या दामभूषा दामोदरविलासिनी।
दामोदरप्रेमरता दामोदरभगिन्यपि।। १६०।।

दामोदरप्रसूर्दामोदरपत्नी पतिव्रता।
दामोदराभिन्नदेहा दामोदररतिप्रिया।। १६१।।

दामोदराभिन्नतनुर्दामोदरकृतास्पदा।
दामोदरकृतप्राणा दामोदरगतात्मिका।। १६२।।

दामोदरकौतुकाढ्या दामोदरकलाकला।
दामोदरालिङ्गिताङ्गी दामोदरकुतूहला।। १६३।।

दमोदरकृताह्लादा दामोदरसुचुम्बिता।
दामोदरसुताकृष्टा दामोदरसुखप्रदा।।१६४।।

दामोदरसहाढ्या च दामोदरसहायिनी।
दामोदरगुणज्ञा च दामोदरवरप्रदा।। १६५।।

दामोदरानुकूला च दामोदरनितम्बिनी।
दामोदरजलक्रीडा कुशला दर्शनप्रिया।। १६६।।

दामोदरबलक्रीडात्यक्तस्वजनसौहृदा।
दामोदरलसद्रासकेलिकौतुकिनी तथा।। १६७।।

दामोदरभ्रातृका च दामोदरपरायणा।
दामोदरधरा दामोदरवैरिविनाशिनी।। १६८।।

दामोदरोपजाया च दामोदरनिमन्त्रिता।
दामोदरपराभूता दामोदरपराजिता ।। १६९।।

दामोदरसमाक्रान्ता दामोदरहताशुभा।
दामोदरोत्सवरता दामोदरोत्सवावहा।। १७०।।

दामोदरस्तन्यदात्री दामोदरगवेषिता।
दमयन्तीसिद्धिदात्री दमयन्तीप्रसाधिता।। १७१।।

दमयन्तीष्टदेवी च दमयन्तीस्वरूपिणी।
दमयन्तीकृतार्च्चा च दमनर्षिविभाविता।। १७२।।

दमनर्ष्यिप्राणतुल्या दमनर्षिस्वरूपिणी।
दमनर्षिस्वरूपा च दम्भपूरितविग्रहा।। १७३।।

दम्भहन्त्री दम्भदात्री दम्भलोकविमोहिनी।
दम्भशीला दम्भहरा दम्भवत्परिमर्द्दिनी।। १७४।।

दम्भरूपा दम्भकरी दम्भसन्तानदारिणी।
दत्तमोक्षा दत्तधना दत्तारोग्याथ दाम्भिका।। १७५।।

दत्तपुत्रा दत्तदारा दत्तहारा च दारिका।
दत्तभोगा दत्तशोका दत्तहस्त्यादिवाहना।। १७६।।

दत्तमतिर्द्दत्तभार्य्या दत्तशास्त्रावबोधिका।
दत्तपाना दत्तदाना दत्तदारिद्र्यनाशिनी।। १७७।।

दत्तसौधावनीवासा दत्तस्वर्ग्गा च दासदा।
दास्यतुष्टा दास्यहरा दासदासीशतप्रदा।। १७८।।

दाररूपा दारवासा दारवासिहृदास्पदा।
दारवासिजनाराध्या दारवासिजनप्रिया।। १७९।।

दारवासिविनिर्णीता दारवासिसमर्च्चिता।
दारवास्याहृतप्राणा दारवास्यरिनाशीनी।। १८०।।

दारवासिविघ्नहरा दारवासिविमुक्तिदा।
दाराग्निरूपिणी दारा दारकार्य्यरिनाशिनी।। १८१।।

दम्पती दम्पतीष्टा च दम्पतीप्राणरूपिका।
दम्पतिस्नेहनिरता दाम्पत्यसाधनप्रिया॥ १८२॥

दाम्पत्यसुखसेना च दाम्पत्यसुखदायिनी।
दम्पत्याचारनिरता दम्पत्यामोदमोदिता॥ १८३॥

दम्पत्यामोदसुखिनी दाम्पत्याह्लादकारिणी।
दम्पतीष्टपादपद्मा दाम्पत्यप्रेमरूपिणी॥ १८४॥

दाम्पत्यभोगभवना दाडिमीफलभोजिनी।
दाडिमीफलसन्तुष्टादाडिमीफलमानसा॥ १८५॥

दाडिमीवृक्षसंस्थाना दाडिमीवृक्षवासिनी।
दाडिमीवृक्षरूपा च दाडिमीवनवासिनी॥ १८६॥

दाडिमीफलसाम्योरुपयोधरविवर्जिता।
दक्षिणा दक्षिणारूपा दक्षिणारूपधारिणी॥ १८७॥

दक्षकन्या दक्षपुत्री दक्षमाता च दक्षसूः।
दक्षगोत्रा दक्षसुता दक्षयज्ञविनाशिनी॥ १८८॥

दक्षयज्ञनाशकर्त्री दक्षयज्ञान्तकारिणी।
दक्षप्रसूतिर्दक्षेज्या दक्षवंशैकपावनी॥ १८९॥

दक्षात्मजा दक्षसूनुर्दक्षजा दक्षजातिका।
दक्षजन्मा दक्षजनुर्दक्षदेहसमुद्भवा॥ १९०॥

दक्षजनिर्दक्षयागध्वंसिनी दक्षकन्यका।
दक्षिणाचारनिरता दक्षिणाचारतुष्टिदा॥ १९१॥

दक्षिणाचार संसिद्धा दक्षिणाचारभाविता।
दक्षिणाचारसुखिनी दक्षिणाचारसाधिता॥ १९२॥

दक्षिणाचारमोक्षाप्तिर्दक्षिंणाचारवन्दिता।
दक्षिणाचारशरणा दक्षिणाचारहर्षिता॥ १९३॥

द्वारपालप्रिया द्वारवासिनी द्वारसंस्थिता।
द्वाररूपा द्वारसंस्था द्वारदेशनिवासिनी ॥ १९४॥

द्वारकारी द्वारधात्री दोषमात्रविवर्ज्जिता।
दोषकरा दोषहरा दोषराशिविनाशिनी॥ १९५॥

दोषाकरविभूषाढ्या दोषाकरकपालिनी।
दोषाकरसहस्राभा दोषाकरसमानना॥ १९६॥

दोषाकरमुखी दिव्या दोषाकरकराग्रजा।
दोषाकरसमज्योतिर्दोषाकरसुशीतला॥ १९७॥

दोषाकरश्रेणिदोषसद्दशापाङ्गवीक्षणा।
दोषाकरेष्टदेवी च दोषाकरनिषेविता॥ १९८॥

दोषाकरप्राणरूपा दोषाकरमरीचिका।
दोषाकरोल्लसद्भाला दोषाकरसुहर्षिणी॥ १९९॥

दोषाकरशिरोभूषा दोषाकरवधूप्रिया।
दोषाकरवधूप्राणा दोषाकरवधूर्म्मता॥ २००॥

दोषाकरवधूप्रीता दोषाकरवधूरपि।
दोषापूज्या तथा दोषापूजिता दोषहारिणी॥ २०१॥

दोषाजापमहानन्दा दोषाजापपरायणा।
दोषापुरश्चाररता दोषापूजकपुत्रिणी॥ २०२॥

दोषापूजकवात्सल्यकारिणी जगदम्बिका।
दोषापूजकवैरिघ्नी दोषापूजकविघ्नहृत्॥ २०३॥

दोषापूजकसन्तुष्टा दोषापूजकमुक्तिदा।
दमप्रसूनसम्पूज्या दमपुष्पप्रिया सदा॥ २०४॥

दुर्योधनपूज्या च दुःशासनसमर्च्चिता।
दण्डपाणिप्रिया दण्डपाणिमाता दयानिधिः
॥ २०५॥

दण्डपाणिसमाराध्या दण्डपाणिप्रपूजिता।
दण्डपाणिगृहासक्ता दण्डपाणिप्रियँव्वदा॥ २०६॥

दण्डपाणिप्रियमता दण्डपाणिमनोहरा।
दण्डपाणिहृतप्राणा दण्डपाणिसुसिद्धिदा॥ २०७॥

दण्डपाणिपरामृष्टा दण्डपाणिप्रहर्षिता।
दण्डपाणिविघ्नहरा दण्डपाणिशिरोधृता॥ २०८॥

दण्डपाणिप्राप्तचर्च्चा दण्डपाण्युन्मुखी सदा।
दण्डपाणिप्राप्तपदा दण्डपाणिवरोन्मुखी॥ २०९॥

दण्डहस्ता दण्डपाणिर्द्दण्डबाहुर्द्दरान्तकृत्।
दण्डदोष्का दण्डकरा दण्डचित्तकृतास्पदा॥ २१०॥

दण्डविद्या दण्डिमाता दण्डिखण्डकनाशिनी।
दण्डिप्रिया दण्डिपूज्या दण्डिसन्तोषदायिनी
॥ २११॥

दस्युपूज्या दस्युरता दस्युद्रविणदायिनी।
दस्युवर्ग्गकृतार्हा च दस्युवर्ग्गविनाशिनी॥ २१२॥

दस्युनिर्न्नाशिनी दस्युकुलनिर्न्नाशिनी तथा।
दस्युप्रियकरी दस्युनृत्यदर्शनतत्परा।। २१३।।

दुष्टदण्डकरी दुष्टवर्ग्गविद्राविणी तथा।
दुष्टवर्ग्गनिग्रहार्हा दूषकप्राणनाशिनी।। २१४।।

दूषकोत्तापजननी दूषकारिष्टकारिणी।
दूषकद्वेषनकरी दाहिका दहनात्मिका।। २१५।।

दारकारी निहन्त्री च दारुकेश्वरपूजिता।
दारुकेश्वरमाता च दारुकेश्वरवन्दिता।। २१६।।

दर्ब्भहस्ता दर्ब्भयुता दर्ब्भज्ञकर्म्मविवर्ज्जिता।
दर्ब्भमयी दर्ब्भतनुर्द्दर्ब्भसर्व्वस्वरूपिणी।। २१७।।

दर्ब्भकर्म्माचाररता दर्ब्भहस्तकृतार्हणा।
दर्ब्भानुकूला दार्ब्भर्य्या दर्व्वीपात्रानुदामिनी।। २१८।।

दमघोषप्रपूज्या च दमघोषवरप्रदा।
दमघोषसमाराध्या दावाग्निरूपिणी तथा।। २१९।।

दावाग्निरूपा दावग्निनिर्न्नाशितमहाबला।
दन्तद्रंष्ट्रस्यन्दना च दन्तनिर्न्नाशितासुरा।।

दधिपूज्या दधिप्रीता दधीचिवरदायिनी।
दधीचिदैत्यहन्त्री च दधीचिदरदारिणी।। २२२।।

दधीचिभक्तिसुखिनी दधीचिमुनिसेविता।
दधीचिज्ञानदात्री च दधीचिगुणदायिनी।। २२३।।

दधीचिकुलसम्भूषा दधीचिभुक्तिमुक्तिदा।
दधीचिकुलदेवी च दधीचिकुलदेवता।। २२४।।

दधीचिकुलगम्या च दधीचिकुलपूजिता।
दधीचिसुखदात्री च दधीचिदीनहारिणी।।२२५।।

दधीचिदुःखहन्त्री च दधीचिकुलसुन्दरी ।
दधीचिकुलसम्भूता दधीचिकुलपालिनी।। २२६।।

दधीचिदानगम्या च दधीचिदानमानिनी।
दधीचिदानसन्तुष्टा दधीचिदानदेवता।। २२७।।

दधीचिजयसम्प्रीता दधीचिजपमानसा।
दधीचिजपपूजाढ्या दधीचिजपमालिका।। २२८।।

दधीचिजपसन्तुष्टा दधीचिजपतोषिणी।
दधीचितपसाराध्या दधीचिशुभदायिनी।। २२९।।

दूर्व्वा दूर्व्वादलश्यामा दूर्व्वादलसमद्युतिः।

फलश्रुतिः।।

नाम्नां सहस्रं दुर्गाया दादीनामिति कीर्त्तितम्
॥ २३०॥

प्रातर्म्मध्याह्नकाले च सन्ध्यायां नियतः शुचिः
॥ २३१॥

यः पठेत्साधकाधीशः सर्व्वसिद्धीर्ल्लभेत्तु सः।

तथार्द्धरात्रसमये स महेश इवापरः।

शक्तियुक्तो महारात्रौ महावीरः प्रपूजयेत्।। २३२।।

महादेवीं मकाराद्यैः पञ्चभिद्र्द्रव्यसत्तमैः।
तत्पठेत स्तुतिमिमाँ यः स च सिद्धिस्वरूपधृक्
।। २३३।।

देवालये श्मशाने च गङ्गातीरे निजे गृहे।
वाराङ्गनागृहे चैव श्रीगुरोस्सन्निधावपि।। २३४।।

पर्व्वते प्रान्तरे घोरे स्तोत्रमेतत्सदा पठेत्।
दुर्गानामसहस्रं हि दुर्गां पश्यति चक्षुषा।। २३५।।

शतावर्त्तनमेतस्य पुरश्चरणमुच्यते।
स्तुतिसारो निगदितः किम्भूयः श्रोतुमिच्छसि
।। २३६।।

इति श्रीकुलार्ण्णवे दुर्गादकारादिसहस्रनामस्तोत्रं
समाप्तम्।।

CHAPTER THREE

THE KAVACHAS AND STOTRAS

The word Kavacha (also called varma) literally means self-defence in the form of worn on the battle-field to shield oneself from the blows or shots from weapons like sword, mace or darts. In the tāntrik context, the `kavacha' is a spiritually protective device, and

consists of ritualistically invoking the power of the divine agency. Each form of divinity has its own `kavacha', and the following is the most powerful among the kavachas (hence called Kavacheśvara) pertaining to the powers of the mother-goddess Durgā. There are four Kavachas given here. The first one is an excerpt from *Devī-rahasya*. The second is from *Brahma-vaivarta-purāṇa*, the third from *Kubjikā tantra*, and the fourth from *Durgā-Kalpa*.

I

KAVACHAS

Durgā-kavacheśvara

This excerpt from *Devī-rahasya* is ascribed to the authorship of Bhairava, a form of Śiva Himself, and is address to the mother-goddess (Devī). There is a brief introduction which extols the merit of wearing this Kavacha; the devotee would be protected from all ills, would eliminate all obstacles, and would attain to immortality.

The seer (ṛshi) for the Kavacha is Maheśvara great lord ; the metre (chhandas) in which the Kavachas worded is anushṭup, and the deity invoked (devatās) Durgā in the form of the eight-lettered mantra. (om hrim dum durgāyai namah).

The text has a brief introduction, and then the particulars of the Kavacha-mantra (viniyoga) : seer, metre, deity, purpose. This is followed by a verse for contemplation (dhyāna).

The text occurs with slight variations in *Rudra-yāmala*, and comes at the end of the `Durgā-pūjā-paddhati', given in chapter Two.

श्रीदुर्गाकवचेश्वरम्

1. INTRODUCTION

अधुना देवि वक्ष्येऽहं, कवचं मन्त्रगर्भकम्।
दुर्गायः सारसर्वस्वं, कवचेश्वर संज्ञकम्।।१।।

परमार्थप्रदं नित्यं, महापातक नाशनम्।
योगिप्रियं योगिगम्यं देवानामपि दुर्लभम्।।२।।

विना दानेन मन्त्रस्य सिद्धिर्देवि कलौ भवेत्।
धारणादस्य देवेशि शिवस्त्रैलोक्य नायकः।।३।।

भैरवी भैरवेशानी, विष्णुर्नारायणो बली।
ब्रह्मा पार्वति लोकेशो, विघ्न ध्वंसी गजाननः।।४।।

सेनानीश्च महा सेनो, जिष्णुर्लोकर्षभः प्रिये !
सूर्यस्तमोपहो लोके चन्द्रोऽमृतनिधिस्तथा।।५।।

बहुनोक्तेन किं देवि दुर्गाकवचधारणात्।
मर्त्योऽप्यमरतां याति साधको मन्त्र साधकः।।६।।

कवचस्यास्य देवेशि ऋषिः प्रोक्तो महेश्वरः।
छन्दोऽनुष्टुप् प्रिये दुर्गा देवताऽष्टाक्षरा स्मृता।।७।।

2. PARTICULARS OF THE KAVACHA-MANTRA

१. विनियोग :

ओं अस्य श्रीदुर्गा कवचेश्वरस्य श्रीमहेश्वर ऋषिः अनुष्टुप् छन्दः, श्रीदुर्गा देवता, दुं बीजं, ह्रीं शक्तिः, उँ कीलकं, श्रीदुर्गाप्रीत्यर्थे पाठे विनियोगः।

2. The three nyāsas :

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ ह्रां	अंगुष्ठाभ्यां नमः	हृदयाय नमः।
ओं ह्रीं	तर्जनीभ्यां नमः	शिरसे स्वाहा।
ओं ह्रूँ	मध्यमाभ्यां नमः	शिखायै वषट्।
ओं ह्रैं	अनामिकाभ्यां नमः	कवचाय हुं।
उँ ह्रौं	कनिष्ठिकाभ्यां नमः	नेत्र - त्रयाय वौषट्।।
ह्रः	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्

3. The Dhyāna of the deity :

दूर्वानिभां त्रिनयनां विलसत्किरीटाम्,
शङ्खाब्जखड्गशरखेटकशूल चापान्।
सन्तर्जनीं च दधतीं महिषासनस्थाम्,
दुर्गां नवारकुलपीठगतां भजेऽहम्।।

3. THE KAVACHA-TEXT :

The deity is now invoked to protect the several limbs of the devotee in so many forms (viz. names). This is followed by a call for protection coming from all directions, protection from elements (fire, water etc), from wild animals and from wicked spirits.

(a) protection of ones limbs, beginning with the head and ending with the feet.

ओं मे पातु शिरो दुर्गा ह्रीं मे पातु ललाटकम्।
दुँ नेत्रेऽष्टाक्षरा पातु चक्रीं पातु श्रुती मम ।।

मुखं गण्डौ च मे पातु देवेशी रक्त कुण्डला।
वायुर्नासां सदा पातु, रक्त वीज निषूदिनी।।२।।



लवणं पातु मे चोष्टौ चामुण्डा चण्ड घातिनी।
भेकी वीजं सदा पातु, दन्तान्मे रक्त दन्तिका।।३।।

ओं ह्रीं श्रीं पातु मे कण्ठं नीलकण्ठाङ्क - वासिनी।
ओं ऐक्प्लीं पातु मे स्कन्धौ, स्कन्दमाता महेश्वरी।।४।।

ओं सौः क्लीं मे पातु बाहू देवेशी बगलामुखी।
श्रीं ह्रीं पातु मे हस्तौ शिवाशत निनादिनी।।५।।

सौः ऐं ह्रीं पातु मे वक्षो देवता विन्ध्यवासिनी।
ओं ह्रीं श्रीं क्लीं पातु कुक्षिं, मम मातङ्गिनी परा।।६।।

श्रीं ह्रीं ऐं पातु मे पार्श्वौ हिमाचलनिवासिनी।
उँ स्त्रीं हूं ऐं पातु पृष्ठं मम दुर्गति नाशिनी।।७।।

ओं क्रीं हूं पातु मे नाभिं देवी नारायणी सदा।
ओं ऐक्लीं सौः सदा पातु कटिं कात्यायनी मम ।।८।।

ओं ह्रीं श्रीं पातु शिश्नं मे देवी श्रीबगलामुखी।
ऐं सौः क्लीं सौः पातु गुह्यं गुह्यकेश्वर पूजिता।।९।।

ओं ह्रीं ऐं श्रीं ह्सौः पायादूरु मम मनोन्मना।
ओं जूं सः सौः पातु जानू जगदीश्वर पूजिता।।१०।।

ओं ऐं क्लीं पातु मे जङ्घे मेरुपर्वतवासिनी।
ओं ह्रीं श्रीं गीं सदा पातु गुल्फौ मम गणेश्वरी।।११।।

ओं ह्रीं दुँ पातु मे पादौ पार्वती षोडशाक्षरी।
पूर्वे मां पातु ब्रह्माणी बह्नौ च वैष्णवी तथा।।१२।।

(b) protection in all the eight directions, beginning with East and ending with the region below:

दक्षिणे चण्डिका पातु नैऋत्ये नारसिंहिका।
पश्चिमे पातु वाराही वायव्ये अपराजिता।।१३।।

उत्तरे पातु कौमारी चैशान्यां शाम्भवी तथा।
ऊर्ध्वं दुर्गा सदा पातु पात्वधस्ताच्छिवा सदा।।१४।।

(c) protection at all times : morning night, eventide and always :

प्रभाते त्रिपुरा पातु निशीथे छिन्नमस्तका।
निशान्ते भैरवी पातु सर्वदा भद्रकालिका।।१५।।

(d) protection from elements :

अग्नेरम्बा च मां पातु जलान्मां जगदम्बिका।
वायोर्मां पातु वाग् देवी, वनाद् वनज लोचना।।१६।।

(e) protection from lion, serpent, disease and evil spirits :

सिंहात् सिंहासना पातु, सर्पात् सर्पान्तकासना।
रोगान्मां राजमातङ्गी भूताद् भूतेशवल्लभा।।१७।।

यक्षेभ्यो यक्षिणी पातु रक्षोभ्यो राक्षसान्तका।
भूतप्रेतपिशाचेभ्यः सुमुखी पातु मां सदा।।१८।।

सर्वत्र सर्वदा पातु, ओं ह्रीं दुर्गा नवाक्षरा।
इत्येवं कवचं गुह्यं दुर्गासर्वस्वमुत्तमम्।।२९।।

4. THE MERIT OF EMPLOYING THIS KAVACHA : (RECITING OR WEARING):

फलश्रुतिः
मन्त्रगर्भं महेशानि कवचेश्वर संज्ञकम्।
वित्तदं पुण्यदं पुण्यं वर्म सिद्धि प्रदं कलौ।।१।।

वर्म सिद्धिप्रदं गोप्यं परापर रहस्यकम्।
श्रेयस्करं मनुमयं रोगनाशकरं परम्।।२।।

महापातककोटिघ्नं मानदं च यशस्करम्।
अश्वमेधसहस्रस्य फलदं परमार्थदम्॥३॥

अत्यन्तगोप्यं देवेशि कवचं मन्त्र सिद्धिदम्।
पठनात् सिद्धिदं लोके धारणान्मुक्तिदं शिवे॥४॥

5. THE METHOD OF WRITING THIS KAVACHA AND WEARING IT :

रवौ भूर्जे लिखेद् धीमान् कृत्वा कर्माह्निकं प्रिये।
श्रीचक्राग्रेऽष्टगन्धेन साधको मन्त्र सिद्धये॥५॥

लिखित्वा धारयेद् बाहौ गुटिकां पुण्यवर्धिनीम्।
किं किं न साधयेल्लोके गुटिका वर्मणोऽ चिरात्॥६॥

गुटिकां धारयेन्मूर्ध्नि राजानं वश्मानयेत्।
धनार्थी धारयेत् कण्ठे पुत्रार्थी कुक्षि मण्डले॥७॥

तामेवं धारयेन्मूर्ध्नि लिखित्वा भूर्जपत्रके।
श्वेतसूत्रेण संवे लाक्षया परिवेष्टयेत्॥८॥

सुवर्णेनाथ संवेष्ट्य, धारयेद् रक्तरज्जुना।
गुटिका कामदा देवि देवानामपि दुर्लभा॥९॥

कवचस्यास्य गुटिकां धृत्वा मुक्ति प्रदायिनीम्।
कवचस्यास्य देवेशि वर्णितुं नैव शक्यते॥१०॥

6. PRESCRIPTIONS AND PROHIBITIONS RELATING TO THE KAVACHA.

महिमा वै महादेवि जिह्वाकोटिशतैरपि।
अदातव्यामिदं वर्म, मन्त्रगर्भ रहस्यकम्॥१॥

अवक्तव्यं महापुण्यं सर्वसारस्वत प्रदम्।
अदीक्षिताय नो दद्यात् कुचैलाय दुरात्मने॥२॥

अन्यशिष्याय दुष्टाय निन्दकाय कुलार्थिनाम्।
दीक्षिताय कुलीनाय गुरुभक्तिरताय च ॥३॥

शान्ताय कुलसक्ताय शाक्ताय कुलवासिने।
इदं वर्म शिवे दद्यात् कुलभागी भवेन्नर :॥४॥

इदं रहस्यं परमं दुर्गाकवचमुत्तमम्।
गुह्यं गोप्यतमं गोप्यं, गोपनीयं स्वयोनि वत्॥५॥

II

(1) Introduction

This excerpt called Brahmāṇḍa vijaya-durgā-kavacha is from *Brahma-vaivarta-purāṇa.* It is in the form of a dialogue between Nārada (who asks) and Nārāyaṇa (who answers). There is at the beginning the eulogy of this Kavacha , as also the lineage of communication. Kṛshṇa is said to have given this Kavacha to Brahmā in Goloka, Brahma to Śiva when he set out to fight with Tripura, Vishṇu to Gautama and Gautama to Padmāksha who by virtue of this Kavacha became the lord of the seven island-worlds.

कवचं कथितं ब्रह्मन् पद्मायाश्च मनोहरम्।
परं दुर्गतिनाशिन्याः कवचं कथय प्रभो॥१॥

पद्माक्षप्राणतुल्यं च जीवनाय बलकारणम्।
कवचानां च यत्सारं, दुर्गतिनाशनकारणम्॥२॥

श्रृणु नारद ! वक्ष्यामि, दुर्गायाः कवचं शुभम्।
श्रीकृष्णेनैव यद् दत्तं गोलोके ब्रह्मणे पुरा॥३॥

ब्रह्मा त्रिपुरसंग्रामे , शङ्कराय ददौ पुरा।
जघान त्रिपुरं रुद्रो यद् धृत्वा भक्ति-पूर्वकम्॥४॥

हरो ददौ गौतमाय पद्माक्षाय च गौतमः।
यते बभूव पद्माक्षः सप्तद्वीपेश्वरो महान्॥५॥

शिवो बभूव सर्वज्ञो योगिनां च गुरुर्यतः।
शिव तुल्यो गौतमश्च, बभूव मुनिसत्तमः॥६॥

(2) Details of the Kavacha : Prajāpati is the seer (rshi), the metre (chhanda) is Gāyatri and the deity (devatā) is Durgā. The purpose is to conquer the universe.



ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी॥१॥

ब्रह्माण्डविजयेष्वेव विनियोगः प्रकीर्तितः।
पुण्यजीवश्च महतां कवचं परमाद्भुतम्॥२॥

3. The text

उँ ह्रीं दुर्गतिनाशिन्यै स्वाहा मे पातु मस्तकम्।
ह्रीं मे पातु कपालं च ऐं ह्रीं श्रीं पातु लोचने॥३॥

पातु मे कर्णयुग्मं च दुं दुर्गायै नमः सदा।
ऐं ह्रीं श्रीं इति **नासां** मे सदा मां पातु सर्वतः॥४॥

दुर्गे दुर्गे रक्षणीति स्वाहा चास्य सदाऽवतु।
श्री ह्रीं क्लीं पातु दंतालीं पातु ह्रीमोष्ठ
युग्मकम्॥५॥

ह्रीं ह्रीं ह्रीं पातु कण्ठं च दुर्गे रक्षतु गण्डकम्।
स्कन्धं दुर्ग विनाशिन्यै स्वाहा पातु निरन्तरम्॥६॥

वक्षो विपद्विनाशिन्यै स्वाहा मे पातु सर्वतः।
दुर्गे दुर्गे रक्ष पार्श्वे स्वाहा नाभिं सदाऽवतु॥७॥

दुर्गे दुर्गे रक्ष रक्ष पृष्ठं मे पातु सर्वतः।
ओं दुं दुर्गायै स्वाहा च हस्तौ पादौ सदाऽवतु॥८॥

श्रीं ह्रीं दुर्गायै स्वाहा च सर्वाङ्गं मे सदाऽवतु।
प्राच्यां पातु महामाया, चाग्नेय्यां पातु कालिका॥९॥

दक्षिणे दक्षकन्या च नैऋत्यां शिवसुन्दरी।
पश्चिमे पार्वती पातु, वाराही वारुणे सदा॥१०॥

कुबेरमाता कौबेर्यामीशान्यामीश्वरी सदा।
ऊर्ध्वं नारायणी पातु ह्यम्बिकाऽधः सदाऽवतु॥११॥

ज्ञानं ज्ञानप्रदा पातु, स्वप्ता स्वप्ने
सदाऽवतु॥१२॥
इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम्।
ब्रह्माण्डविजयं नाम कवचं परमाद्भुतम्॥१३॥

4. Phala-śruti

॥ फल - श्रुति॥
सुस्नातः सर्वतीर्थेषु सर्वयज्ञेषु यत्फलम्।
सर्व व्रतोपवासे च तत् फलं लभते नरः॥१॥

गुरुमभ्यर्च्य विधिवद् वस्त्रालङ्कारचन्दनैः।
कण्ठे वा दक्षिणे बाहौ कवचं धारयेत्तु यः।
स च त्रैलोक्यविजयी सर्व-शत्रुप्रमर्दकः॥२॥

इदं कवचमज्ञात्वा भजेद् दुर्गातिनाशिनीम्।
शतलक्षं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः॥३॥

कवचं कण्वशाखोक्तमुक्तं नारद सुन्दरम्।
यस्मै कस्मै न दातव्यं गोपनीयं सुदुर्लभम्॥४॥

III

DURGĀ-KAVACHA

This brief excerpt from *Kubjikā-tantra* tells us that the recitation of hymns to Durgā without the employment of the Kavacha would be profitless.

1. Introduction

श्रृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम्।
पठित्वा धारयित्वा च नरो मुच्यते सङ्कटात्॥१॥

अज्ञात्वा कवचं देवि दुर्गामन्त्रं च यो जपेत्।
स नाप्नोति फलं तस्य परे च नरकं व्रजेत्॥२॥

इदं गुह्यतमं देवि कवचं तव कथ्यते।
गोपनीयं प्रयत्नेन सावधानावधारय॥३॥

2. The text

उमा देवी शिरः पातु, ललाटं शूलधारिणी।
चक्षुषी खेचरी पातु, कर्णौ चत्वरवासिनी॥१॥

सुगन्धा नासिकां पातु वदनं सर्वसाधिना।
जिह्वां च चण्डिका पातु ग्रीवां सौभद्रिका तथा॥२॥

अशोकवासिनी चेतो द्वौ बाहू बज्रधारिणी।
कण्ठे पातु महावाणी जगन्माता स्तनद्वयम्॥३॥

हृदयं ललिता देवी उदरं सिंहवाहिनी।
कटिं भगवती देवी द्वावूरू विन्ध्यवासिनी॥७॥

एवं स्थिताऽसि देवि त्वं त्रैलोक्यरक्षणात्मिके।
रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तु ते॥५॥

3. Phala-śruti

इत्येतत् कवचं देवि महाविद्याफलप्रदम्।
यः पठेत् प्रातरुत्थाय सर्वतीर्थफलं लभेत्॥१॥

यो न्यसेत् कवचं देहे तस्य विघ्नं न कुत्रचित्।
भूतप्रेतपिशाचेभ्यो भयस्तस्य न विद्यते ॥२॥

रणे राज कुले वापि सर्वत्र विजयी भवेत्।
सर्वत्र पूजामाप्नोति देवीपुत्र इव क्षितौ॥३॥

IV

The excerpt given here is from *Durgā-Kalpa* and ascribed to the authorship of Śiva, as related to the celestial sage Nārada. The Kavacha is said to have been given by Kṛshṇa to Brahma, Brahmā to Dharma and Dharma to Śiva. The Introduction tells us that by wearing this Kavacha from the fear of Madhu and Kaiṭabha, Bhadra-Kāli could slay the demon Rakta-bīja,

Indra obtained heaven, Bāṇa became a terror to his enemies, and the sage Durvāsa became like unto Śiva himself.

श्रीब्रह्माण्डमोहनदुर्गाकवचम्।।

1. Introduction : Nārada asks:

भगवन् सर्वधर्मज्ञ, सर्वज्ञान विशारद।
ब्रह्माण्ड -मोहनं नाम प्रकृतेः कवचं वद।।१।।

Śiva answers :

श्रृणु वक्ष्यामि हे वत्स कवचं च सुदुर्लभम्।
श्रीकृष्णेनैव कथितं कृपया ब्रह्मणे पुरा।।२।।

ब्रह्मणा कथितं पूर्वं धर्माय जाह्नवीतटे।
धर्मेण दत्तं मह्यं च कृपया पुष्करे पुरा।।३।।

त्रिपुरारिश्च यद्धृत्वा जघान त्रिपुरं पुरा।
मुमोच ब्रह्मा यद् धृत्वा मधु कैटभयोर्भयात्।।४।।

सञ्जहार रक्तवीजं यद्धृत्वा भद्रकालिका।
यद्धृत्वा हि महेन्द्रश्च सम्प्राप कमला लयाम्।।५।।

यद्धृत्वा च महायोद्धा बाणः शत्रु - भयङ्करः।
यद् - धृत्वा शिव-तुल्यश्च दुर्वासा ज्ञानिनां वरः।।६।।

2. The text of the Kavacha

ओं दुर्गति चतुर्थ्यन्तः स्वाहान्तो मे शिरोऽवतु।
मन्त्रः षडक्षरोऽयं च भक्तानां कल्पपादपः।।७।।

विचारो नास्ति वेदे च ग्रहणेऽस्य मनोर्मुने।
मन्त्रग्रहणमात्रेण विष्णुतुल्यो भवेन्नरः।।१।।

मम वक्त्रं सदा पातु ओं दुर्गायै नमोऽन्तकः।
ओं दुर्गे च इति कण्ठं मन्त्रः पातु सदा मम।।२।।

ओं ह्रीं श्रीमिति मन्त्रोऽयं स्कन्धं पातु निरन्तरम्।
ह्रीं श्रीं क्लीमिति पृष्ठं च पातु मे सर्वतः सदा।।३।।

ह्रीं मे वक्षस्थलं पातु हं सं श्रीमिति सन्ततम्।
ऐं श्रीं ह्रीं पातु सर्वाङ्गं स्वप्ने जागरणे सदा।।४।।

प्राच्यां मां पातु प्रकृतिः पातु नह्नौ च चण्डिका।
दक्षिणे भद्रकाली च नैऋत्यां च महेश्वरी।।५।।

वारुण्यां पातु वाराही वायव्यां सर्वमङ्गला।
उत्तरे वैष्णवी पातु तथैशान्यां शिवप्रिया॥६॥

जले स्थले चान्तरिक्षे पातु मां जगदम्बिका।
इति ते कथितं वत्स कवचं च सु दुर्लभम्॥७॥

3. Merits that follow from the wearing of this Kavacha :

यस्मै कस्मै न दातव्यं प्रवक्तव्यं न कस्यचित्।
गुरुमभ्यर्च्य विधिवद् वस्त्रालङ्कारचन्दनैः॥१॥

कवचं धारयेद् यस्तु सोऽपि विष्णुर्न संशयः।
स्नाने च सर्वतीर्थानां, पृथिव्याश्च प्रदक्षिणे॥२॥

यत्फलं लभते लोकस्तदेतद् धारणे मुने ।
पञ्चलक्षजपेनैव सिद्धमेतद् भवेद् ध्रुवम्॥३॥

लोकश्याः सिद्धकवचो, नावसीदति सङ्कटे।
न तस्य मृत्युर्भवति जले वह्नौ विषे ज्वरे॥४॥

जीवन्मुक्तो भवेत् सोऽपि सर्व सिद्धीश्वरीश्वरम्।
यदि स्यात् सिद्धकवचो विष्णुतुल्यो भवेद्
ध्रुवम्॥५॥





CHAPTER FOUR

SAHASRA-NĀMA

कुमारीं पूजयित्वा च ध्यात्वा देवीं सुरेश्वरीम्।
पूजयेत् प्रयतो भक्त्या पठेन्नामशताष्टकम्।।१८।।

तस्य सिद्धिर्भवेत् देवि सर्वैः सुरवरैरपि।
राजानो दासतां यान्ति राज्य-श्रियमवाप्नुयात्।।१९।।

गोरोचनालक्तककुंकुमेन सिन्दूरकर्पूरमधुत्रयेण।
विलिख्य यन्त्रं विधिना विधिज्ञो भवेत् सदा धारयतः
स्मरारिः।।२०।।

भौमावास्यां निशाभागे, चन्द्रे शतभिषां गते।
विलिख्य प्रपठन् स्तोत्रं स भवेत् सम्पदां
पदम्।।२१।।

I

श्रीदुर्गासहस्रनामस्तोत्रम्

PRELIMINARIES

1. Śiva tells Devī :

।।पीठिका।।

श्रृणु देवि प्रवक्ष्यामि, दुर्गानामसहस्रकम्।
यत्प्रसादान्महादेवि चर्तुर्वर्गफलं लभेत्।।१।।

पठनं श्रवणं चास्य सर्वाशापरिपूरकम्।
धनपुत्रप्रदं चैव बालानां शान्तिकारकम्।।२।।

उग्ररोगप्रशमनं, ग्रहदोषविनाशनम्।
अकालमृत्युहरणं वाणिज्ये विजय-प्रदम्।।३।।

विवादे दुर्गमे युद्धे नौकायां शत्रुसङ्कटे।
राज-द्वारे महाऽरण्ये, सर्वत्र विजय-प्रदम्।।४।।

2. Details ofthe Sahasra-nāma-stotra text.

नारदोऽस्य ऋषिः प्रोक्तो गायत्री छन्द ईरितम्,
शक्तिबीजं रूपमस्य श्रीदुर्गा परदेवता।
सर्वाभीष्टप्रयोगे च विनियोगः प्रकीर्त्तितः।।५।।

।।विनियोगः।।

ओं अस्य श्री दुर्गासहस्रनाममालामन्त्रस्य नारद ऋषिः, गायत्री छन्दः, श्री दुर्गा देवता, दुं वीजं, ह्रीं शक्तिः, ओं कीलकं, श्रीदुर्गा-प्रीत्यर्थं श्रीदुर्गा सहस्र नाम जपे विनियोगः।

3. The Nyāsas

।।करन्यास।।

।।अङ्गन्यास।।

नारद-ऋषये नमः शिरसि। गायत्रीछन्दसे नमः मुखे। श्रीदुर्गादिवतायै नमः हृदये । दुं बीजाय नमः गुह्यं । ह्रीं शक्तये नमः पादयोः । ओं

कीलकाय नमः नाभौ। श्रीदुर्गाप्रीत्यर्थं नाम-जपे विनियोगाय नमः सर्वाङ्गे।।

ह्रां ओं ह्री दुं दुर्गायै अंगुष्ठाभ्यां नमः
हृदयाय नमः।।
ह्रीं ॐ ह्रीं दुं दुर्गायै नमः तर्जनीभ्यां स्वाहा
शिरसे स्वाहा।।
ह्रीं ॐ ह्रीं दुं दुर्गायै नमः मध्यमाभ्यां वषट्
शिखायै वषट्।।
ह्रीं ॐ ह्रीं दुं दुर्गायै नमः अनामिकाभ्यां हुं
कवचाय हुं।।
ह्रीं ॐ ह्रीं दुं दुर्गायै नमः कनिष्ठाभ्यां वौषट्
नेत्र-त्रयाय वौषट्।।
ह्रीं ॐ ह्रीं दुं दुर्गायै नमः करतल-करपृष्ठाभ्यां
फट् अस्त्राय फट्।।

4. Contemplation

ध्यानम्।।

सिंहस्था शशिशेखरा मरकतप्रख्या
चतुर्भिर्भुजैः शङ्खं चक्र-धनुः शरांश्च दधती
नेत्रैस्त्रिभिः शोभिता।।
आमुक्ताङ्गदहारकङ्कणरणत् काञ्ची क्वणन्नुपूरा।
दुर्गा दुर्गति-हारिणी भवतु वो रत्नोल्लसत्-
कुण्डला।।

5. Mental Worship

।।मानस-पूजम्।।
लं पृथिव्यात्मकं गन्धं समर्पयामिकनिष्ठांगुष्ठाभ्यां।। हं आकाशात्मकं पुष्पं समर्पयामि अंगुष्ठ-तर्जनीभ्यां।। यं वाय्वात्मकं धूपं समर्पयामि तर्जन्यंगुष्ठाभ्यां।। रं वन्ह्यात्मकं दीपं दर्शयामि अंगुष्ठ मध्यमाभ्यां।। वं अमृतात्मकं नैवेद्यं निवेदयामि अंगुष्ठानामिकाभ्यां।। सं सर्वात्मकं ताम्बूलं निवेदयामि सर्वांगुलिभिः।।

The text

।।मूल-पाठ।।

श्रीदुर्गा दुर्गतिहरा परिपूर्णा परात्परा।
सर्वोपाधिविनिर्मुक्ता भवभारविनाशिनी।।१।।

कार्यकारणनिर्मुक्ता लीलाविग्रहधारिणी।
सर्वश्रृङ्गारशोभाढ्या सर्वायुधसमन्विता।।२।।

सूर्यकोटिसहस्राभा चन्द्रकोटिनिभानना ।
गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी।।३।।

दावाग्निकोटिनलिनी रुद्रकोट्युग्ररूपिणी।
समुद्रकोटि-गम्भीरा वायुकोटिमहाबला।।४।।

आकाशकोटिबिस्तारा यमकोटिभयङ्करी।
मेरुकोटिसमुच्छ्राया गणकोटिसमृद्धिदा।।५।।

नमस्या प्रथमा पूज्या सकला अखिलाम्बिका।
महाप्रकृति सर्वात्मा भुक्तिमुक्तिप्रदायिनी।।६।।

अजन्या जननी जन्या महावृषभबाहिनी।
कर्दमी काश्यपी पद्मा सर्वतीर्थनिवासिनी।।७।।

भीमेश्वरी भीम नादा भवसागरतारिणी।
सर्वदेवशिरोरत्ननिर्घृष्टचरणाम्बुजा।।८।।

स्मरतां सर्वपापघ्नी सर्वकारणकारणा।
सर्वार्थसाधिका माता सर्वमङ्गलमङ्गला।।९।।

पृच्छा पृश्नी महाज्योतिररण्या वनदेवता।
भीतिर्भूतिर्मतिः शक्तिस्तुष्टिः पुष्टिरुषा धृतिः।।१०।।

उत्तानहस्ता सम्भूतिः वृक्ष-वल्कधारिणी।
महाप्रभा महाचण्डी दीप्तास्या उग्रलोचना।।११।।

महामेघप्रभा विद्या मुक्तकेशी दिगम्बरी।
हसन्मुखी साट्टहासा लोलजिह्वा महेश्वरी।।१२।।

मुण्डाली अभया दक्षा महाभीमा वरोद्यता।
खड्गमुण्डधरा मुक्तिः कुमुदाज्ञाननाशिनी।।१३।।

अम्बालिका महावीर्या सारदा कनकेश्वरी।
परमात्मा परा क्षिप्ता शूलिनी परमेश्वरी।।१४।।

महाकालसमासक्ता शिवाशतनिनादिनी।
घोराङ्गी मुण्डमुकुटा श्मशानास्थिकृताऽऽसना।।१५।।

महाश्मशाननिलया मणिमण्डपमध्यगा।
पानपात्रधृता खर्वा पन्नगी परदेवता।।१६।।

सुगन्धा तारिणी तारा भवानी वनवासिनी।
लम्बोदरी महादीर्घा जटिनी चन्द्रशेखरा।।१७।।

पराऽम्बा परमाराध्या परेशी ब्रह्मरूपिणी।
देवसेना विश्वगर्भा, अग्निजिह्वा चतुर्भुजा।।१८।।

महादंष्ट्रा महारात्रिर्नीला नीलसरस्वती।
दक्षजा भारती रम्भा महामङ्गलचण्डिका॥१९॥

रुद्रजा कौशिकी पूता यमघण्टा महाबला।
कादम्बिनी चिदानन्दा क्षेत्रस्था क्षेत्रकर्षिणी॥२०॥

पञ्चप्रेतसमारूढा ललिता त्वरिता सती।
भैरवी रूपसम्पन्ना मदनानल नाशिनी॥२१॥

जातापहारिणी वार्त्ता मातृका अष्टमातृका।
अनङ्गमेखला षष्ठी हल्लेखा पर्वतात्मजा॥२२॥

वसुन्धरा धरा धारा विधात्री विन्ध्यवासिनी।
अयोध्या मथुरा काञ्ची महैश्वर्या महोदरी॥२३॥

कोमला मानदा भव्या मत्स्योदरी महालया।
पाशांकुशधनुर्बाणा लावण्याम्बुधिचन्द्रिका॥२४॥

रक्तवासा रक्तलिप्ता, रक्तगन्धविनोदिनी।
दुर्लभा सुलभा मत्स्या माधवी मण्डलेश्वरी॥२५॥

पार्वती अमरी अम्बा महापातकनाशिनी।
नित्यतृप्ता निराभासा अकुला रोगनाशिनी॥२६॥

कनकेशी पञ्चरूपा नूपुरा नीलवाहिनी।
जगन्मयी जगद्धात्री अरुणा वारुणी जया॥२७॥

हिंगुला कोटरा सेना कालिन्दी सुरपूजिता।
रामेश्वरी देवगर्भा त्रिस्रोता अखिलेश्वरी॥२८॥

ब्रह्माणी वैष्णवी रौद्री महाकालमनोरमा।
गारूडी विमला हंसी योगिनी रतिसुन्दरी॥२९॥

कपालिनी महाचण्डा विप्रचित्ता कुमारिका।
ईशानी ईश्वरी ब्राह्मी माहेशी विश्वमेहिनी॥३०॥

एकवीरा कुलानन्दा कालपुत्री सदाशिवा।
शाकम्भरी नील-वर्णा महीषासुरमर्दिनी॥३१॥

कामदा कामिनी कुल्ला कुरुकुल्ला विरोधिनी।
उग्रा उग्रप्रभा दीप्ता प्रभा दंष्ट्रा मनोजवा॥३२॥

कल्पवृक्षतलासीना श्रीनाथगुरूपादुका।
अव्याजकरुणामूर्तिरानन्दघनविग्रहा।
अनघा शाङ्करी दिव्या पवित्रा सर्वसाक्षिणी॥३४॥

धनर्बाणगदाहस्ता आयुधा आयुधान्विता।
लोकोत्तरा पद्मनेत्रा योगमाया जटेश्वरी॥३५॥

उग्रचण्डा श्रीचाण्डाली मोहिनी चण्डविक्रमा।
चिन्तनीया महादीर्घा, अमृता मृतबान्धवी॥३९॥

पिनाकधारिणा शिप्रा धात्री त्रिजगदीश्वरी।
रक्तपा रुधिराक्ताङ्गी रक्तखर्पर-धारिणी॥४०॥

त्रिपुरा त्रिकूटा नित्या श्रीनित्या भुवनेश्वरी।
हव्या कव्या लोकगतिर्गायत्री परमा गतिः॥४१॥

विश्वधात्री लोकमाता पञ्चमी पितृतृप्तिदा।
कामेश्वरी कामरूपा, कामबीजा कलात्मिका॥४२॥

ताटङ्कशोभिनी वन्द्या नित्यक्लिन्ना कुलेश्वरी।
भूवरेशी महाराज्ञी अक्षरा अक्षरात्मिका॥४३॥

अनादिबोधा सर्वज्ञा सर्वा सर्वतरा शुभा।
इच्छाज्ञानक्रिया-शक्तिः सर्वाढ्या शर्वपूजिता॥४४॥

श्रीमहासुन्दरी रम्या राज्ञी श्रीपरमाम्बिका।
राजराजेश्वरी भद्रा श्रीमत्त्रिपुरसुन्दरी॥४५॥

त्रिसन्ध्या इन्दिरा ऐन्द्री अजिता अपराजिता।
भेरुण्डा दण्डिनी घोरा इन्द्राणी च
तपस्विनी॥४६॥

शैलपुत्री चण्डघण्टा कूष्माण्डा ब्रह्मचारिणी।
कात्यायनी स्कन्द-माता कालरात्रिः
शुभङ्करी॥४७॥

महागौरा सिद्धिदात्री नवदुर्गा नभःस्थिता।
सुनन्दा नन्दिनी कृत्या महाभागा
महोज्जवला॥४८॥

महाविद्या ब्रह्मविद्या दामिनी तापहारिणी।
उत्थिता उत्पला बाध्या प्रमोदा शुभदोत्तमा॥४९॥

अतुल्या अमूला पूर्णा हसारूढा हरिप्रिया।
सुलोचना विरूपाक्षी विद्युद्गौरी महार्हणा॥५०॥

काकध्वजा शिवाराध्याशूर्पहस्ता कृशाङ्गिनी।
शुभ्रकेशी कोटराक्षी विधवा पतिघातिनी॥५१॥

सर्वसिद्धिकरी दुष्टा क्षुधार्त्ता शिवभक्षिणी।
वर्गात्मिका त्रिकालाज्ञा त्रिवर्गा त्रिदशार्चिता॥५२॥

श्रीमती भोगिनी काशी अविमुक्ता गयेश्वरी।
सिद्धाम्बिका सुवर्णाक्षी कोलाम्बा
सिद्धयोगिनी॥५३॥

देवज्योतिःसमुद्भूता देव-ज्योति स्वरूपिणी।
अच्छेद्या अद्भुता तीव्रा व्रतस्था व्रतचारिणी॥५४॥

सिद्धिदा धूमिनी तन्वी भ्रामरी रक्तदन्तिका।
स्वस्तिका गगना वाणी जाह्नवी भवभामिनी॥५५॥

पतिव्रता महामोहा मुकुटा मुकुटेश्वरी।
गुह्येश्वरी गुह्यमाता चण्डिका गुह्यकालिका॥५६॥

प्रसूतिराकुतिश्चित्ता चिन्ता देवाहुतिस्त्रयी॥५७॥

अनुमतिः कुहू राका सिनीवाली त्विषा रसा।
सुवर्चा वर्चला शार्वी विकेशा कृष्णापिङ्गला॥५८॥

स्वप्नावती चित्रलेखा अन्नपूर्णा चतुष्टया।
पुण्यलभ्या वरारोहा श्यामाङ्गी शशि
शेखरा॥५९॥

हरणी गौतमी मेना यादवा पूर्णिमा अमा।
त्रिखण्डा त्रिमुण्डा मान्या भूतमाता भवेश्वरी॥६०॥

भोगदा स्वर्गदा मोक्षा सुभगा यज्ञरूपिणी।
अन्नदा सर्वसम्पत्तिः सङ्कटा सम्पदा स्मृतिः॥६१॥

वैदूर्यमुकुटा मेधा सर्वविद्येश्वरेश्वरी।
ब्रह्मानन्दा ब्रह्मादात्री मृडानी कैटभेश्वरी॥६२॥

अरुन्धती अक्षमाला अस्थिरा ग्राम्यदेवता।
वर्णेश्वरी वर्णमाता चिन्तापूर्णी विलक्षणा॥६३॥

त्रीक्षणा मङ्गला काली वैराटी पद्ममालिनी।
अमला विकटा मुख्या अविज्ञेया स्वयम्भुवा॥६४॥

ऊर्ज्जा तारावती वेला मानवी च चतुःस्तनी।
चतुर्नेत्रा चतुर्हस्ता चतुर्दन्ता चतुर्म्मुखी॥६५॥

शतरूपा बहुरूपा अरूपा विश्वतोमुखी।
गरिष्ठा गुर्विणी गुर्वी व्याप्या भौमी च
भाविनी॥६६॥

अजाता सुजाता व्यक्ता अचला अक्षया क्षमा।
मारिषा धर्मिणी हर्षा भूतधात्री च धेनुका॥६७॥

अयोनिजा अजा साध्वी शची क्षेमा क्षयङ्करी।
बुद्धिर्लज्जा महासिद्धिः शाक्री शान्ति
क्रियावती॥६८॥

प्रज्ञा प्रीतिः श्रुतिः श्रद्धा स्वाहा कान्तिर्वपुः
स्वधा।
उन्नतिः सन्नतिः ख्यातिः शुद्धिः
स्थितिर्मनस्विनी॥६९॥

उद्यमा वीरिणी क्षान्तिर्मार्कण्डेयी त्रयोदशी।
प्रसिद्धा प्रतिष्ठा व्याप्ता
अनुसूयाऽऽकृतिर्यमा॥७०॥

महाधारा महावीरा भुजङ्गी वलयाकृतिः।
हरसिद्धा सिद्धकाली सिद्धाम्बा सिद्धपूजिता॥७१॥



परानन्दा पराप्रीतिः परातुष्टिः परेश्वरो।
वक्रेश्वरी चतुर्वक्त्रा अनाथा शिवसाधिका॥७२॥

नारायणी नादरूपा नादिनी नर्त्तकी नटी।
सर्वप्रदा पञ्चवक्त्रा कामिला कामिका शिवा॥७३॥

दुर्गमा दुरतिक्रान्ता दुर्ध्येया दुष्परिग्रहा।
दुर्जया दानवी देवी दैत्यघ्नी दैत्यतापिनी॥७४॥

ऊर्जस्वती महाबुद्धिः रटन्ती सिद्धदेवता।
कीर्तिदा प्रवरा लभ्या शरण्या शिवशोभना॥७५॥

सन्मार्गदायिनी शुद्धा सुरसा रक्तचण्डिका।
सुरूपा द्रविणा रक्ता विरक्ता ब्रह्मवादिनी।।७६।।

अगुणा निर्गणा गुण्या त्रिगुणा त्रिगुणात्मिका।
उड्डीयाना पूर्णशैला कामस्था च जलन्धरी।।७७।।

श्मशानभैरवी कालभैरवी कुलभैरवी।
त्रिपुरा भैरवी देवीभैरवी वीरभैरवी।।७८।।

श्रीमहाभैरवी देवी सुखदानन्दभैरवी।
मुक्तिदा भैरवी देवी ज्ञानदान्दभैरवी।।७९।।

दाक्षायणी दक्षयज्ञनाशिनी नगनन्दिनी।
राजपुत्री राजपूज्या भक्तिवश्या सनातनी।।८०।।

अच्युता चर्चिका माया षोडशी सुरसुन्दरी।
चक्रेशी चक्रिणी चक्रा चक्रराजनिवासिनी।।८१।।

नायिका यक्षिणी बोधा बोधिनी मुण्डकेश्वरी।
बीजरूपा चन्द्रभागा कुमारी कपिलेश्वरी।।८२।।

वुद्धाऽतिवृद्धा रसिका रसना पाटलेश्वरी।
माहेश्वरी महाऽऽनन्दा प्रबला अबला बला।।७३।।

व्याघ्राम्बरी महेशानी शर्वाणी तामसी दया।
धरणी धारिणी तृष्णा महामारी दुरत्यया।।७४।।

रङ्गिनी टङ्किनी लीला महावेगा मखेश्वरी।
जयदा जित्वरा जेत्री जयश्री जयशालिनी।।८५।।

नर्मदा यमुना गङ्गा वेन्वा वेणी दृषद्वती।
दशार्णा अलका सीता तुङ्गभद्रा तरङ्गिणी।।८६।।

मदोत्कटा मयूराक्षी मीनाक्षी मणिकुण्डला।
सुमहा महतां सेव्या मायूरी नारसिंहिका।।८७।।

बगला स्तम्भिनी पीता पूजिता शिवनायिका।
वेदवेद्या महारौद्री वेदबाह्या गतिप्रदा।।८८।।

सर्वशास्त्र मयी आर्या अबाङ्मनसगोचरा।
अग्निज्वाला महाज्वाला प्रज्वाला दीप्त
जिह्विका।।८९।।

रञ्जनी रमणी रुद्रा रमणीया प्रभञ्जनी।
वरिष्ठा विशिष्टा शिष्टा श्रेष्ठा निष्ठा कृपा-
वती।।९०।।

ऊर्ध्वमुखी विशालास्या रुद्रभार्या भयङ्करी।
सिंहपृष्ठसमासीना शिवताण्डवदर्शिनी।।९१।।

हैमवती पद्मगन्धा गन्धेश्वरी भवप्रिया।
अणुरूपा महासूक्ष्मा प्रत्यक्षा च मखान्तका।।९२।।

सर्वविद्या रक्तनेत्रा बहुनेत्रा अनेत्रका।
विश्वम्भरा विश्वयोनिः सर्वाकारा सुदर्शना।।९३।।

कृष्णाजिनधरा देवी उत्तरा कन्दवासिनी।
प्रकृष्टा प्रहृष्टा हृष्टा चन्द्रसूर्याग्निभक्षिणी।।९४।।

विश्वेदेवी महामुण्डा पञ्चमुण्डाधिवासिनी।
प्रसादसुमुखी गूढा सुमुखा सुमुखेश्वरी।।९५।।

तत्पदा सत्पताऽत्यर्था प्रभावती दयावती।
चण्डदुर्गा चण्डी देवी वनदुर्गा वनेश्वरी।।९६।।

ध्रुवेश्वरी ध्रुवा ध्रौव्या ध्रुवाराध्या ध्रुवागतिः।
सच्चिदा सच्चिदानन्दा आपोमयी महासुखा।।९७।।

वागीशी वाग्भवाऽऽकण्ठवासिनी वह्निसुन्दरी।
गणनाथप्रिया ज्ञानगम्या च सर्वलोकगा।।९८।।

प्रीतिदा गतिदा प्रेया ध्येया ज्ञेया भयापहा।
श्रीकरी श्रीधरी सुश्री श्रीविद्या श्रीविभावनी।।९९।।

श्रीयुता श्रीमतां सेव्या श्रीमूर्तिः स्त्री स्वरूपिणी।
अनृता सुनृता सेव्या सर्वलोकोत्तमोत्तमा।।१००।।

जयन्ती चन्दना गौरी गर्जिनी गगनोपमा।
छिन्न मस्ता महामत्ता रेणुका वनशङ्करी।।१०१।।

ग्राहिका ग्रासिनी देवभूषणा च कपर्दिनी।
सुमतिस्तपती स्वस्था हृदिस्था मृग लोचना।।१०२।।

मनोहरा वज्रदेहा कुलेशी कामचारिणी।
रक्ताभा निद्रिता निद्रा रक्ताङ्गी रक्तलोचना।।१०३।।

कुलचण्डा चण्डवक्त्रा जण्डोग्रा चण्डमालिनी।
रक्तचण्डी रुद्रचण्डी चण्डाक्षी चण्ड
नायिका।।१०४।।

व्याघ्रास्या शैलजा भाषा देवार्था रणरङ्गिणी।
विल्वपत्रकृतावासा तरुणी शिव मोहिनी।।१०५।।

स्थाणुप्रिया करालास्या गुणदा लिङ्गवासिनी।
अविद्या ममता अज्ञा अहन्ता अशुभा
कृशा।।१०६।।

महिषघ्नी सु दुष्प्रेक्ष्या तमसा भवमोचनी।
पुरहुता सुप्रतिष्ठा रजनी इष्टदेवता।।१०७।।

दुःखिनी कातरा क्षीणा गोमती त्र्यम्बकेश्वरा।
द्वारावती अप्रमेया अव्ययामितविक्रमा॥१०८॥

मायावती कृपामूर्तिः द्वारेशी द्वारवासिनी।
तेजोमयी विश्वकामा मन्मथा पुष्करावती॥१०९॥

चित्रा देवी महाकाली कालहन्त्री क्रियामयी।
कृपामयी कृपाश्रेष्ठा करुणा करुणामयी॥११०॥

सुप्रभा सुव्रता माध्वी मधुघ्नी मुण्डमर्दिनी।
उल्लासिनी महोल्लासा स्वामिनी शर्म
दायिनी॥१११॥

श्रीमाता श्रीमहाराज्ञी प्रसन्ना प्रसन्नानना।
स्वप्रकाश महा भूमा ब्रह्म रूपा
शिवङ्करी॥११२॥

शक्तिदा शान्तिदा कर्मफलदा श्रीप्रदायिनी।
प्रियदा धनदा श्रीदा मोक्षदा ज्ञानदा भवा॥११३॥

भूमानन्दकरी भूमा प्रसीद श्रुतिगोचरा।
रक्तचन्दनसिक्ताङ्गी सिन्दुराङ्कितभालिनी॥११४॥

स्वच्छन्दशक्तिर्गहना प्रजावती सुखावहा।
योगेश्वरी योगाराध्या महात्रिशूलधारिणी॥११५॥

राज्येशी त्रिपुरा सिद्धा, महाविभवशालिनी।
ह्रीङ्कारी शङ्करी शर्वपङ्कजस्था शत -
श्रुतिः॥११६॥

निस्तारिणी जगन्माता जगदम्बा जगद्धिता।
साष्टाङ्गप्रणतिप्रीता भक्तानुग्रहकारिणी॥११७॥

शरणागता दीनार्तपरित्राणपरायणा।
निराश्रयाश्रया दीनतारिणी भक्तवत्सला॥११८॥

दीनाम्बा दीनशरणा भक्तानामभयङ्करी।
कृताञ्जलिनमस्कारा, स्वयम्भु कुसुमार्चिता॥११९॥

कौलतर्पणसम्प्रीता स्वयं भाति विभातिनी।
शतशीर्षानन्तशीर्षा श्रीकण्ठार्धशरीरिणी॥१२०॥

जयध्वनिप्रिया कुलभास्करी कुलसाधिका।
अभयवरदहस्ता सर्वानन्दा च सम्विदा॥१२१॥

महीयसी महामूर्तिः सती राज्ञी भयार्त्तिहा।
ब्रह्ममयी विश्वपीठा प्रज्ञाना महिमामयी॥१२२॥

सिंहारूढा वृषारूढा अश्वारूढा अधीश्वरी।
वराभयकरा सर्ववरेण्या विश्वविक्रमा॥१२३॥

विश्वाश्रया महाभूतिः श्रीप्रज्ञादिस्रगन्विता॥१२४॥

Benefits of reciting the text :

फल श्रुतिः॥
दुर्गा नामसहस्राख्यं स्तोत्रं तन्त्रोत्तमोत्तमम्।
पठनात् श्रवणात् सद्यो नरो मुच्येत सङ्कटात्
॥१॥

अश्वमेधसहस्रानां वाजपेयस्य कोटयः।
सकृत् पाठेन जायन्ते महामायाप्रसादतः॥२॥

य इदं पठति नित्यं देव्यागारे कृताञ्जलिः।
किं तस्य दुर्लभं देवि दिवि भुवि रसातले॥३॥

स दीर्घायुः सुखी वाग्मी निश्चितं पर्वतात्मजे।
श्रद्धयाऽश्रद्धया वापि दुर्गानामप्रसादतः॥४॥

य इदं पठते नित्यं देवीभक्तः मुदान्वितः।
तस्य शत्रुक्षयं याति यदि शक्रसमो भवेत्॥५॥

प्रतिनाम समुच्चार्य स्रोतसि यः प्रपूजयेत्।
षण्मासाभ्यन्तरे देवि निर्धनी धन्वान् भवेत्॥६॥

वन्ध्या वा काकवन्ध्या वा, मृतवत्सा च याऽङ्गना।
अस्य प्रयोगमात्रेण बहु पुत्रवती भवेत्॥७॥

आरोग्यार्थे शतावृत्तिः पुत्रार्थे ह्येकवत्सरम्।
दीप्ताग्निसन्निधौ पाठात् अपापो भवति ध्रुवम्॥८॥

अष्टोत्तरशतेनास्य पुरश्चर्य्या विधीयते।
कलौ चतुर्गुणं प्रोक्तं पुरश्चरणसिद्धये॥९॥

जबा कमलपुष्पं च चम्पकं नागकेशरम्।
कदम्बं कुसुमं चापि प्रतिनाम्ना समर्चयेत्॥१०॥

प्रणवादि नमोऽन्तेन चतुर्थ्यन्तेन मन्त्रवित्।
स्रोतसि पूजयित्वा तु उपहारं समर्पयेत्॥११॥

इच्छा ज्ञान क्रिया सिद्धि निश्चितं गिरि नन्दिनि
देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम्।
स यास्यति न सन्देहो श्रीदुर्गानामकीर्त्तनात्॥१४॥

भजेद् दुर्गां स्मरेद् दुर्गां जपेद् दुर्गां शिवप्रियाम्।
तत्क्षणात् शिवमाप्नोति सत्यं सत्यं वरानने॥१५॥

॥इति तन्त्रराजतन्त्रे श्रीदुर्गासहस्रनामस्तोत्रम्॥

II

श्रीदुर्गा-स्तोत्र-राजम्

मायां जपेद् यस्तव मन्त्र मध्ये,
दुर्गे सदा दुर्गति खेद खिन्नः
भवेत् स भूमौ नृप मौलि माला,
माणिक्य निर्घृष्ट पदारविन्दः॥७॥

चाक्रिकं यदि जपेत् तवाम्बिके,
चक्र मध्य गत ईश्वरेश्वरि
साधको भवति चक्र वर्तिनाम्
नायको नय विलास कोविदः॥८॥

चक्रि वीजमपरं स्मरेच्छिवे,
योऽरि वर्ग विहिताहित व्यथः।
आजि मण्डल गतो जपेद् रिपून्
वाजि वारण रथाश्रितो नरः॥९॥

दूर्वा वीजं यो जपेत् प्रेत भूमौ,
सायं माया भस्मना लिप्त कायः।
गीर्वाणानां नायको देव मन्त्री,
भुक्त्वा राज्यं प्राज्य प्राज्यं करोति॥१०॥

माया वीज (ह्रीं) से अभिमन्त्रित भस्म।
वायव्य वीजं यदि साधको जपेत्
प्रिया कुच द्वनद्व विमर्दन क्षमः।
समस्त कान्ता जन नेत्र वागुरैः,
विलास हंसो भवितां स पार्वति॥११॥

विश्व विश्वेश्वरि ! यदि जपेत् काम वेला कलार्तो
रात्रौ मात्राक्षर विलसित न्यास ईशानि मातः !
तस्य स्मेरानन सरसिज भ्राजमानाङ्ग लक्ष्मी -
र्वश्याऽवश्यं सुर पुर वधू मौलि मालोर्वशी
सा॥१२॥

भू गेहाञ्चित सत् त्रिवृत्त विलसन्नागार
वृत्ताञ्चितव्यग्रारोल्लसिताग्नि कोण विलसच्छ्रीविन्दु
पीठ स्थितां। ध्यायेच्चेतसि शर्व पत्नि ! भवतीं
माधवी रसाघूर्णितां, यो मन्त्री स भविष्यति स्मर
समः स्त्रीणां धरण्यां दिवि॥१३॥

दुर्गा स्तवं मनु मयं मनु राज मौलि
र्माणिक्यमुत्तम शिवाङ्ग रहस्य भूतम्।
प्रातः पठेद् यदि जपावसरेऽर्चनायाम्,
भूमौ भवेत् स नृपतिर्दिवि देव नाथः॥१४॥

इति स्तोत्रं महा पुण्यं, पञ्चाङ्गैक शिरो मणिम्।
यः पठेदर्ध रात्रे तु, तस्य वश्यं जगत् त्रयम्॥१५॥

III

श्रीदुर्गाषोडशनामस्तोत्रम्।।

This stotra enumerating Durgā's sixteen names and also explaining how the names came about is from *Brahma-vaivarta-purāṇa*. It is in the form of a dialogue between the sage Nārada and Brahmā.

।।नारद उवाच।।
सर्वाख्यानं श्रुतं ब्रह्मन् अतीव परमाद्भुतम्।
अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमुत्तमम्।।१।।

दुर्गा नारायणैशाना विष्णुमाया शिवा सती।
नित्या सत्या भगवती शर्वाणी सर्वमङ्गला।।२।।

अम्बिका वैष्णवी गौरी पार्वती च सनातनी।
नामानि कौथुमोक्तानि शुभानि शुभदानि च ।।३।।

अथ षोडशनाम्नां च सर्वेषामीप्सितप्रदम्।
ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्वसम्भृतम्।।४।।

केन वा पूजिता साऽऽदौ द्वितीये केन वा पुरा
तृतीये वा चतुर्थे वा केन वा सर्वपूजिता।।५।।

अथ षोडशनाम्नां च विष्णुर्वेदे चकार सः।
पुनः पृच्छसि ज्ञात्वा च कथयामि यथाऽऽगमम्।।६।।

दुर्गे दैत्यमहाविघ्ने भववद् दुर्गे कर्मणि ।
शोके दुःखे च नरके यमदण्डे च जन्मनि।।७।।

महाभयेऽति रोगे वै चाशब्दो हन्तृवाचकः।
एतान् हन्त्येव या देवी सा दुर्गा परिकीर्तिता।।८।।

यशसा तेजसा रूपैर्नारायणसमा गुणैः।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता।।९।।

ईशानः सर्वसिद्धार्थश्चाशब्दो दातृवाचकः।
प्रिये दातरि चाशब्दः शिवा तेन प्रकीर्तिता।।१०।।

सद्बुद्ध्यधिष्ठातृ देवी विद्यामाना युगे युगे।
सृष्टा माया पुरा सृष्टा विष्णुना परमात्मना।।११।।

मोहितं च यया विश्वं विष्णुमाया च कीर्तिता।
शिवा कल्याणरूपा च शिवदा च शिव
प्रिया।।१२।।

प्रिये दातरि चाशब्दः शिवा तेन प्रकीर्तिता।
पतिव्रता सुशीला या सा सती परिकीर्तिता॥१३॥

यथा नित्यो हि भगवान् नित्या भगवती तथा।
स्वमायया तिरोभूता तन्त्रेशे प्राकृते लये॥१४॥

आब्रह्मस्तम्बपर्यन्तंसर्वं मिथ्यैव कृत्रिमम्।
दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान् यथा॥१५॥

सिद्धैश्वर्यादिकं सर्वं यस्यामस्ति युगे युगे।
सिद्धादिके भगो ज्ञेयस्तेन भगवती स्मृता॥१६॥

सर्वान् मोक्षं प्राकल्पयति जन्ममृत्युजरादिकम्।
चराचरां च स्वस्थानं शर्वाणी तेन किर्तिता॥१७॥

मङ्गलं मोक्षवचनं चाशब्दो दातृवाचकः।
सर्वान् मोक्षाय ददति सा एवं सर्वमङ्गला॥१८॥

अम्बेति मातृवचना वन्दने पूजनेऽपि च।
पूजिता वन्दिता माता जगतां तेन साम्बिका॥१९॥

हर्षे सम्पत्ति कल्याणे मङ्गलं परिकीर्तितम्।
तान् ददाति च सा देवी सा एवं सर्व-
मङ्गला॥२०॥

विष्णुभक्तिर्विष्णुरूपाविष्णोः शक्तिस्वरूपिणी।
सृष्टौ च विष्णुना सृष्टा वैष्णवी तेन कीर्तिता॥२१॥

गौरपीते च निर्लिप्ते परे ब्रह्मणि निर्मले।
तस्यात्मनः शक्तिरियं गौरीति तेन कीर्तिता॥२२॥

गुरुः शम्भुश्च सर्वेषां तस्य शक्तिः प्रिया सती।
गुरुः कृष्णश्च तन्माया गौरीति तेन कीर्तिता॥२३॥

तिथिभेदे कल्पभेदे सर्ववेदप्रभेदके।
तद्धातौ तेषु विख्याता पार्वती तेन कीर्तिता॥२४॥

पर्वतस्य सुता देवी साविर्भूता च पर्वते।
पर्वताधिष्ठातृदेवी पार्वती तेन कीर्तिता॥२५॥

सर्वकाले सना प्रोक्ता, विद्यामाना सनातनी।
सर्वत्र सर्वकाले सा विद्यमाना सनातनी॥२६॥

अर्थः षोडश नाम्नां च कीर्तितश्च महामुने।
यथाऽऽगमं च वेदोक्तमाख्यानं च निशामय॥२७॥

प्रथमे पूजिता सा च, कृष्णेन परमात्मना।
वृन्दावने च सृष्ट्यादौ गोलोके रास मण्डले॥२८॥

मधुकैटभभीतेन ब्रह्मणा सा द्वितीयके।
त्रिपुरप्रेरितेनैव तृतीये त्रिपुरारिणा॥२९॥

सृष्टा श्रिया महेन्द्रेण शापाद् दुर्वाससः पुरा।
चतुर्थे पूजिता देवी भक्त्या भगवती सती॥३०॥

तदा मुनीन्द्रैः सिद्धेन्द्रैर्मनुना नरः।
पूजिता सर्वविश्वेषु बभूव सर्वतः सदा॥३१॥

तेजस्सु सर्वदेवानां साऽऽविर्भूता पुरा मुने।
सर्वेदेवा ददुस्तस्यै शस्त्राणि भूषणानि च ॥३२॥

दुर्गादयश्च दैयाश्च निहता गदया तया।
दत्तं स्वराज्यं देवेभ्यो वरं च यदभीप्सितम्॥३३॥

कल्पान्तरे पूजिता सा, सुरथेन महात्मना।

॥ इति ब्रह्मवैवर्तपुराणे श्रीदुर्गाषोडशनाम स्तोत्रम्॥

IV

श्रीदुर्गाहृदयम्

।देवा ऊचुः॥

This stotra called the Heart of Durgā is taken from *Durgā-tantra*. She is here extolled as the one supreme and transcendental divine principle responsible for all phenomenal occurrences. The prayer is ascribed to the celestial residents.

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्म फलेषु जुष्टाम्।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरां नाशय ते नमः॥

देवीमम्बामजनयन्त देवास्तां विश्वरूपां पशवो वदन्ति।
सा नो मन्द्रेषमूर्जंदुहाना धेनुर्वागस्मानुपसुष्टुतैतु॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव।
तां देवा अन्वजायन्त भद्रा अमृतबन्धवः।।
अनन्तां विजयां शुद्धांशरण्यां शिवदां शुभाम्।
वियदाकारसंयुक्तांवीतिहोत्रसमन्वितम्।।

अर्द्धेन्दु लसितं देव्या बीजं सर्वार्थसाधकम्।
एवमेकाक्षरं मन्त्रं कवयः शुद्ध चेतसः।।

ध्यायन्ति परमानन्दमयाः ज्ञानाम्बुराशयः।
वाङ्मायाब्रह्मभूस्तस्मादष्टवक्त्रसमन्वितम्।।

सूर्यो वामश्रोत्रं विन्दुः संयुक्ताष्टात् तृतीयकः।
नारायणेन सम्मिश्रो वाद्यश्चाधरयुक्त यः।।

विच्चे नवार्णकोणः स्यात् महाऽऽनन्दप्रदायकः।
एतेन सवसिद्धिः स्यादेतन्मे निश्चयं ध्रुवम्।।

हृत् पुण्डरीकमध्यस्थां प्रातःसूर्य समप्रभाम्।
पाशांकुशधरां सौम्यां वरदाभयहस्तकाम्।।

त्रिनेत्रां रक्तवसनां भक्तकामदुहां भजे।
भजामि त्वां महादेवीं महाभयविनाशिनीम्।।

महादारिद्र्यशमिनी महारूपा महोत्कटा।
अनन्ता त्वमलक्ष्यां त्वं एका सर्वत्र वर्तते।।

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी।।

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता।
तां दुर्गा दुर्गमां देवीं दुराचारविनाशिनीम्।।

नमामि भवभीतोऽहं संसारार्णवतारिणीम्।
महादुर्गाणि तरामि महादेव्याः प्रसादतः।।

।।इति दुर्गातन्त्रे श्रीदुर्गाहृदयम्।।

V

परशुरामकृतश्रीदुर्गास्तोत्रम्।।

This eulogy of Durgā occurs in *Mahābhārata*. It is ascribed to Paraśu-rāma, an incarnation of Vishṇu as the son of the sage Jamadagni. In 54 verses (ślokas), this stotra sets the scene for the appearance of Durgā in Kṛshṇa's Goloka heaven. Paraśurāma is here spoken of as a devotee of Krshṇa and disciple of Śiva.

श्रीकृष्णस्य च गोलोकपरिपूर्णतमस्य च।
आविर्भूता विग्रहतः परासृष्ट्युन्मुखस्य च।।१।।

सूर्यकोटिप्रभायुक्ता रत्नालङ्कारभूषिता।
वह्नियुद्धांशुकाधाना सस्मिता सुमनोहरा।।२।।

नवयौवन सम्पन्ना सिन्दुरविन्दुशोभिता।
ललिता कबरीभारमालतीमाल्यमण्डिता।।३।।

अहोऽनिर्वचनीया त्वं चार्वी मूर्ति च विभ्रती।
मोक्षप्रदा मुमुक्षूणां जगत्कर्त्ता विधिः स्वयं।।४।।

मुमोह क्षणमात्रेण दुष्ट्वा त्वां सर्वमोहिनीं।
रासे सम्भूय सहसा सस्मिताऽऽराधिता पुरा।।५।।

सद्भिः ख्याता तेन राधा मूल-प्रकृतिरीश्वरी।
कृष्णस्त्वां सहसाऽऽज्ञाय वीर्याधानं चकार ह।।६।।

ततोऽण्डमम्भसो जज्ञे यतो भूतो महाविराट्।
यस्यैव लोमकूपेषु ब्रह्माण्डाद्यखिलानि च।।७।।

तच्छृङ्गारश्रमेणैव त्वन्निःश्वासो बभूव ह।
ततस्त्वं पञ्चधा भूय पञ्चमूर्तीश्च बिभ्रती।।८।।

प्राणाधिष्ठात्री या मूर्तिः कृष्णस्य परमात्मनः।
कृष्णप्राणाधिकां राधां तां वदंति पुराविदः।।९।।

वेदाधिष्ठात्री या मूर्तिर्वेदशास्त्रप्रसूरपि।
तां सावित्रीं शुद्ध रूपां प्रवदन्ति मनीषिणः।।१०।।

ऐश्वर्याधिष्ठात्री मूर्तिर्या शांतिः शांतिरूपिणी।
लक्ष्मीं वदंति संतस्तां शुद्धसत्त्व स्वरूपिणीं।।११।।

रागाधिष्ठात्री या देवी शुक्ल-मूर्तिः सतां प्रसूः।
सरस्वतीं तां शास्त्रज्ञाः प्रवदन्ति बुधा भुवि॥१२॥

बुद्धिर्विद्या सर्वशक्तिर्ज्या मुक्तिरधिदेवता।
सर्वमङ्गलरूपा त्वं सर्व मङ्गलकारिणी॥१३॥

सर्व मङ्गलवीजस्य शिवस्य मन्दिरेऽधुना।
शिवे शिवस्वरूपा त्वं लक्ष्मी
नारायणान्तिके॥१४॥

सरस्वती च सावित्री वेदसूर्ब्रह्मणः प्रिया।
राधा रासेश्वरस्यैव परिपूर्णतमस्य च॥१५॥

परमानन्दरूपाऽसि छायाचन्द्रस्य रोहिणी।
शची शक्रस्य कामस्य कामिनी रतिरीश्वरी॥१६॥

वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा।
वह्नेः प्रिया या स्वाहा च कुबेरस्य च
सुन्दरी॥१७॥

यमस्य च सुशीला वै नैऋतस्य च कोटवी।
ईशानस्य शशिकला, शतरूपा मनोः प्रिया॥१८॥

देवहूतिः कर्दमस्य वसिष्ठस्याप्यरुन्धती।
अदितिर्देवमाता या मुद्राऽगस्त्यमुनेः प्रिया॥१९॥

अहल्या गौतमस्यापि सर्वाधारा वसुन्धरा।
गङ्गा च तुलसी चापि पृथिव्या याः सरिद्
वराः॥२०॥

एताः सर्वाश्च या अन्याः सर्वास्त्वत्कलयाम्बिके।
गृहलक्ष्मीर्गृहे नृणां राजलक्ष्मीश्च राजसु॥२१॥

तपस्विनां तपस्या त्वं गायत्री ब्राह्मणस्य च।
सतां सत्यस्वरूपा त्वं ह्यसतां कलहांकुरा॥२२॥

ज्योतिरूपा निर्घृणस्य शक्तिस्त्वं स गुणस्य च।
सूर्ये प्रभास्वरूपा त्वं दाहिका च हुताशने॥२३॥

जले सत्यस्वरूपा च शोभारूपा निशाकरे।
त्वं भूमौ गन्धरूपा च गगने शब्दरूपिणी॥२४॥

स्मृतिर्मेधा च बुद्धिर्वाग् ज्ञानशक्तिर्विपश्चितां।
कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसूः शुभा॥२५॥

शूलिने कृपया सा त्वं यतो मृत्युञ्जयः शिवः।
सृष्टिपालनसंहारशक्तयस्त्रिविधाश्च याः॥२६॥

ब्रह्मा विष्णु महेशानां सा त्वमेव नमोऽस्तु ते॥२७॥

मधुकैटभभीत्या च त्रस्तो धाता प्रकंपितः।
स्तुत्वा मुमोच यां देवीं तां मूर्ध्ना प्रणमाम्यहम्॥२८॥

मधुकैटभयोर्युद्धे प्राप्तोऽसौ विष्णुरीश्वरीं।
बभूव शक्तिमान् स्तुत्वा यां दुर्गां प्रणमाम्यहम्॥२९॥

त्रिपुरस्य महायुद्धे सरथे पतिते शिवे।
यां तुष्टुवः भ्र दुर्गां तां नमाम्यहम्॥३१॥

कालचक्रं च जगति शश्वद् भ्रमति वेगतः।
मृत्युश्चरति जन्त्वोघे तां दुर्गां प्रणमाम्यहम्॥३२॥

स्रष्टा सृजति सृष्टं च पाता पाति यदाज्ञया।
संहर्ता हरते काले तां दुर्गां प्रणमाम्यहम्॥३३॥

ज्योतिःस्वरूपो भगवांच्छ्री कृष्णो निर्गुणः स्वयं।
यया विना न शक्तश्च सृष्टिं कर्तुं नमामि ताम्॥३३॥

रक्ष रक्ष जगन्मातस्त्वपराधान् क्षमस्व मे।
शिशूनामापराधेन जातु माता न कुप्यति॥३४॥

इत्युक्त्वा पर्शुरामश्च प्रणम्य तां रुरोद च।
तुष्टा दुर्गा सम्भ्रमेण चाभयं सा वरं ददौ॥३५॥

अमरो भव रे पुत्र वत्स सुस्थिरतां व्रज।
मम प्रसादात् सर्वत्र जयोऽस्तु तव सन्ततम्॥३६॥

सर्वान्तरात्मा भगवांस्तुष्टोऽस्तु सततं हरिः।
भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ॥३७॥

इष्ट देवे गुरौ यस्य भक्तिर्भवति शाश्वती।
तं हन्तुं नहि शक्ता वै रुष्टाश्च सर्वदेवताः॥३८॥

श्रीकृष्णस्य च भक्तस्त्वं शिष्यस्त्वं शंकरस्य च।
गुरुपत्न्याश्च भक्तो हि कस्त्वां हन्तुं महेश्वरः॥३९॥

अहो न कृष्णभक्तानामशुभं विद्यते क्वचित्।
अन्य देवेषु भक्ता वा न भक्ता वा निरंकुशाः॥४०॥

चंद्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो।
तेषां तारागणा रुष्टाः किं कुर्वन्ति च दुर्बलाः॥४१॥

यस्य तुष्टः सभायां चेन्नरदेवो महान् सखा।
तस्य किं वा करिष्यंति रुष्टा भृत्याश्च दुर्बलाः॥४२॥

इत्युक्त्वा पार्वती तुष्टा दत्वा रामाय चाशिषम्।
जगन्मातुः पुरस्तूर्णं जय शब्दो बभूव ह॥४३॥

॥ फलश्रुतिः ॥

कण्वशाखोक्तस्तोत्रं च पूजाकाले हि यः
पठेत्।
यात्राकाले च प्रातर्वा वांछितार्थं लभते सः॥४४॥

पुत्रार्थी लभते पुत्रं कन्यार्थी लभते सुताम्।
विद्यार्थी लभते विद्यां प्रजार्थी लभते प्रजाम्॥४५॥

भ्रष्टराज्यो व्रजेद् राज्यं धनुं भ्रष्टधनो व्रजेत्॥४६॥

यस्य तुष्टो गुरुर्देवो राजानो बान्धवास्तथा।
तस्य तुष्टाश्च वरदाः स्तोत्रराजप्रसादतः॥४७॥

दस्युग्रस्तो हिंसग्रस्तः शत्रुग्रस्तो भयानकः।
व्याधिग्रस्तो भवेन्मुक्तः स्तोत्रस्मरण मात्रतः॥४८॥

राजद्वारे श्मशाने च कारागारे च बन्धने।
जलराशौ निमग्नश्च मुक्तो भवति मानवः॥४९॥

स्वामिभेदे पुत्रभेदे, मित्रभेदेऽतिदारुणे।
स्तोत्रस्मरणमात्रेण, वाञ्छितार्थं लभेत सः॥५०॥

कृत्वा हविष्यं वर्षं च, स्तोत्रराजं श्रृणोति या।
भक्तया दुर्गां च सम्पूज्य महावन्ध्या प्रसूयते॥५१॥

लभते सा दिव्यपुत्रं ज्ञानिनं चिरजीविनम्।
असौभाग्या च सौभाग्यं षण्मासश्रवणाद्
व्रजेत्॥५२॥

नवमासं काकवन्ध्या मृतवत्सा च भक्तितः।
स्तोत्रंराजं या श्रृणोति सा पुत्रं लभते ध्रुवं॥५३॥

कन्यामाता पुत्रहीना पञ्चमासं श्रृणोति या।
घटे सम्पूज्य दुर्गां च सा पुत्रं लभते ध्रुवम्॥५४॥

॥इति श्रीपरशुरामप्रोक्तं दुर्गास्तोत्रं॥

VI

युधिष्ठिर कृतं श्रीदुर्गा स्तोत्रम्।।

This prayer to Durgā occurs in the Virāṭa-parva section of *Mahābhārata*. Yudhishṭhira, the eldest of the Pāṇḍavas, appeals to Durgā and Durgā grants him the power to succeed in vanquishing

the Kauravas. This was when the Pāṇḍavas were living in the city of Virāṭa.

विराटनगरं रम्यं गच्छमानो युधिष्ठिरः।
अस्तुवन् मनसा देवीं दुर्गां त्रिभुवनेश्वरीम्।।१।।

यशोदागर्भसम्भूतां नारायणवरप्रियाम्।
नन्दगोपकुले जातां मङ्गल्यां कुलवर्धिनीम्।।२।।

कंसविद्रावणकरीमसुराणां क्षयङ्करीम्।
शिलातटविनिक्षिप्तामाकाशं प्रतिगामिनीम्।।३।।

वासुदेवस्य भगिनीं दिव्यमाल्यविभूषिताम्।
दिव्याम्बरधरां देवीं खड्गखेटकधारिणीम्।।४।।

भारावतरणे पुण्ये ये स्मरन्ति सदा शिवाम्।
तान् वै तारयते पापात् पङ्कगामिव दुर्बलाम्।।५।।

स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्रसम्भवैः।
आमन्त्र्य दर्शनाकांक्षी राजा देवीं सहानुजः।।६।।

युधिष्ठिर उवाच॥

नमोऽस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि।
बालाके सदृशाकारे पूर्णचन्द्रनिभानने॥१॥

चतुर्भुजे चतुर्वक्त्रे पीनश्रोणिपयोधरे।
मयूरपिञ्छवलये केयूराङ्गदधारिणी॥२॥

भासि देवि यथा पद्मा नारायणपरिग्रहः।
स्वरूपं ब्रह्मचर्यं च विशदं तव खेचरि॥३॥

कृष्णच्छविसमा कृष्णा सङ्कर्षणसमानना।
बिभ्रती विपुलौ बाहू शक्रध्वजसमुच्छ्रयौ॥४॥

पात्री च पङ्कजी घण्टी स्त्री विशुद्धा च या भुवि।
पाशं धनुर्महाचक्रं विविधान्यायुधानि च॥५॥

कुण्डलाभ्यां सुपुर्णाभ्यां कर्णाभ्यां च विभूषिता।
चन्द्रविस्पर्धिना देवि मुखेन त्वं विराजसे॥६॥

मुकुटेन विचित्रेण केशबन्धेन शोभिना।
भुजङ्गाभोगवासेन श्रोणिसूत्रेण राजता॥७॥

विभ्रजसे चाऽऽवबध्देन भोगेनेवेह मन्दरः।
ध्वजेन शिखिपिञ्छानामुच्छ्रितेन विराजसे॥८॥

कौमारं व्रतमास्थाय त्रिदिवं पावितं त्वया।
तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च॥९॥

त्रैलोक्यरक्षणार्थाय महिषासुरनाशिनि।
प्रसन्ना मे सुरश्रेष्ठे दयां कुरु शिवा भव॥१०॥

जया त्वं विजया चैव संग्रामे च जयप्रदा।
ममापि विजयं देहि वरदा त्वं च साम्प्रतम्॥११॥

विन्ध्ये चैव नगश्रेष्ठे, तव स्थानं हि शाश्वतम्।
कालिकालि महाकालि शीधुमांसपशु प्रिये॥१२॥

कृतानुयात्रा भूतैस्त्वं वरदा कामचारिणी॥१३॥

भारावतारे ये च त्वां संस्मरिष्यन्ति मानवाः।
प्रणमन्ति च ये त्वां हि प्रभाते तु नरा भुवि॥

न तेषां दुर्लभं किञ्चित् पुत्रतो धनतोपि वा॥१४॥

दुर्गात् तारयसे दुर्गे तत् त्वं दुर्गा स्मृता जनैः।
कान्तारेष्वसन्नानां त्वं गतिः परमा नृणाम्॥१५॥

जलप्रतरणे चैव कान्तारेष्वटवीषु च।
ये स्मरन्ति महादेवि न च सीदन्ति ते नराः॥१६॥

त्वं कीर्तिः श्रीर्धृतिः सिद्धिर्ह्रीर्विद्या सन्ततिर्मतिः।
सन्ध्या रात्रिः प्रभा निद्रा ज्योत्स्ना कान्तिः क्षमा
दया॥१७॥

नृणां च बन्धनं मोहं पुत्रनाशं धनक्षयम्।
व्याधिं मृत्युं भयं चैव पूजिता नाशयिष्यसि॥१८॥

सोऽहं राज्यात् परिभ्रष्टः शरणं त्वां प्रपन्नवान्।
प्रणतश्च यथा मूर्ध्नि तव देवि सुरेश्वरि ॥१९॥

त्राहि मां पद्मपत्राक्षि सत्ये सत्या भवस्व नः।
शरणं भव मे दुर्गे शरण्ये भक्तवत्सले॥२०॥

वैशम्पायन उवाच॥
एवं स्तुता हि सा देवि दर्शयामास पाण्डवम्।
उपागम्य तु राजानमिदं वचनमब्रवीत्॥२१॥

श्रीदेव्युवाच॥
श्रुणु राजन् । महाबाहो मदीयं वचनं प्रभो।
भविष्यत्यचिरादेव संग्रामे विजयस्तव॥२२॥

मम प्रसादान्निर्जित्य हत्वा कौरववाहिनीम्।
राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं
पुनः॥२३॥

भ्रातृभिः सहितो राजन् प्रीतिं प्राप्स्यसि पुष्कलाम्।
मत् प्रसादाच्च ते सौख्यमारोग्यं च
भविष्यति॥२४॥

ये च सङ्कीर्तयिष्यन्ति लोके विगतकल्मषाः।
तेषां तुष्टा प्रदास्यामि राज्यमायुर्वपुः सुतम्॥२५॥

प्रवासे नगरे वाऽपि संग्रामे शत्रुसङ्कटे।
अटव्यां दुर्गकान्तारे सागरे गहने गिरौ॥२६॥

ये स्मरिष्यन्ति मां राजन् यथाऽहं भवता स्मृता।
न तेषां दुर्लभं किञ्चिदस्मिन् लोके भविष्यति॥२७॥

इदं स्तोत्रं वरं भक्त्या श्रुणुयाद् वा पठते वा।
तस्य सर्वाणि कार्याणि सिद्धिं यास्यन्ति
पाण्डवाः॥२८॥

मत् प्रसादाच्च वः सर्वान् विराटनगरे स्थितान्।
न प्रज्ञास्यन्ति कुरवो नरा वा तन्निवासिनः ॥२९॥

वैशम्पायन उवाच॥
इत्युक्त्वा वरदा देवी युधिष्ठिरमरिन्दमम्।
रक्षां कृत्वा च पाण्डूनां तत्रैवान्तरधीयत॥३०॥

॥श्रीमहाभारते विराट्पर्वे श्रीदुर्गास्तोत्रं सम्पूर्णम्॥

VII

श्री अर्जुनकृत दुर्गास्तवन

।।सञ्जय उवाच।।

This stotra, eulogizing Durgā, also occurs in the Bhīshma-parva section of *Mahābhārata.* It is said to have been uttered by Arjuna on the battle-field, just before the commencement of the great war, at the instance of Krshṇa, his charioteer. Arjuna's prayer is related to Dhṛtarashṭra by Sañjaya, as in *Bhagavad-gītā.*



धातराष्ट्र बलं दृष्ट्वा, युद्धाय समुपस्थितम्।
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत्।।१।।

।।श्रीभगवानुवाच।।
शुचिर्भूत्वा महाबाहो, संग्रामाभिमुखे स्थितः।
पराजयाय शत्रूणां दुर्गास्तोत्रमुदीरय।।२।।

।।सञ्जय उवाच।।
एवमुक्तोऽर्जुनः संख्ये वासुदेवेन धीमता।
अवतीर्य रथात् पार्थः स्तोत्रमाह कृताञ्जलिः।।३।।

।।अर्जुन उवाच।।
नमस्ते सिद्ध सेनानि आर्ये मन्दरवासिनि।
कुमारि कालि कापालि कपिले कृष्णपिङ्गले।।४।।

भद्रकालि नमस्तुभ्यं महाकालि नमोऽस्तु ते।
चण्डिचण्डे नमस्तुभ्यं तारिणि वरवर्णिनि।।५।।

कात्यायनि महाभागे करालि विजये जये।
शिखिपिच्छध्वजधरे नानाभरणभूषिते।।६।।

अट्टशूलप्रहरणे खड्गखेटकधारिणि।
गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे।।७।।

महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि।
अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये।।८।।

उमे शाकम्भरि श्वेते कृष्णे कैटभनशिनि।
हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते।।९।।

वेदश्रुति महापुण्ये ब्रह्मण्ये जातवेदसि।
जम्बूकटकचैत्येषु, नित्यं सन्निहितालये।।१०।।

त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति दुर्गे कान्तारवासिनि।।११।।

स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती।
सावित्री वेद माता च तथा वेदान्त उच्यते।।१२।।

स्तुताऽसि त्वं महा देवि । विशुद्धेनान्तरात्मना।
जयो भवतु मे नित्यं त्वत् प्रसादाद् रणाजिरे।।१३।।

कान्तारभयदुर्गेषु, भक्तानां चालयेषु च।
नित्यं वससि पाताले युद्धे जयसि दानवान्।।१४।।

त्वं जम्भिनी मोहिनी च माया ह्रीः श्रीस्तथैव च।
सन्ध्या प्रभावती चैव सावित्री जननी तथा।।१५।।

तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चन्द्रादित्यविवर्धिनी।
भूतिर्भूति मतां संख्ये वीक्ष्यसे सिद्धचारणैः।।१६।।

।।सञ्जय उवाच।।
ततः पार्थस्य विज्ञाय भक्तिं मानववत्सला।
अन्तरिक्ष गतोऽवाच गोविन्दस्याग्रतः स्थिता।।१७।।

।।देव्युवाच।।
स्वल्पेनैव तु कालेन शत्रून् जेष्यसि पाण्डव।
नरस्त्वमसि दुर्धर्ष नारायणसहायवान्।।१८।।

अजेयस्त्वं रणेऽरीणामपि वज्रभृतः स्वयम्।
।।सञ्जय उवाच।।
इत्येवमुक्त्वा वरदा क्षणेनान्तरधीयत।।१९।।

लब्ध्वा वरं तु कौन्तेयो मेने विजयमात्मनः।
आरुरोह ततः पार्थो रथं परमसम्मतम्।।२०।।

कृष्णार्जुनावेकरथौ दिव्यौ शङ्खौ प्रदध्मतुः।

।।फलश्रुतिः ।।
य इदं पठते स्तोत्रं कल्य उत्थाय मानवः।।२१।।

यक्षरक्षःपिशाचेभ्यो न भयं विद्यते सदा।
न चापि रिपवस्तेभ्यः सर्पाद्या ये च दंष्ट्रिणः।।२२।।

न भयं विद्यते तस्य सदा राजकुलादपि।
विवादे जयमाप्नोति बद्धो मुच्येत बन्धनात्।।२३।।

दुर्गं तरति चावश्यं तथा चोरैर्विमुच्यते।
संग्रामे विजयेन्नित्यं लक्ष्मीं प्राप्नोति केवलाम्।।२४।।

आरोग्यबलसम्पन्नो जीवेद् वर्षशतं तथा।
एतद् दृष्टं प्रसादात्तु मया व्यासस्य धीमता।।२५।।

।।इति श्रीमन्महाभारते भीष्मपर्वणि श्रीदुर्गा स्तत्रम्।।



VIII

श्री दुर्गास्तोत्रम्

पूर्व-पीठिका

।।नारद उवाच।।

श्रुतं सर्वं नावशिष्टं किञ्चिदेव हि निश्चितम्।
प्रकृतेः कवचं स्तोत्रं ब्रूहि मे मुनिसत्तम।।१।।

पुरा स्तुता स गोलोके कृष्णेन परमात्मना।
सम्पूज्य मधुमांसेन प्रीतेन रासमण्डले।।२।।

मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे।।३।।

चतुर्थे संस्तुता देवी भक्त्या च त्रिपुरारिणा।
पुरा त्रिपुरयुद्धे च महाघोरतरे रणे।।४।।

पञ्चमे संस्तुता देवी वृत्रासुरवधे तथा।
शक्रेण सर्वेर्देवैश्च घोरे च प्राणसङ्कठे।।५।।

तदा मुनीन्द्रैर्मुनिभिर्मानवैः सुरथादिभिः।
संस्थिता पूजिता सा च कल्पे कल्पे परात्परा।।६।।

स्तोत्रं च श्रूयतां ब्रह्मन् सर्वविघ्नविनाशनम्।
सुखदं मोक्षदं सारं भवाब्धेः पारकारणम्।।७।।

त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी।
त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका॥८॥

कार्यार्थे सुगुणा त्वं च वस्तुतो निर्गुणा स्वयम्।
परब्रह्मस्वरूपा त्वं सत्या नित्यास्वरूपिणी॥९॥

निजस्वरूपा परमा भक्तानुग्रहविग्रहा।
सर्वस्वरूपा सर्वाणी सर्वाधारा परात्परा॥१०॥

सर्व बुद्धि स्वरूपा च सर्वशक्तिस्वरूपिणी।
सर्वज्ञा सर्वतोभद्रा सर्वमङ्गलमङ्गला॥११॥

सर्वबीजस्वरूपा च सर्वपूज्या निराश्रया।
सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी॥१२॥

त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम्।
दक्षिणा सर्वदाने च सर्वकर्मणि सन्ततम्॥१३॥

निद्रा त्वं दया त्वं च कृष्णां त्वं चात्मनश्च मे।
तत्क्षान्तिः शांतिरीशा च कान्तिस्तुष्टिश्च
शाश्वती॥१४॥

शुद्धा पुष्टिश्च तन्द्रा च लज्जा शोभा प्रभा सदा।
सतां सम्पत् स्वरूपा श्रीर्विपत्तिरसतामिह॥१५॥

प्रीतिरूपा पुण्यवतां पापिनां कलहांकुरा।
शश्वत्कर्ममयो शक्तिः सर्वदा सर्व जीविनाम्॥१६॥

देवेभ्यः स्वपदं दात्री धातुर्धात्री कृपामयी।
कृता या सर्वदेवानां सर्वासुरविनाशिनी॥१७॥

योगनिद्रा योगरूपा, योगदात्री च योगिनाम्।
सिद्धिस्वरूपा सिद्धानां सिद्धिदा सिद्ध
योगिनी॥१८॥

माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी।
भद्रदा भद्रकाली च सर्वलोकभयङ्करी॥१९॥

ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे।
सतां किर्तिः प्रतिष्ठा च निन्दा त्वमसतां
सदा॥२०॥

महायुद्धे महामारी, दुष्टसंहाररूपिणी।
रक्षास्वरूपा शिष्टानां मातेव हितकारिणी॥२१॥

वन्द्या पूज्या स्तुता त्वं च ब्रह्मादीनां च सर्वदा।
ब्राह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम्।२२॥

विद्या विद्यावतां त्वं च बुद्धिर्बुद्धि मतां सताम्।
मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावताम्॥२३॥

राज्ञां प्रतापरूपा च विशां वाणिज्यरूपिणी।
सृष्टौ सृष्टिस्वरूपा त्वं रक्षारूपा च पालने॥२४॥

तथाऽन्ते त्वं महामारी विश्वे विश्वैश्च पूजिते।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च मोहिनी॥२५॥

दुरत्यया मे माया त्वं यया सम्मोहितं जगत्।
यया मुग्धो हि विद्वांश्च मोक्ष-मार्गं न पश्यति॥२६॥

इत्यात्मना कृतं स्तोत्रं दुर्गायाः दुर्गनाशनम्।
पूजाकाले पठेद् यो हि, सिद्धिर्भवति वाञ्छिता॥२७॥

वन्ध्या च काक-वन्ध्या वा मृतवत्सा च दुर्भगा।
श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम्॥२८॥

कारागारे महाघोरे यो बद्धो दृढबन्धने।
श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम्॥२९॥

यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी।
श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात् प्रमुच्यते॥३०॥

पुत्रभेदे प्रजाभेदे पीभेदे च दुर्गतः।
श्रुत्वा स्तोत्रं मासमेकं, लभते नात्र संशयः॥३१॥

राजद्वारे श्मशाने च, महाऽरण्ये रण-स्थले।
हिंस्रजन्तुसमीपे तु श्रुत्वा स्तोत्रं प्रमुच्यते॥३२॥

गृहदाहे च दावाग्नौ दस्युसौन्यसमन्विते।
स्तोत्रश्रवणमात्रेण लभते नात्र संशयः॥३३॥

महादरिद्रो मूर्खश्च वर्ष स्तोत्रं पठेत् तु यः।
विद्याबान्धव वांशचैव स भवेन्नात्र सशयः॥३४॥

॥इति ब्रह्म-वैवर्ते श्रीदुर्गास्तोत्रम्॥

IX

श्रीदुर्गामहिम्नस्तोत्रम्।।

This is a string of 34 stanzas extolling the might, mercy and all pervasive transcendence of the mother-goddess. The verses are rich in the poetic fervour and metaphysical insight.

त्वमन्तस्त्वं पश्चात् त्वमसि पुरतस्त्वं च परत
स्त्वमूर्ध्वं त्वं चाधास्त्वमसि खलु लोकान्तर चरी।
त्वमिन्द्रस्त्वं चन्द्रस्त्वमसि निगमानामुपनिषत्
तवाहं दासोऽस्मि त्रिपुरहररामे कुरु कृपाम्।।१।।

इयान् कालः सृष्ठेः प्रभृति बहुकष्टेन गमितो
विना यत् त्वत् सेवांकरुणारसकल्लोलिनिशिवे
तदेतद् दौर्भाग्यं मम विषयतृष्णाख्य रिपुणा हतः
शुद्धानन्दं स्पृशामि तव सिध्देश्वरि पदम्।।२।।

सुधाधारावृष्टेस्तव जननि दुष्टेर्विषयताम् वयं यामो
दामोदर भगिनि भाग्येन फलितम्। इदानीं भूतानां
ध्रुवमुपरि भूतः परमुदा, वाञ्छामो मोक्षं विपिनपथि
कक्षं जरदिव।।३।।

जपादौ नो सक्ता हरगृहिणि भक्ताः करुणया,
भवत्या होमत्या कतिकति न भावेन गमिताः।
निजानन्दाकारं भवजलधिपारं निजपदम्म् न ते
मातुर्गर्भे जननि तव गर्भे यदि गताः।।४।।

चिदेवेदं सर्व श्रुतिरिति भवत्याः स्तुतिकथा,
प्रियं भात्यस्तीति त्रिविधमपि रूपं तव शिवे !
अणुर्दीर्घे ह्रस्वं महदजरमन्तादिरहितम् त्वमेवं
ब्रह्मासि त्वदपरमुदारं न गिरिजे ।।५

त्वयाऽन्तर्यामिण्या भगवति वशिन्यादि सहिते
विधीयन्ते भावा मनसि जगतामित्युपनिषत्।
अहं कर्त्तेत्यन्तर्विशतु मम बुद्धिः कथमुमे
सुबुद्धिस्त्वद्भक्तौ न भवति कुबुद्धिः क्वचि
दपि।।६।।

न मन्त्रं तन्त्रं वा किमपि खलु विद्मो गिरिसुते
क्व यामः किं कुर्मस्तव चरणसेवा न रचिता।

अये मातः प्रातः प्रभृति दिवसास्तावधि वयम्,
कुबुद्ध्याहङ्कार्ये शिव शिव न यामो निज
वयः।।७।।

इहामुष्मिन् लोके ह्यपि न विषये प्रेमकर वै,
न मे वैरी कश्चिद् भगवति, भवानि त्रिभुवने।
गुणान्नामाधारं निगमगणसारं तव पदम्,
मनो वारं वारं जपति च विनोदं च भजते ।।८।।

महामाये काये मम भवति यादृक् खलु मनो,
मनस्ते संख्याने नहि भवति तादृक् कथमुमे।
त्वमेवान्तर्मातर्निगमयसि बुद्धिं त्रिजगताम्, न जाने
श्रीजानेरपि न विदितस्तेऽत्र महिमा।।९।।

अमिषां वर्णानां ऋतुकरणसम्पूर्णवयसाम्,
निकाम्यं काव्यानामुरसि समुदायं प्रकटितम्।
स्तनौ मेरू मत्वा स्थगितममृतोपाख्यमुभयम्,
दयाधाराधारं मम जननि हारं तव भजे।।१०।।

स्तनद्वन्द्वं स्कन्दद्विपमुखमुखे यत् स्नुतमुखम्,
कदाचिन्मे मातर्वितरतु मुखे स्तन्यकणिकाम्।
अनेनायं धन्यो जगदुपरि मान्योऽपि भवताम् कुपुत्रे
सत्पुत्रे न हि भवति मातुर्विषमता।।११।।

जगन्मूलं शूलं ह्यनुभवति कूलं कथमिदम्,
द्विधा कुर्वे सर्वेश्वरि मम तु गर्वेण फलितम्।
पदद्वन्द्वं द्वन्द्वव्यतिकर हरं द्वन्द्वसुखदम्
गुणारामे रामे कलय हृदि कामेश्वरि सदा
।।१२।।

अहोरात्रं गात्रं समजनि न पात्रं मम मुदा
धनायत्तं चित्तं तृणमपि तु निश्चिन्तमभवत्।
इदानीमानीता कथमपि भवानी हृदि मया,
स्थितं मन्ये धन्ये पथि कथमधन्येऽहमुचितः।।१३।।

निराकारामारादधि हृदयमाराधितवता,
मया मायातीताऽसितसकलकायापहतये ।
अहं कोऽहं सोऽहं मतिरिति विमोहं हतवति
कृता हन्तानं तामुपनयति सन्तानक वति।।१४।।

त्वदंघ्रेरुद्द्योतादरुणकिरणश्रेणिगमनात् समुद्रभूता
ये ये जगति जयिनः शोणमणयः। त एते सर्वेषां

शिरसि विदुषां भान्ति भुवने त्वदीयादन्यः को
भवति जनवन्द्योऽद्य गिरिजे॥१५॥

अकार्षीत् सोऽमर्षी भुवनमपरं गाधितनयः,
शशापान्यो लक्ष्मीमपि वदपरो ह्यर्णवमिति।
सपर्या माहात्म्यं तव जननि तादात्म्यफलदम्,
कियद् वक्ष्ये यक्षेश्वरकिरणदत्तंभगवति ॥१६॥

अमी देवाः सेवां विदधति यतो मञ्चकतया,
शिवोऽप्यच्छच्छाया रचितरुचिरप्रच्छदतया।
कृतार्थी कर्तुं मां परमशिव वामाङ्कनिलया
परब्रह्मस्फूर्तिस्तव जयति मूर्तिः सकरुणा॥१७॥

समुद्धर्तुं भक्तान् प्रभवति विहर्तुं जगदिदम्,
गतिवायो बध्वा विनिमयति रूपं च नियमात्।
यदृच्छा यस्येच्छा न च भजन विच्छेद भयतो
नमस्ते भक्ताय ध्रुवभजनसक्ताय गिरिजे॥ १८॥

उमा माया माता कमलनयना कृष्णभगिनी, भवानी
दुर्गा वा मतिरमरलक्ष्मीति तरला।
महा विद्यादेवी प्रकृतिरजजायेति जपताम्,
भवन्ति श्रीविद्ये तव जननि नामानि निधयः॥१९॥

दिशां पाला बाला हरहरिसरोजासनमुखा स्त्वया
दुर्गे सर्वे कति न भक्ता अधिकृताः ।
स्वयं रक्ता भक्तावहमधिकृतो नाधिमगमम्,
सुखे वा दुःखे वा मम समतया यान्तु
दिवसाः॥२०॥

भवत्या भक्तानां यदि किमपि कश्चिद् विधिकृते,
पुरे वा पश्चाद् वा कपटदुरितेषां पर वशः। जनश्चेत्
संन्यासादपि जपति नारायणपदम्, ततोऽप्येनं
देवी नयनपथवीथीं गमयति॥२१॥

क्रिया वा कर्त्ता वा करणमपि वा कर्म यदि वा,
प्रणीयन्ते चेष्टा जगति पुरुषैर्भावकलुषैः।
समर्प्य स्वात्मानं तव तु पदयोरिन्द्रपदवीम्,
पदं वा तद् विष्णोर्गणयति न
भक्तोऽयमचलः॥२२॥

स्वयं माया कार्याद्युदयकरणे कौतुकवती, शिवादीनां
सर्गस्थितिविलयकर्माणि बिभृषे। अयं भक्तो नाम्ना
भगवति शुभः स्यात् तव यदा भवान्याः
भक्तानामशुभमपरं तेऽपि न कृतम्॥२३॥

धरित्री ह्यम्भोधिस्त्वमपि दहनस्त्वं च
पवनस्त्वमाकाशस्त्वं च ग्रसति पुरुषस्तेन सहितम्।
ग्रसन्ती ब्रह्माण्डं प्रकृतिरपि दासी पशुपते
यदाऽऽसीत् संहारे जननि तव संहार महिमा
॥२४॥

स्फुरत्तारामाल्यं ग्रहनिवहनीराजनविधि र्हविर्धूमो
धूपो मलयपवमानः परिमलः।
इदं ते नैवेद्यं विविधरसवेद्यं खलु सुखम्
सपर्या मर्यादा ध्रुवमियमुमे ब्रह्मनिलये ॥२५॥

नवाधारा सृष्टिः स्फुटित नवधा शब्दरचना, नवानां
संख्यानां प्रकृतिरगराजन्य तनये।
नवानां खेटानामुपरि नवधाऽप्यर्चिपदे।
नव द्वीपी देवी त्वमसि नवचक्रेश्वरि शिवे॥२६॥

यदा कृष्याकृष्या तपति भवदम्बा क्व नु गता,
बलात्कारादारादिति यमभठे नाम विधया।
तदैवैनं दीनं स्पृशति वदने प्रश्रयवती
विधूयां वा धूतगृहमपि धयन्तं भगवती॥२७॥

हविर्धाने गीतं श्रुतिशिरसि निर्धारितमितम्,
शिवस्यार्धाङ्गस्थं परम महदद्धाममनः।
यदा च क्षाणस्ते चरणतललाक्षारसजलैर्मुखं
प्रक्षाल्यायं गणयति न लक्षाणि कृतिनाम्॥२८॥

गुरूणां सर्वेषामयमुपरि विद्या गुरुरभून्,
मनूनां सर्वेषामयमुपरि जातो भुव मनुः।
कलानां सर्वासामिथमुपरि लक्ष्मिः परकलामहिम्नां
सर्वेषामयमुपरि जार्गति महिमा॥२९॥

यदाऽऽलापादापादितविविधविद्यापरिणतिः करे कृत्वा मोक्षं व्यवहरति लोकं प्रभुतया। प्रणादेवाशा ये प्रभवति दुरापे च पुरुष स्तदेतन्माहात्म्यं विरलजनसात्म्यं तव शिवे॥३०॥

याभिः शङ्करकालकृत्यदहनज्वाला समुत्सारणम्, याभि शुम्भनिशुम्भदर्पदलनं याभिर्जगन्मोहनम्। याभिभैरवभीमरूपदलनं सद्यः कृतंमेऽन्वहम्, दारिर्भैद्यं दलयन्तु तास्तव दृशो दुर्गे दयामेदुराः॥३१॥

याभिर्दुर्गतया कुशासन पुनः स्वाराज्यदानं कृतम्, याभिर्भारतसंसदि द्रुपदजा लज्जा जवाद्रक्षिता। याभिः कृष्णगृहीतहस्तकमलस्त्राणं कृतं मेऽन्वहम् दारिद्र्यं दलयन्तु तास्तव दृशो दुर्गे ! दया मेदुरा :॥३२॥

याभिर्विष्णुकृते कृतं कुरु कुलप्रध्वंसनसङ्गरे, प्राद्युम्नेर्हृदि मुद्गरस्य कुसुमस्त्रग् याभिराकल्पिता। कंसाद्याभिरपि व्यधायि वसुधा गोपाय गोपालनम्म् दरिद्र्यं दलयन्तु तास्तव दृशो दुर्गे दया मेदुराः॥३३॥

याभिः स्थावरजङ्गमं कृतमिदं याभिः सदा पालितम्, याभिर्भासितमाक्रमेण च पुनर्याभिः सदा संहृतम्। याभिर्दुः महाम्भसो भवमहासिन्धोर्न के तारिता दारिद्र्यं दलयन्तु तास्तव दृशो दुर्गे ! दयामेदुराः॥३४॥



X

श्रीदुर्गा-स्तवः

This stava of Durgā is credited to the authorship of Vyāsa.

।।वैशम्पायन उवाच।।

आर्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा।
नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम्।।१।।

The text

त्वं हि सिद्धिर्धृतिर्मेधा श्रीर्विद्या सन्नतिर्मतिः।
सन्ध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च।।२।।

आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी।
जननी सिद्धसेनानी उग्रचारी महातपाः।।३।।

जया च विजया चैव पुष्टिश्च त्वं क्षमा दया।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी।।४।।

बहुरूपा विरूपा च अनेकविधचारिणी।
विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी।।५।।

पर्वताग्रेषु घोरेषु नदीषु च गृहेषु च।
वासस्तव महादेवि वनेषूपवनेषु च।।६।।

शबरैर्बर्बरैश्चैव पुलिन्दैरभि पूजिता।
मयूरपक्षध्वजिनी लोकान् क्रमसि सर्वशः।।७।।

कुक्कुटैश्छागलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला।
घण्टानिनादबहुला विश्रुता विन्ध्यवासिनी।।८।।

त्रिशूली पट्टिशी चैव सूर्यचन्द्रपताकिनी।
नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा।।९।।

भगिनी बलदेवस्य रजनी कलहप्रिया।
आवासः सर्वभूतानां निष्ठा च परमा गतिः।।१०।।

नन्दगोपसुता चैव देवानां विजयावहा।
चीरवासाः सुवासाश्च रात्रिः सन्ध्या त्वमेव च।।११।।

प्रकीर्णकेशी मृत्युश्च तथा मांसौदनप्रिया।
लक्ष्मीरलक्ष्मीरूपेण दानवानां वधाय च।।१२।।

सावित्री चैव वेदानां मातामन्त्रगणस्य च।
अन्तर्वेदी च यज्ञानामृत्विजां चैव दक्षिणा।।१३।।

सिद्धिः सयान्त्रिकाणां तु वेला त्वं सागरस्य च।
यक्षाणां प्रथमा यक्षी नागानां सुरसेति च।।१४।।

कन्यानां ब्रह्मचर्या त्वं सौभाग्यं प्रमदासु च।
ब्रह्मचारिण्यथो दीक्षा शोभा च परमा तथा।।१५।।

ज्योतिषां त्वं प्रभा देवो नक्षत्राणां च रोहिणी।
राज-द्वारेषु तीर्थेषु नदीनां सङ्गमेषु च।।१६।।

पूर्णा च पूर्णमा चन्द्रे कृत्तिवासा इति स्मृता।
सरस्वती च वाल्मीकेः स्मृतिर्द्वैपायनेस्तथा।।१७।।

कर्षकाणां च सीतेति भूतानां धरणी तथा।
ऋषीणां धर्म-बुद्धिस्तु देवानां मानसी तथा।।१८।।

सुर-देवीति भूतेषु स्तूयसे त्वं स्वकर्मभिः।
इन्द्रस्य चारुदृष्टिस्त्वं, सहस्रनयनेति च।
तापसानां च देवी त्वमरणिश्चाग्निहोत्रिणाम्।।१९।।

क्षुधा च सर्वभूतानां तृप्तिस्त्वं दैवतेषु च।
स्वाहा तृप्तिर्धृतिर्मेधा वसूनां त्वं वसुमती।।२०।।

आशा च मानुषाणां तु तुष्टिश्च कृतकर्मणाम्।
दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा।।२१।।

शकुनी पूतना च त्वं रेवती वसुदारुणा।
निद्रा च सर्वभूतानां मोहिनी क्षत्रिया तथा।।२२।।

विद्यानां ब्रह्मविद्या च त्वमोङ्कारो वषट् तथा।
नाराणां पावती च त्वं पौरणीमृषयो विदुः।।२३।।

अरुन्धत्येक भतृणां प्रजापतिवचो यथा।
पर्यायनामाभिर्दिव्यौरिन्द्राणी चेति विश्रुता।।२४।।

त्वया व्याप्तमिदं सर्वं जगत्स्थावरजङ्गमम्।
संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च।।२५।।

नदीतीरेषु चौरेषु कान्तारेषु भयेषु च।
प्रवासे राजबन्धे च शत्रूणां च प्रमर्दने।।२६।।

प्राणाद्येषु च सर्वेषु त्वं हि रक्षा न संशयः।
त्वयि मे हृदयं देवि त्वयि चित्तं मनस्त्वयि।।२७।।

रक्ष मां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि।
इमं तव स्तवं दिव्यमिति व्यासप्रकल्पितम्।।२८।।

फलस्तुतिः॥

यः पठेत् प्रातरुत्थाय शुचिः प्रयतमानसः।
त्रिभिर्मासैः कांक्षितं च फलं वै सम्प्रयच्छति॥२९॥

षड्भिर्मासैर्वरिष्ठं तु वरमेकं प्रयच्छति।
अर्चिता नवभिर्मासैर्दिव्यं चक्षुः प्रयच्छति॥३०॥

सम्वत्सरेण सिद्धिं तु यथाकामं प्रयच्छति।
सत्यं ब्रह्म च दैवं च द्वैपायनवचो यथा॥३१॥

नृणां बन्धं वधं घोरं पुत्रनाशं धनक्षयम्।
व्याधिं मृत्युभयं चैव पूजिता शमयिष्यसि॥३२॥

भविष्यसि महाभागे वरदा कामरूपिणी।
मोहयित्वा च तं कंसमेकां त्वं भोक्ष्यसे जगत्॥३३॥

अहमप्यात्मनो वृत्तिं विद्यास्ये गोषु गोपवत्।
स्ववृद्ध्यर्थमहं चैव करिष्ये कंसगोपताम्॥३४॥

एवं तु स समादिश्य गतोऽन्तर्धानमीश्वरः।
सा चापि तं नमस्कृत्य, तथाऽस्त्विव
विनिश्चिता॥३५॥

॥ इति श्रीदुर्गास्तवः॥

XI

Besides the kavachas there are several stotras which are customarily recited during worship. Important among them are sahasra-nāma-stotras (recital of 1000 names of the goddess). Two of them have been given earlier (in chapter Two); the third one will be given here,



followed by the recital of 16 and 32 names. Other eulogies follow).

श्री दुर्गा आपदुद्धारस्तोत्रम्

नमस्ते शरण्ये शिवे सानुकम्पे
नमस्ते जगद्-व्यापिके विश्व-रूपे।
नमस्ते जगद्-वन्द्य-पादारविन्दे
नमस्ते जगत्तारिणि त्राहि दुर्गे॥१॥

नमस्ते जगच्चिन्त्यमान स्वरूपे नमस्ते महा
योगिनि ज्ञान रूपे
नमस्ते नमस्ते सदानन्दरूपे,
नमस्ते जगत्-तारिणि त्राहि दुर्गे॥२॥

अनाथस्य दीनस्य तृष्णातुरस्य,
भयार्तस्य भीतस्य बद्धस्य जन्तोः।
त्वमेका गतिर्देवि निस्तारकर्त्री,
नमस्ते जगत्तारिणि त्राहि दुर्गे॥३॥

अरण्ये रणे दारुणे शत्रुमध्ये
ऽनले सागरे प्रान्तरे राजगेहे।
त्वमेका गतिर्देवि निस्तारनौका,
नमस्ते जगत्-तारिणि त्राहि दुर्गे॥४॥

अपारे महादुस्तरेऽत्यन्तघोरे,
विपत्सागरे मज्जतां देहभाजाम्।
त्वमेका गतिर्देवि निस्तारनौका,
नमस्ते जगत्-तारिणि त्राहि दुर्गे॥५॥

नमश्चण्डिके चण्डदुर्दण्डलीला,
समुत्खण्डिता खण्डिताऽशेषशत्रो
त्वमेका गतिर्देवि निस्तार-बीजम्,
नमस्ते जगत्-तारिणि त्राहि दुर्गे ॥६॥

त्वमेवाद्यभावा धृता सत्यवादी
र्नजाताऽजिता क्रोधनात् क्रोधनिष्ठा।
इडा पिङ्गला त्वं सुषुम्ना च नाडी,
नमस्ते जगत्-तारिणि त्राहि दुर्गे ॥७॥

नमो देवि दुर्गे शिवे भीमनादे,
सरस्वत्यरुन्धत्यमोघ स्वरूपे !

विभूतिः शची कालरात्री सती त्वं,
नमस्ते जगत्-तारिणि त्राहि दुर्गे !।।८।।

शरणमसि सुराणां सिद्धविद्याधराणाम्,
मुनिमनुजपशूनां दस्युभिस्त्रासितानाम्।
नृपतिगृहगतानां व्याधिभिः पीडितानाम्,
त्वमसि शरण्यमेका देवि दुर्गे प्रसीद ।।९।।

फल-श्रुतिः।।
इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम्।
त्रिसन्ध्यमेकसन्ध्यं वा पठनाद् घोर सङ्कटात्।।१०।।

मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले।
सर्व वा श्लोकमेकं वा यः पठेद् भक्तिमान् सदा।।११।।

स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम्।
पठनादस्य देवेशि किं न सिद्धयति भूतले।।१२।।

स्तव-राजमिदं देवेशि ! संक्षेपात् कथितं मया।।१३।।

XII

श्री दुर्गाष्टकस्तोत्रम्।।

प्रणम्य विबुधा दुर्गां ब्रह्म - विष्णु शिवादयः।
संहृष्टाश्चास्तुवन् भक्त्या परां तां त्रिपुरा कलाम्।।१।।

नमो नमस्ते जगतां विधात्रि
संहर्त्रि सर्वान्तरसत्यरूपे
प्रपन्न लोकाघविनाश हेतु
दयाम्बुराशे परिपाहि दुर्गे !।।२।।

महा भयाद् दानवराजरूपात्,
त्वया समस्तं जगदेतदद्य।
त्रातं यथा क्रूरमहाहिग्रस्तं
भेकं तथाऽस्मान् परिपाहि दुर्गे।।३।।

यदा वयं दुर्विपदाऽऽपदोघैः
ग्रस्तास्तदा त्वं जगतां विधात्री।
लीलावपुः प्राप्य विमृष्टमात्रा
विपन्निमग्नान् परिपाहि दुर्गे।।४।।

यत् तेऽखिलं लोक वितानमेतत्
तनोः कलांश प्रविभक्त संस्थम्।

तदन्तरे दर्शयसि स्वरूपं
माया तवैतत् परिपाहि दुर्गे।।१।।

मायात्मिका त्वं निज निर्मलेऽम्ब
यतो जगच्चित्रमुदीर्यसेऽङ्गे।
विचित्ररूपाऽपि चिदेक रूपा
अविभाव्यशक्तिः परिपाहि दुर्गे।।६।।



यत् ते पदाब्जैकसमाश्रयास्ते
विचित्र कृत्या विधिविष्णुमुख्याः।
तत् ते विचित्राकृतिरत्र का स्यात्
स्तुमः कथं त्वां परिपाहि दुर्गे।।७।।

दुर्गेषु नित्यं भवसङ्कटेषु,
दुरन्तचिन्ता हि निगीर्यमाणान् ।
शरण्यहीनान् शरणागतार्ति-
निवारिणी त्वं परिपाहि दुर्गे।।८।।

XIII

चण्डिकाहृदयविनियोगः।।

ओं अस्य श्रीचण्डिका हृदयस्तोत्रमहामन्त्रस्य मार्कण्डेय ऋषिः । अनुष्टुप् छन्दः । श्रीचण्डिका देवता । ह्रां बीजं । ह्रीं शक्तिः। ह्रूं कीलकं । श्रीचण्डिका प्रसाद सिद्ध्यर्थे जपे विनियोगः।।

षडङ्गन्यासः 'ह्रां' इत्यादिना ।
ध्यानम् सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तु ते।।

।।मार्कण्डेय उवाच।।

अथातः सम्प्रवक्ष्यामि विस्तरेण यथातथम्।
चण्डिकाहृदयं गुह्यं, श्रृणुष्वैकाग्रमानसः।।

ऐं ह्रीं श्रीं उँ हसौः ह्रीं श्रीं ह्रीं क्लीं जय जय चण्डि, चामुण्डे, चण्डिके, त्रिदशमुकुटकोटि सङ्घटित चरणारविन्दे, गायत्री सावित्री सरस्वती मातृवद् रक्षे। सर्वविघ्नानि कृन्तति, सौभाग्यैश्वर्यं ददाति, श्रीमहालक्ष्मी प्रयच्छत्यायुःवृद्धिं सदाऽऽरोग्यं विजयं नृपालमोहनं सर्व भूतानां वशीकरण सिद्धिं, प्रसन्ना जपसन्तुष्टा भुक्तिमुक्ति प्रदायिनी।

ईशानी सा त्वं सप्तशति महाहिकृतहारिणि, भैरवरूपधारिणि, प्रकटितरक्तदंष्ट्रोग्रवदने, घोरे, घोरानने, नयनोज्ज्वलज्वालामाला सह सुपरिवृत्ते, महाट्टहासधवलीकृतदिगन्तरे, दिवाकरकोटि समप्रभेमहामणिप्रभाद्योतित सकलदिगन्तरे, सर्वायुधपरिपूर्णाष्टादशभुजव्याप्त नभोऽन्तराले, कपालहस्ते, दिशि जृम्भिते, महा सहस्रभुजावतारे, दशभुजाष्टभुजाऽन्तराल स्वरूपे, गजाजिनोत्तरीये, भूतवेतालवृन्दपरिवृते, प्रकाशतधराधरे, मधुरवाणी प्रबन्धरसप्रवाहे।

श्रीमती कालरात्रि महारात्रि महामाये, शिवे, नित्ये, त्रिभुवनोद्धारे, श्रीमदोड्याणमातृका जालोज्जयिनी पूर्णगिरिसंहारकोल्लापुरकाम रूपपीठदेवता समाराधिते, महेन्द्राद्यष्टलोक पालांशे, ऐन्द्री आग्नेयी याम्या नैऋति वारूणी वायवी कौबेरी ईशानेश्वर रूपस्थिते, सदा असिताङ्ग रुरुश्चण्ड क्रोधोन्मत्त कपाल भीषण संहार भैरवाष्टक निषेविते वामाद्यष्टकसेविते।

ब्राह्मी माहेश्वरी वैष्णवी नारसिंहीन्द्राणी चामुण्डाचण्डिकास्वरूपे, कौमारी रौद्र मूर्ति कल्याणी रोहिणी कालिका चण्डिका शाम्भवी दुर्गा सुभद्रा परिवृते, पुष्टिकेरी पार्वती त्रिमूर्ति कालिका नन्दा सुभगा महेशी कौमारी चण्डिका कालसङ्कर्षिणिकाऽपराजिता रुद्राणी भैरवी महा लक्ष्मी पीठनायिका क्षेत्राधिनायिकासनाथ इन्दिरा कमला लक्ष्मी स्वाहाऽम्बुजासना नन्दात्मिके, देवी योगेश्वरी रक्तचामुण्डा रक्तदन्ता प्रभामयी शताक्षी विख्यातमाने।

उमा गौरी चण्डिका काली पार्वती शाकम्भरी सुखावहे, दुर्ग्यैकवीरा कालरात्रि कामदा शुभावहासमाह्वये, चित्रभ्रमरपाणी महामारी भ्रमरीप्रकल्पित शिवे, कान्तदूतकृतविभाह्वये, शिवदूती समरसे, सुरथमहाराजसमाधि वैश्य परिपूर्ण वरप्रदे, महिषासुरमहावाहन राज सिंह संसेव्यमान मधुकैटभविनाशादि प्रथमचरित प्रभावे, चिक्षुरचामर वाष्कलोदग्रदुर्दर्शन महा हनु दैत्यासिलोम काल सिद्धालकरालोद्दण्ड ताम्राधरोग्राख्योग्रवीर्य त्रिनेत्र दुर्धरदुर्मुख सेनाध्यक्षाधीश्वर महिषासुर संहाररूप द्वितीय चरितप्रमेये, धूम्रलोचन चण्ड मुण्ड रक्तबीज निशुम्भ दैत्यराजनिष्कण्टक तृतीय चरित व्याप्त दिगन्तराले।

दुर्ग्यैकवीरापरिचरे, कामेश्वरी वज्रेश्वरी भगमालिनी रति प्रीति मनोभवा ज्ञानेच्छा क्रियाशक्ति समाकुले, विनायक त्रिदेवी भैरव कालमृत्यु सम्भाविते, त्रैविद्या कामधेनु भाषाऽक्षर स्वरात्मिके, प्रजा परिवृते, ब्रह्म विधि विरिञ्चि धातृ सृष्टिक्रमे, उमा गौरी सती चण्डी सुन्दरी सुभगा शिवामये, शङ्कर स्थाणु कपर्दिर्त्रिलोचन रुद्रसंहारक्रमे, श्रीः पद्मा कमला मातृलक्ष्मी सुखप्रदे, विष्णु कृष्ण वासुदेव जनार्दन स्थितिक्रमे, त्रिगुणाधारे, लक्ष्यालक्ष्येश्वरि लक्ष्मी प्रसीद।

महामाया महाकाली महामारी सुधा तृषा निद्रा तृष्णा निशैकवीरा कालरात्रि दुरत्ययाकारभवे, महाविद्या भारती वाक् सरस्वती आर्या ब्राह्मी कामधेनुवेदगर्भा सुरेश्वरी महावाणी समाह्वये, देवता पुञ्जपञ्जरमध्यस्थिते, सुखासनस्थे, श्रीमन्मधु कैटभमहिषासुर निशुम्भ शुम्भ विच्छेदकावतार संरक्षकलोकत्रये, श्रीगुरु पारमगुरु परमेष्ठिगुरु स्वरूपे नादमध्यस्थिते, महोग्रविषोरगफणा मणिमुकुटरत्नमहाज्वालामहामणिरत्नहार रञ्जित बाहुकर्णोत्तमाङ्गे।

नवरत्न दीधित कोशे, माया प्रभा बाहुजिह्वा वाणीजालसूचितस्थूलभूत पृथिव्यप्तेजो

वाय्वाकाशमूर्त्तेश्रोतृत्वक्चक्षुजिह्वाघ्राण भूते, शब्दस्पर्शरूपरसगन्धमहाभूत प्रपञ्च मये, जगन्मध्यस्थिते, महाज्वर शूल विषोपविष परमन्त्र तन्त्रपर दुष्टकृत्रिम संहारभूतविग्रहे, गन्धर्वाप्सरोगण विद्याधराधिते।

ओं कार ह्रींङ्कार क्लींङ्कारहस्ते, आं क्रों आग्नेयपात्रे प्रवेशाय प्रवेशय, द्रां शोषय शोषय, द्रीं शत्रून् मारय मारय, श्रीं सर्वाश्रिये प्रवेशय प्रवेशय, त्रैलोक्यवरवर्णिनि । श्रियमेकाग्रं वशी कुरु, वशीकुरु । ऐं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्फां स्फीं स्फूं स्फौं स्फः, मम कार्याणि साधय साधय हुं फट् स्वाहा।

एकविंशतिवारं तु जपेदेवं पठेत् तु वा।
राजद्वारे शमशाने च विवादे शत्रुसङ्करे।।

भूताग्निजलमध्ये च भयं नास्ति न संशयः।
सर्वकामप्रदं नृणां मुक्तिं च विन्दति।।

XIV

श्रीचण्डीध्वजदिव्यस्तोत्रम्।।

This stotra is addressed by the sage Mārkaṇḍeya to Mahālakshmī as a form of Durgā. This is taken from *Mārkaṇḍeya-purāṇa*, and is a prayer for sovereignity.

विनियोगः ओं अस्य श्रीचण्डीध्वजस्तोत्र महामन्त्रस्य श्रीमार्कण्डेय ऋषिः । अनुष्टुप् छन्दः। श्री महालक्ष्मी देवता श्रां बीजं श्रीं शक्तिः श्रूं कीलकं । मम वाञ्छितार्थफलसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादि न्यासः - श्रीमार्कण्डेय ऋषये नमः शिरसि । अनुष्टुप् छन्दस नमः मुखे । श्रीमहालक्ष्मी देवतायै नमः हृदि। श्रां बीजाय नमः गुह्ये । श्री शक्तये नमः पादयोः । श्रुं कीलकाय नमः नाभौ। मम वाञ्छितार्थफलसिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।।

श्रां श्रीं श्रूं श्रै श्रौ श्रः से कर षडङ्ग न्यासः।
श्रीं नमो जगत् प्रतिष्ठायै देव्यै भूत्यै नमो नमः।
परमानन्द रूपिण्यै, नित्यायै सततं नमः।।



नमस्तेऽस्तु महादेवि परब्रह्मस्वरूपिणि।
रक्ष मां शरण्ये देवि धनधान्यप्रदायिनि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो ब्राह्मि नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो माहेश्वरी देवि परब्रह्मस्वरूपिणि!
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमस्तेऽस्तु च कौमारि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमस्ते वैष्णवी देवि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमस्तेऽस्तु च वाराहि पर ब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नारसिंहि नमस्तेस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो नमस्ते इन्द्राणि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो नमस्ते चामुण्डे परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो नमस्ते नन्दायै परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

रक्तदन्ते नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमस्तेऽस्तु महादुर्गे परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

शाकम्भरि नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

शिव दूति नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमस्ते भ्रामरी देवि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो नवग्रहे देवि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नवकूटमहादेवि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

स्वर्णपूर्णे नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

श्रीसुन्दरि नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो भगवती देवि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

दिव्ययोगिनि नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमस्तेऽस्तु महादेवि परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

नमो नमस्ते सावित्रि । पर ब्रह्म स्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

जय लक्ष्मि नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

मोक्षलक्ष्मि नमस्तेऽस्तु परब्रह्मस्वरूपिणि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

रक्ष मां शरण्ये देवि धनधान्यप्रदायिनि।
राज्यं देहि धनं देहि, साम्राज्यं देहि मे सदा।।

चण्डीध्वजमिदं स्तोत्रं सर्वकामफलप्रदम्।
राजते सर्व जन्तूनां वशीकरणसाधनम्।।

।। श्रीमार्कण्डेय पुराणे परब्रह्मोक्तं चण्डीध्वज दिव्यस्तोत्रम्।।

चण्डी ध्यानम्

मातर्मे मधु कैटभघ्नि । महिष प्राणापहारोद्यमे,
हेला निर्मित धूम्रलोचन बधे । हे चण्ड
मुण्डार्दिनि। निश्शेषी कृत रक्तवीज दनुजे।
नित्य निशुम्भापहे, शुम्भ ध्वंसिनि। संहराशु
दुरितं नित्ये नमस्तेऽम्बिके।।१।।

अष्टौ भुजाङ्गी महिषस्य मर्दिनीम्,
स शङ्ख चक्रं गदा शूल धारिणीम्।
त्वां दिव्य योनिं सह जात वेदसीम्,
दुर्ग्या सदा शरण्महं प्रपद्ये।।२।।

ब्रह्माणी कमलेन्दु दर्प दलना माहेश्वरी
लीलया,
कौमारी रिपु दर्प नाशन करी चक्रायुधा वैष्णवी।
वाराही घनघोर घर्घर मुखी ऐन्द्री सुरारक्षिता,
चामुण्डा गण नाथ रुद्र सहिता रक्षन्तु मां
मातरः।।३।।

महिष मस्तक नृत्त विनोदन स्फुट रणन्मणि नूपूर
मेखला।

जनन रक्षण मोक्ष विधायिनी, जयतु शुम्भ निशुम्भ निषूदिनी।।४।।

उद्धृतौ मधु कैटभौ महिषासुर च निहत्य तम्,
धूम्रलोचन चण्ड मुण्डक रक्तवीज मुखांश्च तान्।
दुष्ट शुम्भ निशुम्भ मर्दिनी नन्दिताऽमर वन्दिते,
विष्टप त्रय तुष्टि कारिणी भद्र काली नमोस्तु ते।।५।।

लक्ष्मी प्रदान समये नव विद्रुमाभाम्,
विद्या प्रदान समये शरदिन्दु शुभ्राम्।
विद्वेषि वर्ग विज्योऽसित माल नीलम्
देवीं त्रिलोक जननीं शरणं प्रपद्ये।।६।।

चन्द्र हासं त्रिशूलं च शङ्ख चक्र गदास्तथाष
धनुर्बाणं च मुसलं पिङ्गलं मुष्टिमेव च।
पाशांकुश भुशुण्डीश्च मुद्गरं परशु तथा,
वज्रायुधं च कुन्तं च खट्वाङ्गं च हलायुधभ्।
पूणीरं क्षुरिकां मुद्रां तोमरे पान पात्रकम्,
पट्टसं दण्ड नागं च कुन्त दन्तौ तथैव च।
दर्पणं रुद्र वीणां च विभ्रत् द्वा त्रिशदोस्तलाम्,
पद्मराग प्रभां देवीं वालाक किरणारूणाम्।।७।।

रक्त वस्त्र परीधानां रक्त माल्यानुलेपनाम्,
दश पादाम्बुजां देवीं दश मण्डल पूरिताम्।
दशाननां त्रिनेत्रां च समुन्नत पयोधराम्,
एवं ध्याये महा ज्वालां महिषासुर मर्दिनीम्।।८।।

सर्व दारिद्रय शमनीं सर्व दुःख निवारिणीम्,
ब्रह्माण्ड मध्य जिह्वां तां महा वक्त्र करालिनीम्।
दश साहस्त्र दोर्दण्डा नाना शस्त्रास्त्र धारिणीम्,
विचित्रायुध सन्नद्धां विश्व रूपां शिवात्मिकाम्।।९।।

दानवान्त करीं देवीं रक्तवीज बधोद्यताम्,
रक्त वस्त्र धरां चण्डी भीषणामति भैरवाम्।
सम्पूर्ण यौवनां लक्ष्मी कालिकां कमलाननाम्,
मधु कैटभ संहारी महिषासुर मर्दिनीम्।।१०।।

चण्ड मुम्ड शिरश्छेत्रीं सर्व दैत्य निषूदिनीम्,
रक्त वीजस्य संहत्रीं अशेषासुर भक्षिणीम्।
निशुम्भ शुम्भ मथिनीं अशेषायुध भीषणाम्,
महा ब्रह्माण्ड मालाङ्गी सर्वभिरण भूषिताम्।।११।।

वेताल वाहनारूढां सिंह व्याध्रादि वाहनाम्,
नर रक्त प्रियां मायां मधु मांसोप हारिणीम्।
य इदं श्रुणुयान्नित्यं त्रि सन्ध्यं यः पठेन्नरः,
ऋण कोट्यापहरणं रोग दारिद्रय नाशनम्।।१२।।

सर्व सिद्धि करं पुण्यं सर्व काम फल प्रदम्,
भक्तानन्द करीं देवीं रब्रह्म स्वरूपिणीम्।

तामष्टादश पीठस्थां त्रिपुरामधि देवताम्
वन्दे विश्वेश्वरीं देवीं भुक्ति मुक्ति फल प्रदाम्।।१३।।

।।फलश्रुतिः।।

इदं सप्तशती ध्यानं सर्व रक्षा करं नृणाम्,
रसं रसायनं सिद्धयेत् गुलिकाञ्जन सिद्धिदम्।
पादुका युगलं सिद्धयेत् मन्त्र सिद्धि करं नृणाम्,

सौन्दर्य राज सम्मान पुत्र पौत्राभि वर्द्धनम्।।१४।।

ऐश्वर्य लाभ विजय भुक्ति मुक्ति फल प्रदम्,
सदा सन्निहितां लक्ष्मीं चण्डिकां मय देवताम्।
स्मरेन्नित्यं प्रयत्नेन षण्मासात् प्राप्यते फलम्,
महा भयापहरणं सर्व व्याधि विनाशनम्,
अन्ते स्वर्ग च मोक्षं च सत्यमेव न संशयः।
पाहि त्वं ब्राह्मी मां नित्यं मत्त मातङ्ग गामिनी,
धवनी कृत दिक् चक्रे हंस पुङ्गव वाहने।।१६।।

अनुणां कुरु माहेशि। महेश कृत वैभवे,
मयूर पुङ्गवारूढ वाहने वर दायिनी।
वैष्णावी त्वं वरारोहे । त्राहि मां च फल प्रदे,
विहङ्ग कुलाधीश वर वाहन वैभवे।।१७।।

एहि वाराहि । मे भूत्यै पुरतश्चक्षुषोरिह,
मृगाङ्क कलोत्तंसे मृगाधीश्वर वाहने।
ऐन्द्रीन्द्राणि । च मे भोगं दृढी कुरु दया निधे,
माहेशी पद संरब्ध वर वारण वाहने।।१८।।

निजमङ्ग मम रिपोः जहि त्वं मुण्ड मालया,
दर्शय त्वं च चामुण्डे । चम्डि विक्रम विश्रुते।
प्रतप्त हेमालङ्कार प्रभा पूरित दिङ्मुखा,
प्राप्तये वो विभूतीनां प्रसन्नास्सन्तु मातरः।।१९।।

चण्डी नवाक्षर मालिका

ऐं बीजं परमात्म निश्वसित भू वेदादि वर्णात्मकम्,
ये भक्तया मनसा जपन्ति परमं तेषां सुवाक्
ज्ञानदाम्। अम्बां मद्धुदयाम्बरस्थ पर चिद् रूपां
अनन्तास्पदाम्, चामुण्डामहमानतोऽस्मि वरदां
सर्वार्थ संसिद्धये।।१।।

ह्रीं काराम्बर रङ्गनर्तन करीं ओंकार लक्ष्यां पराम्,
ईङ्कारात्मक वर्ण लक्ष्य विभवां आकार हीनां
शिवाम्। साकारां वरदाभयांकुश महा पाशान्
करैर्बिभ्रतीम्, चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ
संसिद्धये।।२।।

क्लीकाराख्य महा मणिं रति पतिः प्राप्याङ्ग
हीनः परम्, ग्रीवा पाद विहीनको मनसिजः
यस्याः प्रसादान् मुदा। त्रीन् लोकान्
कुसुमेषुभिः बिजितवान् तां वेद सारात्मिकां,

चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ
संसिद्धये॥३॥

चार्वङ्गीमति सुन्दरीमभयदामम्भोज मध्य स्थिताम्, चार्वङ्गी कृत गान वाद्य रसिकां शास्त्राद्य वाच्याकृतिम्। चार्वाकादि समस्त शारत्र निवह प्रोक्तादि शक्त्याकृतिं, चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ संसिद्धये॥४॥

मुण्डाद्यैस्सुर शत्रुभिः कृत महा कष्टापदां नाशिनीम्, मुण्ड प्रोत सुहार शोभित गलां भुक्ति प्रदांघ्रि द्वयाम्। मूढैः ज्ञान विहीनकैः पशु निभैः ज्ञातुं न शक्यां जनैः, चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ संसिद्धये॥५॥

डा मर्यादि समस्त भूत निवहा सेव्यां
सदाऽऽनन्ददाम्, डाकिन्यादि सुयोगिनी
परिलसत् षट् चक्र सञ्चारिणीम्। डम्भोपेत
जनैः कृतार्चन स्तुति विधौ सन्तुष्टि हीनान्तरां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ
संसिद्धये॥६॥

यैर्लोभाद् विहितोऽन्न दान रहितः यज्ञस्स गर्व जनैः,

तेषामन्तक रूपिणीमरि भयानर्थ प्रदात्रीं रुषा। यैर्भक्त्या स्तुति पूजनादि रचितं तेषा मभीष्ट प्रदाम्, चामुण्डामहामानतोऽस्मि वरदां सर्वार्थ संसिद्धये॥७॥

विद्वद् वृन्द कृतार्चन स्तुति नुति प्रीतां विधि प्रार्थिताम्, विद्वद् वृन्द सु पूजनादि करणे सन्तुष्ट चितां सद्व विद्यां वीर नुतांघ्रि पङ्कज युगां वीरापवर्ग प्रदाम्ष चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ संसिद्धये॥८॥

चेतोऽम्भोज विहारिणीं मम मनः प्रोद्भूतभी हारिणीम्, चेतोलीन पद स्थितां वर चिदानन्दाकृतिं शान्तिदाम्। चेतो वृत्यनुसारि कर्म फलदां चिन्तामर्णि श्री करीम् चामुण्डामहमानतोऽस्मि वरदां सर्वार्थ संसिद्धये॥९॥

श्रीशान्ताचल नायकांघ्रि कमलासक्त स्वचित्तैस्सदा, श्रीशान्त्यादि गुणान्वितैः वर चिदानन्दाख्य नाथात्मभिः। दत्तात्माऽमृत पान मत्त हृदयाऽनन्तस्य वक्त्रोद्भवम्, शान्ति शं शिवमातनोतु पठतां स्तोत्रं चिदानन्ददम्॥१०॥

नित्यं सज्जन मानिता बुध वरैः भक्तत्यादृता सर्वदा, सत्य ज्ञान विधायिनी पशु जनैः द्रष्टुं न



शक्याऽजरा। विद्या ज्ञान सुपूर्ण भक्त जनता वाग्भूषिता सन्ततम्, भूत्यै भूतल वासिनां विजयते चण्डी शिवानुग्रहात्।।

३. श्रीजगद्धात्री दुर्गाकवचम्

This is a brief Kavacha of 16 verses ascribed to the authorship of Śiva, the consort of Devī. Nārada is said to be the seer (rṣhi), Durgā the deity (devatā) and anushṭup the metre (chhandas). It is called Savidhī-Kavacha-stotra, for it is prefaced by Viniyoga and nyāsa.

श्रीदेवी उवाच

कथिताः परमेशान दुर्गा मन्त्रस्त्वनेकधा।
कवचं कीदृशं नाथ पूर्वं मे न प्रकाशितम्।
तद् वदस्व महादेव यतोऽहं शरणं गता।।१।।

श्री महादेव उवाच-

श्रृणु प्रिये ! प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि।
पुरा देवासुरे युद्धे यदुक्तं शम्भुना त्वयि।
त्वं न स्मरसि कार्येण मुग्धाः प्रायो हि योषितः।।२।।

।।सविधिकवचस्तोत्रम्।।

विनियोगः - अथ श्रीजगद्धात्रीदुर्गाकवचस्य श्रीनारद ऋषिः। अनुष्टुप् छन्दः । श्रीजगद्धात्री दुर्गा देवता चतुर्वर्गसिद्ध्यर्थे विनियोगः।।

ऋष्यादिन्यासः।।

श्रीनारद ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीजगद्धात्रीदुर्गादेवतायै नमः हृदि । चतुर्वर्गसिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।।

ओङ्कारो मे शिवः पातु, ह्रीङ्कारः पातु भालकं।
दुं पातु वदनं दुर्गा, ङे युक्ता पातु चक्षुषी।।१।।

नासिका मे नमः पातु, कर्णावष्टाक्षरी सदा।
प्रणवं मे गलं पातु, केशान् श्रीबीजमन्ततः।।२।।

लज्जा दन्तान् समारक्षेज्जिह्वां दुर्गा सदाऽवतु।
यै नमः पातु वक्त्रान्तं, तालुं दुङ्काररूपिणी।।३।।

एकाक्षरी महाविद्या, वक्षो रक्षतु सर्वदा।
कूर्चाद्या विविधा विद्या, बाहू मे परिरक्षतु॥४॥

ओं दुर्गे पातु जङ्घे द्वे, दुर्गा रक्षतु जानुनी।
द्वावुरू पातु युगलं, रक्षिणि स्वाह्याऽन्विता॥५॥

जयदुर्गा सदा पातु, गुल्फे द्वे चण्डिकाऽवतु।
कटिं जया पातु सदा, नाभि मे विजयाऽपतु॥

उदरं पातु मे कीर्तिः, पृष्ठं प्रीतिः सदाऽवतु।
प्रभा पादांगुलीः पायात्, श्रद्धा स्कन्धौ
सदाऽवतु॥७॥

मेधा करांगुलीः सर्वा, नखरान् श्रुतिमेव च।
शङ्खो गुल्फं तु पायान्मे, चक्रं लिङ्गं सदाऽवतु॥८॥

सर्वाङ्गं मे सदा पातु, शङ्खो रक्षतु सर्वतः।
दुर्गा मां पातु सर्वत्र, जयदुर्गा च दारकान्॥९॥

यद् यदङ्ग महेशानि वर्जितं कवचेषु च।
तत् सर्वं रक्ष देवि पतिपुत्रान्विता सती॥१०॥

॥ फलश्रुतिः॥

इति ते कथितं देवि कवचं वज्रपञ्जरम्।
धृत्वा रक्षोभयाच्छक्रो, दिवि दैत्यगणान्
बहुन्॥११॥

विधृत्य कवचं वाणी, दुन्दुभिं च सहानुजम्।
हत्वा सर्वत्र कपिराड् विजयी वानरोत्तमः॥१२॥

स यन्त्रं कवचं चैव, लिखित्वा भूर्जपत्रके।
कण्ठे वा दक्षिणे बाहौ, नारी वामभुजे तथा॥१३॥

अभीष्टं लभते मर्त्यो, वत्सारान्नात्र संशयः।
काकवन्ध्या च या नारी, मृतवत्सा च या
भवेत्॥१४॥

बह्वपत्या जीववत्सा , बन्ध्या धृत्वा प्रसूयते।
शतमष्टोत्तरावृत्तिः पुरश्चर्या विधीयते॥१५॥

षण्मासतो भवेत् सिद्धिर्यथावत् परिचारतः।
अज्ञात्वा कवचं चैतद् दुर्गामन्त्रांस्तु यो जपेत्।

अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः॥१६॥

XV

दुर्गासूक्तम्।।

जातवेदसे सुनवाम सोम-
मरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा,
नावेव सिन्धुं दुरितात्यग्निः।।१।।

तामग्निवर्णां तपसा ज्वलन्तीम्
वैरोचनीं कर्मफलेषु जुष्टान्।
दुर्गां देवीं शरणमहं प्रपद्ये
सुतरसि तरसे नमः।।२।।

अग्ने त्वं पारयान्वयो अस्मान्
स्वस्तिभिरति दुर्गाणि विश्वा।
पूश्च पृथ्वी बहुला न ऊर्वी,
भवातोकाय तनयाय शंयोः।।३।।

विश्वानि नो दुर्गहा जातवेदः
सिन्धुं न नावा दुरितातिपर्षि।
अग्ने ! अत्रिवन्मनसा गृणानो
अस्माकं बोध्यविता तनूनाम्।।४।।

पृतनाजितं सहमानमुग्र -
मग्निं हुवेम परमात्सधस्तात्।
स नः पर्षदति दुर्गाणि विश्वा
क्षामाद् देवो अतिदुरितात्यग्निः।।५।।

प्रत्नोषिकमीड्यो अध्वरेषु
सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वा
स्मभ्यं च सौभगमायजस्व।।६।।

गोष्ठीभिर्जूष्टमयुजो निषिक्तं,
तवेन्द्र विष्णोरनुसञ्चरेम।
नाकस्य पृष्टमभि सम्वसानो,
वैष्णवीं लोक इह मादयन्नाम्।।७।।

XVI

चण्डिकादलम्।।

This is a tāntrik incantation, invoking the grace of Chaṇḍī (or Durgā) to secure ones own welfare and the destruction of all enemies and unfavourable conditions.

ओं नमो भगवति । जय जय चामुण्डे, चण्डिके, चण्डेश्वरि, चण्डायुधे । चण्डरूपे, चण्डरूप धारिणि, पराऽऽनन्द रूपे, शिवे, नरशिरो मालालंकृत वक्षःस्थले, महा महा कपाल मालोज्जवले, ज्वलन्मणिमुकुटचूडाबद्धार्द्धचन्द्र खण्डे, महाभीषणे, देवि, परमेश्वरी। महा माये, षोडशकलापरिवृत्तोल्लसिते, महादेवासुरसमर निहतरुधिरशोभितमहाकपालचन्द्रहासवर लब्ध रथसहित हेमकाञ्चीदामोज्ज्वली कृतासनारुणीकृत पुरःज्वलीभूत मण्डले। महा शम्भुरूप महाव्याघ्रचर्माम्बरधरे, महासर्प यज्ञोपवीतिनि । महाश्मशानभस्मोद्धूलित धवलित सर्वगात्रे।

कालि, महाकालि, कालाग्निरुद्र, कालि, कालसङ्कर्षिणि । कालनाशिनि, वीरभद्रकालि, शूलभद्रकालि, निर्वाणकालि, काल, काल कोठि मोदिनि । ज्वालामालिनि, उन्मत्त कालि, चण्डिके, महाचण्डित्रिपुरचण्डि, रात्रिसञ्चारिणि, नभो भक्षिणि। नानाभूतप्रेतपिशाचान् गण सह सञ्चारिणि, नानाव्याधिप्रशमनि, सर्वदुष्ट प्रशमनि, सर्वदारिद्र्यनाशिनि, धगधगास्वादित मांसखण्डे । रात्रिविरूपकलाकलायमानकङ्काल धारिणि, मधुमांसरुधिराद्यासक्तविलासिनि।

सकलसुरासुरगन्धर्वविद्याधरकिन्नर किम्पुरुषादिभिः स्तूयमानचरिते। सर्वमन्त्राधि भूताधिकारिणि, सर्वलोकभयप्रक्षालिनि सर्व लोकजननि, स चराचरप्रपञ्चरुधिरे, सर्वशक्ति प्रधाने, सकललोकपावनि। ब्रह्माणी माहेश्वरी कौमारी वैष्णवी शङ्खिनी वाराहीन्द्राणी चामुण्डा महालक्ष्मी रूपे, महाविद्ये, योगेश्वरि, योगिनि, चण्डिके, महायोगिनि। माये, विश्वेशरूपिणि, सर्वाभरणभूषिते, अतल वितल सुतल रसातल तलातल महातल पातालादि भूर्भुवस्स्वर्महर्जनस्त पस्स्त्याख्या चतुर्दश भुवनैकनाथे, महाक्रूरे, प्रसन्नरूपधारिणि।

ओं नमः पितामहाय, ओं नमो नारायणाय, ओं नमश्शिवायेति सकललोकजप्यमान ओं ब्रह्मा विष्णु महेश्वर रूपिणि, दण्ड कमण्डलु कुण्डल धारिणि, सावित्रि सर्व मङ्गलप्रदे । सरस्वति, पद्मालये, पार्वति, सकलजगत्स्वरूपिणि। शङ्ख चक्रधारिणि, गदाधारिणि, परशु शूल पिनाक टङ्क धारिणि, शर चाप शूल करवाल खड्ग डमरुकांकुश गदा परशु तोमर भिण्दिपालभृशुण्डि मुद्गर मुसल परिघायुध दोर्दण्डसहस्रे।

चन्द्रार्कवाह्निनयने, इन्द्राग्नि यम निर्ऋति वरूणवायु कुबेरेशान प्रधानशक्तिहेतुभूते। सप्तद्वीपसमुद्रोपरि महाव्याप्तेश्वरि, महा स चराचर प्रपञ्चमालालंकृत मेदिनीनाथे, महा प्रभावे, महाकैलासपर्वतोद्या नवनविहारिणि, नदी तीर्थ देवतायतनालंकृते, वसिष्ठ वामदेवादि महामुनिगणवन्द्यामान चरणारविन्दे। द्वि चत्वारिंशद्वर्णमाहात्म्ये, पर्याप्तवेद वेदाङ्गाद्यनेक शास्त्राद्याधार भूते, शब्दब्रह्ममयी लिपिदैवते, मातृकादेवि।

चिरं मां रक्ष रक्ष भूत प्रेत पिशाचान् हूङ्कारेणैव नाशय नाशय, आवेशय आवेशय, उच्चा टयोच्चाटय, वशी कुरु वशी कुरु, स्तम्भय स्तम्भय, उन्मादयोन्मादय, विध्वंसय विध्वंसय, विदारय विदारय, रौद्रय रौद्रय, स्त्रावय स्त्रावय, सकलारातीन् मूर्ध्नि स्फोटय स्फोटय॥ मम शत्रून् शीर्घ्रं मारय मारय, जाग्रतस्वप्नसुषुप्त्यवस्थासु अस्मान् राज चोराग्नि जल वात विष भूत शत्रु मृत्यु ज्वरादि नाना रोगेभ्यो नाना विचारेभ्यो नानाऽपवादेभ्यः परकर्म मन्त्र तन्त्र यन्त्रौधष शल्यशून्य क्षुद्रेभ्यो सम्यक् माम् रक्ष रक्ष हुं फट् स्वाहा'' ओं ह्रौं क्षौं हुं फट् स्वाहा।

XVII

श्री दुर्गाद्वात्रिंशन्नामावलिः॥

दुर्गा दुर्गार्तिशमनी दुर्गाऽऽपद् - विनिवारिणी।
दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी॥१॥

दुर्गतोद्धारिणी दुर्गनिहन्त्री दुर्गमापहा।
दुर्गमज्ञानदा दुर्गदैत्यलोकदवानला॥२॥

दुर्गमादुर्गमालोका दुर्गमाऽऽत्मस्वरूपिणी।
दुर्गमार्गप्रदा दुर्गमविद्या दुर्गमाश्रिता॥३॥

दुर्गमज्ञानसंस्थाना दुर्गमध्यानभासिनी।
दुर्गमोहा दुर्गमगा दुर्गमार्थस्वरूपिणी॥४॥

दुर्गमासुरसंहन्त्री दुर्गमायुधधारिणी।
दुर्गमाङ्गी दुर्गमता दुर्गम्या दुर्गमेश्वरी॥५॥

दुर्गभीमा दुर्गभामा, दुर्गभा दुर्गदारिणी॥६॥

॥फलश्रुतिः॥

नामावलिमिमां यस्तु, दुर्गायाः सुधी मानवः।
पठेत् सर्वभयान्मुक्तो भविष्यति न संशयः॥
शत्रुभिः पीड्यमानो वा, दुर्गबन्धगतोऽपि वा।
द्वात्रिंशन्नामपाठेन मुच्यते नात्र संशयः॥

XVIII

श्रीदुर्गामन्त्रगर्भसहस्त्रनामः।।

श्रेयस्करं विश्ववन्द्यं सर्वदेवनमस्कृतम्।
गुह्यं गोप्यतमं देवि पठनात् सिद्धिदायकम्।।

विनियोग :।।

ओं अस्य श्रीदुर्गानामसहस्त्रस्य श्रीमहादेवः ऋषिः । अनुष्टुप् छन्दः । श्रीदुर्गा देवता । दुं बीजं ह्रं शक्तिः । उँ कीलकं । धर्मार्थकाममोक्षार्थे श्रीदुर्गा सहस्त्रनामपाठे विनियोगः।

ऋष्यादि न्यासः।।

श्रीमहादेव ऋषये नमः शिरसि । अनुष्टुप् छन्दसे नमः मुखे । श्रीदुर्गा देवतायै नमः हृदि । दुं बीजाय नमः गुह्ये । ह्रीं शक्तये नमः नाभौ । ओं कीलकाय नमः पादयोः । धर्मार्थकाममोक्षार्थे श्रीदुर्गासहस्त्रनामपाठे विनियोगाय नमः सर्वाङ्गे।।

ध्यानः।।

शङ्खारि चाप शरभिन्नकरां त्रिनेत्राम्, तिग्मेतरांशु कलया विलसत्किरीटाम् सिंहस्थितां सकलसिद्ध नुतां च दुर्गाम्, दुर्वा निभां दुरितवर्गहरां नमामि।।

ओं ह्रीं दुं जगदम्बाभा भद्रिका भद्र कालिका।
प्रचण्डा चण्डिका चण्डी चण्डमुण्डनिषूदनी।।१।।

अनुसूयास्तुटिस्तारा कृत्तिका कुब्जिकालया।
प्रलयस्थितिसम्भूतिर्विभूतिर्भयनाशिनी।।२।।

महामाया महाविद्या, मूलविद्या चिदोश्वरी।
मदालसा मदोत्तुङ्गा मदिरा मदनप्रिया।।३।।

आलिर्व्यालप्रसूः पण्या पवित्रा परमेश्वरी।
आदिदेवी कला कान्ता त्रिपुरा जगदीश्वरी।।४।।

मनो नाम महालक्ष्मीः सिद्धिलक्ष्मीः सरस्वती।
सरित्कादम्बरो गोदा गुह्यकाली गणेश्वरी।।५।।

गणाम्बिका जया तापी तपना तापहारिणी।
तपोमयी दुरालम्भा दुष्टग्रहनिवारिणी।।६।।

दुःखहा सुखदा माध्वी परमा भूत सूः सुराः।
सुधा सुधांशु निलया प्रलयानलसन्निभा।।७।।

समस्त सम्पदं भोजनिलया कलिकल्पका।
विद्येश्वरी विश्वमयी, विराट्छन्दा गतिर्मतिः।।८।।

धृतिदा दाम्बिकी दोला लोपामुद्रा पटीयसी।
गरिष्ठाऽरिष्टहा दुष्टा कुशा काशी कुलाऽकुला।।९।।

अकुलस्या पदन्यासा, न्यासरूपा विरूपिणी।
विरूपाक्षा कोटराक्षी कुलकान्ताऽपराजिता॥१०॥

अजिता कुलिका लम्पा लम्पटा त्रिपुरेश्वरीति॥
त्रितयी वेदविन्यासा संन्यासुर्मतिर्भया॥११॥

अभया स्वर्मुखा देवी महौषधिरलम्बुषा।
चपला चन्द्रिका चण्डा चण्डमुण्डविनाशिनी॥१२॥

चपलाक्षी मदाविष्टा मदिरारुणलोचना।
पुरी त्रिपुरसूराम्ना रमा रामा मनोरमा॥१३॥

सन्ध्या सन्ध्याश्र शीला च शाला श्यामपयोधरा।
शशाङ्कमुकुटा श्यामा सुरा सुन्दरलोचना॥१४॥

विषमाक्षी विशालाक्षी वशा वागीश्वरी शिला।
मनः शिला च कस्तूरी, मृगनाभिमृगेक्षणा॥१५॥

मृगारिवाहना माध्वी मानदा मत्तभाषिणी।
नारसिंही वामदेवी वामा वामश्रुतिप्रिया॥१६॥

पण्या पुण्य गतिः पुण्या पुत्री पुण्य जन प्रिया।
चामुण्डा उग्रचण्डा च महाचण्डज्योतिः
स्वरूपिणी॥१७॥

तमस्विनी प्रभा ज्योत्स्ना महाज्योतिः स्वरूपिणी।
स्वरूपा सद्गतिः साध्वी सदा सद्रूप
राजिता॥१८॥

सृष्टिः स्थितिः क्षेम करी क्षामा क्षामो व्रति स्तनी
क्षेणी क्षयकरी क्षीणा, सर्वास्या शिववल्लभा॥१९॥

दन्तुरा दाडिमप्रीतिः दया दाम्बिकसूदिनी।
राक्षसी डाकिनी योग्या योगिनी योग
वल्लभा॥२०॥

कबन्धा कन्दरा कृत्स्ना कृत्तिका कण्टकान्तका।
कलङ्करहिता काली कम्पा काश्मीर वल्लभा॥२१॥

काशी कोर्तिप्रदा काञ्ची काश्मीरी कोकिल स्वना।
प्रभावती महारौद्री रुद्रपत्नी रुजापहा॥२२॥

रतिस्तुतिस्तुरा तुर्या तोतुला भववासिनी।
तपःप्रिया शरच्छ्रेष्ठा पंगुपुत्री यमस्वसा॥२३॥

यामी यमान्तका याम्या यमुना स्वर्नदी तडित्।
नारायणी विश्वमाता भवानी पापनाशिनी॥२४॥

विगता विगत प्रश्ना कृशा कृष्टासिधारिणी।
वारी वारा वरधरा वरदी वीरसूदिनी॥२५॥

वीरसूर्वामनाकारा दीर्घसत्रा दयावती।
दरी धनप्रिया धात्री धात्री वल्ली महोदरी॥२६॥

गणेश्वरी गया काञ्ची काञ्चीकिङ्किणिघण्टिका।
माया मायावती मत्ता प्रमत्ता प्रवरीश्वरी॥२७॥

पौरन्दरी शची सीता शीता तपःस्वभावजा।
स्वाभाविकगुणा गण्या गाम्भीर्यगुणभूषणा॥२८॥

सूतिः सूर्यकला सुप्ता सप्ता सप्ततिरूपिणी।
तेजस्वनी सदाऽऽनन्दा सभासन्तोषवर्धिनी॥२९॥

तर्पणा कर्षणा होता सङ्कल्पा शुभमात्रिका।
दर्भा द्रोणिकला श्रान्ता समिधा सुरवेदिका॥३०॥

धूम्राद्गतिश्चरमतिश्चामीकररुचिश्चिता।
चिन्ताऽनलेश्वरी नीला कालाऽनीलसरस्वती॥३१॥

अपर्णा सुफला यज्ञा सभया निर्भयावहा।
भीमस्वना भर्गशिखा भास्वती भास्करा विभा॥३२॥

विभावरी नदी नन्द्या नन्द्यावर्तप्रवर्तिनी।
पृथ्वीधरा विषधरा विश्वगर्भा प्रवर्तिका॥३३॥

विश्वमाया विश्वबाला विश्वम्भरविलासिनी।
उरगेशा पद्मनागा पद्मनाभप्रसूः प्रजा॥३४॥

तोरणा तुलसी दीक्षा दक्षा दाक्षायणी द्युतिः।
सम्पुटा शयना शय्या शासना शमनान्तका॥३५॥

श्यामाकवर्णा शार्दूली शष्पनीतांशुवल्लभा।
स्तुत्या प्रणीता नियतिः कम्पना कम्पहारिणी॥३६॥

चण्यका भाचरा चीना दीना दीनजयप्रिया॥
वसुन्धरा वासवेशी वसुनाथा वटेश्वरी॥३७॥

समुद्रसङ्गमा पूर्णा तरला तरु वासिनी।
पार्वती पासरी मान्या माननीया मधुप्रिया॥३८॥

माधवी मधुपानस्या मन्दिरा मन्दुरा मृगी।
मुमूषा रुरुषा रेवा रेवतीरमणी रमा॥३९॥

ऋद्धिहस्ता सिद्धिहस्ता अन्नपूर्णा महेश्वरी।
अणुरूपा जगज्योतिः समस्तासुरघातिनी॥४०॥

गारूडी गगना लम्बा लम्बमानकचप्रिया।
पीताम्बरा पीतपुष्पा पूतना गतवल्लभा॥४१॥

वलाका जगदन्ता च जरा जय वरप्रदा।
प्रीतिः कठोरवदना करालरदना रमा॥४२॥

जिह्वा हस्ता च बगला प्रणया विनयप्रदा।
कीरी करालवपुषी शेमुषी मक्षिका मषी॥४३॥

उत्तीर्णउर्णिका तीक्ष्णा श्लक्ष्णा कामेश्वरी शिवा।
शिवपत्नी सरोजाक्षी पद्महस्ता सरस्वती॥४४॥

तथ्या पथ्यकृती रथ्या रथास्था विततासुरा।
महती रागिनी भार्गी शुचिहासा हरेश्वरी॥४५॥

हरिरत्नांशुलसिता लक्ष्मीनायकसुन्दरी।
अम्बालिकाऽम्बा देवेशी अनगाग्निशिखा
श्रुतिः।।४६।।

अलसाऽल्पगतिश्चान्त्याऽनन्ताऽनन्तगुणाश्रया।
अयाचाऽऽदित्य सङ्काशा आदित्यकुल
सुन्दरी।।४७।।

आत्मरूपाऽधि शमनी आदि मायाऽधि देवता।
इन्द्रप्रसूरिनद्योतिरिनाऽग्नि शशिलोचना।।४८।।

उमा उर्वी उरुभूजा उत्तुङ्गा चोक्षवाहना।
उत्तङ्का चोत्तमा ध्येया उल्लासा चोरु गर्विणी।।४९।।

ऊष्मा ऊर्णा च गुर्वाङ्गी ऊर्ध्वाक्षी ऊर्ध्वमस्तिका।
ऋद्धि ऋचा ऋ-वर्णेशी ऋणहर्त्री च
वार्तकी।।५०।।

ऋढिजा चारुवस्त्रा च ऋणिवासा महाऽलसा।
लृकारा लृक्कुरा लीना लृकारवरधारिणी।।५१।।

ऐणाङ्कमुकुटा चेहा चारुचन्द्रकला कला।
ऐङ्कारगतिरैश्वर्यदायिनी चेश्वरी गतिः।।५२।।

ओङ्कारवीजरूपा च औन्त्रिकी बीजधारिणी।
अम्बिका लम्पिकाम्पा च अःस्वरोद्गम
रूपिणी।।५३।।

काली च भद्रकाली च कालिका कालवल्लभा।
कदम्बनिलया कन्था काञ्चीमण्डनमण्डिता।।५४।।

कलङ्करहिता कुर्या काञ्चनाभा करीरगा।
कनकाचलवासा च करुणाकुलमानसा।।५५।।

कुलस्था कौलिनी कुल्या कुरुकुल्ला कपालिनी।
कपालकुलनिर्विण्णा क्रीङ्कारा कञ्जलोचना।।५६।।

खञ्जनाक्षी खड्गधरा खेटकायुधभूषणा।
गणाध्यक्षा गजगतिर्गणेशजननी गदा।।५७।।

गोदा गदाधरप्राज्या, गगनेशी महीमला।
घुर्घुरा घटभूर्घूका घुसृणाभा घनेश्वरी।।५८।।

घनसारप्रिया साम्या घ-वर्णरुतभूषणा।
चान्द्री चन्द्रस्तुता चार्वी चन्द्रका चण्ड
निःस्वना।।५९।।

चञ्चरीकस्वना देवी चञ्चच्चामीकरा गदा।
छत्रिका छरिका छुच्छा छत्रचामरभूषणा।।६०।।

ज्रीङ्कारी जलजिह्वा च जृम्भिका जलयोगिनी।
जटाजूटधरा जातिर्जातीपुष्पसमानना।।६१।।

जलेश्वरी जगद्ध्येया जानकी जननी जटा।
ङंङा ङरी ङरत्कारी जरत्काञ्चीरकिङ्किणी।।६२।।

झम्बिका झम्पकृज्झम्पा पुत्रत्रासनिवारिणी।
ञणुरूपा ञक्कहस्ता ञकाराक्षर सम्मता॥६३॥

टङ्कायुधा महातथ्या टङ्कारा टरुणा टसी।
ठकुठा ठत् कुरा ठानी डिढीर वसना डला॥६४॥

ढण्डाऽनिल मयी ढण्डा ढणत्कारकरा ढसा।
णान्तानणी णीलायुधा ण-वर्णाक्षरभूषणा॥६५॥

तरुणी तुन्दिला तोन्दा तामसी तामसप्रिया।
ताम्रानना ताम्रकरा ताम्राम्बरधराऽतुला॥६६॥

तापत्रयहरा तापी तैलासक्ता तिलोत्तमा।
स्थाणुपत्नी स्थली स्थूला स्थितिः स्थैर्यधरा स्थूला॥६७॥

दन्तनी दन्तरा दर्वी देवका देवनायिका।
दमिनी शमनी दण्ड्या दण्डहस्ता दुरानतिः॥६८॥

दुर्वारा दुर्गतिर्द्राक्षी द्राक्षा द्रविडवासिनी।
दूरस्था दुन्दुभिर्धाना दरदा दरनाशिनी॥६९॥

दुःखघ्नी द्रनगा द्रष्टा दयादाम्विक्यनाशिनी।
धर्म्या धर्मप्रसूर्धन्या धनदा धातृवल्लभा॥७०॥

धनुर्धरा धनुर्वल्ली धनुष्कवरदायिनी।
धूमाला धूम्रवदना धूमश्रीर्धूम्रलोचना॥७१॥

नलिना नर्तका नान्ता नङ्गा नलिनलोचना।
निर्मला निगमाचारा निम्नगा नगजा निमिः॥७२॥

नीलग्रीवा निरीहा च नीपोपवनवासिनी।
निरञ्जनजनी जन्मा निद्रालुर्नीरवासिनी॥७३॥

नटिनीनाद्यनिरता, नवनीतप्रियाऽऽनिला।
नारायणी निराकारा निर्लेपा नित्यवल्लभा॥७४॥

पद्मावती पद्मकरी पुत्रदा पुत्रवत्सला।
परोत्तरा पुरी पीठा पीतश्रोत्रा पुलोमजा॥७५॥

पुष्पिणी पुस्तककरा पटुपाठीरवाहना।
पापघ्नी पम्पिना पापी पली परमसुन्दरी॥७६॥

पिशाची च पिशाचघ्नी पानपात्रधरा पुटा।
पूर्णिमा पञ्चमी पौत्री पुरूरववरप्रदा॥७७॥

पञ्चयज्ञापञ्चशरी पञ्चाशतिमनुप्रिया।
पाञ्चाली पञ्चपुत्रा च पूजा पूर्णं मनोरथा॥७८॥

फलिनी फल दात्री च फल्गुहस्ता फणिप्रिया।
स्फिरङ्गहा स्फीतमतिः स्फीतिः स्फीतिमती स्फुटा॥७९॥

बलमाया बलस्तुत्या बिहसेना बलाऽबला।
बगलेश्वरपूज्या च बलिनी बलवर्धिनी॥८०॥

बुद्धमाता बौद्धमतिर्बद्धबन्धनमोचिनी।
भगिनी भगमाला च भगलिङ्गाऽमृतस्त्रवा॥८१॥

भीमेश्वरी च भीरुण्डा भगेशी भगसर्पिणी।
भगलिङ्गस्थिता भग्या भाग्यदा भगमालिनी॥८२॥

मत्ता मनोहरा मेना मैनाकजननी मुरी।
मुरली मानवी होत्री मनस्विजनमोदिता॥८३॥

मत्तमातङ्गगा माद्री मरालगतिरञ्चला।
यज्ञेश्वरीश्वरी यक्षा यजुर्वेदप्रिया श्रुता॥८४॥

यशोवती यतिस्था च यतात्मा यतिवल्लभा।
यवनी यौवनस्या च यवा यक्षजनाश्रया॥८५॥

यज्ञसूत्रप्रदा ज्येष्ठा यज्ञभूर्धूपमूलिनी।
रञ्जिता राजपत्नी च राजसूय फलप्रदा॥८६॥

रजोवती रजश्चित्रा राज्यदा राज्यवर्द्धिनी।
राज्ञी रात्रिचरेशानी रोगघ्नी त्रिपुरेश्वरी॥८७॥

ललिता लतिका लाप्या लोपा ललनलालसा।
लाटीरद्रुमवासा च लाटीरद्रुमवर्तिनी॥८८॥

लङ्का ललज्जटाजूटा लङ्घिता सुरसुन्दरी।
लोकेशवरदा लीया लयकर्त्री महालया॥८९॥

वेदिर्विगग्ना वाणी च वेणा वेणुवनेश्वरी।
वन्दमाना व-वर्णाढ्या वाराही वीरमातृका॥९०॥

शङ्खिनी शङ्खवलया, शङ्खायुधधरा शमा।
शशिमण्डलमध्यस्था शीतलाम्बु
-निवासिनी॥९१॥

श्मशानस्था महाघोरा श्मशाननिलयेश्वरी।
सिन्धुः सूत्रवरा सत्रा समस्तकुलचारिणी॥९२॥

सप्तमी सात्विकी सत्त्वा सूत्रस्थाऽसुरसूदिनी।
सुरेश्वरी सम्प्रदद्या समस्थाचलचारिणी॥९३॥

समदा समितिः सस्मासवना सवनेश्वरा।
हंसी हरप्रिया हास्या हरिनेत्रा हराम्बिका॥९४॥

हेषा हठेश्वरी हीरा हलिनी हलदायिनी।
हेहा हाहारवबला हालाहलहताशया॥९५॥

क्षमा क्षेमप्रदा क्षामाक्षौमाम्बरधराऽक्षया।
क्षितिः क्षीरप्रिया लक्ष्मीः क्षितिभृत्तुलया
क्षुधा॥९६॥

क्षत्रिया ब्राह्मणी क्षेत्रा क्षपा क्षा बीजमण्डिता।
लंक्षः बीजस्वरूपा च क्षकाराक्षरमातृका॥९७॥

दुर्गन्धिनाशिनी दुर्वा दुर्गमा दुर्गनाशिनी।
दुर्गा दुर्गार्तिनाशिनी ओं ह्रीं दुं बिज मण्डिता।।९८।।

।।फलश्रुतिः।।

इति नामसहस्त्रं तु मन्त्रगर्भमहाबलम्।
दुर्गा यद् दुर्गतिहरं सर्वदेवनमस्कृतम्।।१।।

सर्वमन्त्रमयं दिव्यं देवदानवपूजितम्।
श्रेयस्करं महापुण्यं महापातकनाशनम्।।

यः पठेत् पाठयेद् वापि श्रृणोति श्रावयेदपि।
स महापातकैर्मुक्तो देवदानवसेवितः।।३।।

इह लोके श्रियं भुक्त्वा परत्र त्रिदिवं व्रजेत्।
दुर्गानामसहस्त्रं तु मूलमन्त्रैकसाधनम्।।४।।

अर्धरात्रे पठेद्वीरो मधुरस्मयसेवितः।
त्रिवारं वर्मपूर्वं तु, भवेद्वागीशसन्निभः।।५।।

यः पठेद् देवि मध्याह्ने स्त्रीयुतो मुक्तकुन्तलः।
तस्य वैरिकुलं त्रस्तं न्यसूदि चैव दर्शनात्।।६।।

यः पठेद् वेतसी मूले सायंपूजितभैरवः।
तस्यास्य कुहराद् वाणी निःसरेद् गद्य-पद्यभाक्।।७।।

यः पठेत् सततं देवि शयने स्त्रीरताकुलः।
स भवेद् वैरिविध्वंसी धनेन धनदोपमः।।८।।

वाग्भिर्वागीशसदृशः कवित्वेन सितोपमः।
तेजसा सूर्यसङ्काशो यशसा सूर्यसन्निभः ।।९।।

बलेन वायुतुल्योऽपि लक्ष्म्या गीर्वाणनायकः।
देवि किं बहुनोक्तेन स भवेद् भैरवोपमः।।१०।।

रवौ भूर्जे लिखेद् देवि निशीथे वाऽष्टगन्धकैः।
सस्तन्यरेतो राजस्कैः साधको मन्त्रसाधकः।।११।।

लिखित्वा वेष्टयन् नामसहस्त्रमणिमोश्वरि।
श्वेतसूत्रेण सम्वेष्ट्य लाक्षया परिवेष्टयेत्।।१२।।

सुवर्णरजताद्यैश्च वेष्टयेत् पीतसूत्रकैः।
सम्पूज्य गुटिकां देवि शुभेऽह्नि
साधकोत्तमः।।१३।।

धारयेन्मूर्ध्नि वा बाहौ गुटिकां कामदायिनीम्।
रणे रिपून् विजित्याशु कल्याणि गृहमाविशेत्।।१४।।

वन्ध्या वाम भुजे धृत्वा कृत्वा साधकपूजनम्।
पुत्रान् लभेन्महादेवि साक्षाद् वैश्रवणोपमान्।।१५।।

गुटिकैषा महादिव्या गोप्या कामफलप्रदा।
साधकैः सततं पूज्या साक्षाद्दुर्गा स्वरूपिणी।।१६।।

योऽर्चयेत् साधको दुर्गागुटिकां धारयेत् प्रिये।
पठेद् वर्म शिवे मन्त्रं नामसाहस्त्रकं परम्।।१७।।

अङ्गस्तोत्रं फलं तस्य देवि वक्ष्येऽधुना श्रृणु ।
वने राजकुले वापि दुर्भिक्षे शत्रुसङ्कटे॥१८॥

वधे यक्षपिशाचादि भूतप्रेतभये तथा।
वीरो विगतभीर्देवि सर्वत्र विजयी भवेत्॥१९॥

स्तम्भयेद् वायुसूर्ये च चन्द्रादीन् साधकोत्तमः।
मोहयेत् त्रिजगत् सद्यः कान्ताश्चाकर्षयेद्
ध्रुवम्॥२०॥

मारयेदखिलान् शत्रूनुच्चाटयति वैरिणः।
वश्येद् देवता सद्यः किं पुमांसः शिवे॥२१॥

शमयेदखिलान् रोगान् महोत्पातानुपद्रवान्।
किं किं न लभते वीरो दुर्गापञ्चाङ्गपूजनात्॥२२॥

इदं रहस्यं दुर्गायाः अष्टाक्षर्य्यः महेश्वरि ।
सर्वस्वं सारतत्त्वं च मूलविद्यामयं परम्॥२३॥

महाचीनक्रमस्थानां साधकानां यशस्करम्।
पठेत् सम्पूजयेद् देव्याः मन्त्रनामसहस्रकम्॥२४॥

इदं सारं हि तन्त्राणां तत्त्वानां तत्त्वमुत्तमम्।
दुर्गानामसहस्रं तु तव भक्त्या प्रकाशितम्॥२५॥

अभक्ताय न दातव्यं गोप्तव्यं पशुसन्निधौ।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा नरकमाप्नुयात्॥२६॥

दीक्षिताय कुलीनाय गुरुभक्तिरताय च।
शान्ताय भक्तियुक्ताय देयं नामसहस्रकम्॥२७॥

विना दानं न गृह्णीयान्न दद्याद् दक्षिणां विना।
दत्त्वा गृहीत्वाऽप्युभयोः सिद्धिहानिर्भवेद्
ध्रुवम्॥२८॥

इदं नामसहस्रं तु गु गुप्तं गोप्यतमं शिवे।
तव भक्त्या मयाऽऽख्यतं गोपनीयं
स्वयोनिवत्॥२९॥

॥श्रीरुद्रायमले तन्त्रे देवी रहस्ये दुर्गासहस्र नामाख्यं
स्तोत्रम्॥

श्रीचण्डिका नामानि विनियोगः

This stotra is called Chandikā-hṛdaya, and chaṇdikā is another name for Durgā. This is preceded by an elaborate viniyoga of the names of Durgā as chandī, involving the recital of the names of 64 yoginīs, who are attendants of Durgā.

ओं अस्य श्रीदेवी नाम्नां अगस्त्य ऋषिः। महाविराट् छन्दः। श्रीचिन्तामणि विद्येश्वरी देवता। ऐं बीजं। शं शक्तिः। सौं कीलकं। महामाया प्रसादसिद्ध्यर्थे जपे विनियोगः। ऋष्यादि न्यासः। श्रीअगस्त्य ऋषये नमः शिरसि। महाविराट् छन्दसे नमः मुखे। श्रीचिन्तामणि विश्वेश्वरी देवतायै नमः हृदि ॥

ऐँ बीजाय नमः गुह्ये। शं शक्तये नमः पादयोः। सौं कीलकाय नमः नाभौ। महामाया प्रसाद सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे॥

ओं ऐं दिव्ययोगी महायोगी, सिद्धियोगी गणेश्वरी।
प्रेताशी डाकिनी काली कालरात्री निशाचरी॥

डङ्कारी चोर्ध्ववेताली ह्रीङ्कारी भूताऽम्बरी।
ऊर्ध्वकेशी विरूपाक्षी शुष्काङ्गी नरभोजनी॥

राक्षसी घोररक्ताक्षी विश्वरूपा भयङ्करी।
वीरी कौमारी चामुण्डी वाराही मुण्ड धारिणी॥

भ्रामरी रुद्रवेताली, भीष्माशी त्रिपुरान्तकी।
भैरवी ध्वंसिनी क्रोधी दुर्मुखी प्रेतवाहिनी॥

खेटकी दीर्घलम्भोष्टो मालिनी मन्त्रयोगिनी।
कौशिकी मादनी यक्षी रोमजङ्घा प्रवारिणी॥

कालाग्निग्राहिणी चक्री कङ्काली भुवनेश्वरी।
फट् कारी वीरभद्रेशी धूम्राक्षी कलहप्रिया॥

कण्टकी नाटकी मारी, यम दूती करालिनी।
सहस्राक्षी काम लीला, काम दंष्ट्राढ्याऽधोमुखी॥

धुर्जटी विकटी घोरी कपाली विषलङ्गिनी।
चतुष्षष्टि समाख्याता योगिन्यो वरसिद्धिदाः॥

॥फल श्रुतिः॥
नित्यंस्मरणमात्रेण सर्वपापक्षयो भवेत्॥

XIX

Different forms of Durgā are propitiated by different mantras. Each mantra has its own ṛshi, chhandas and Devatā. The Mantra becomes effective only when repeated a specified number of times in the prescribed manner

(puraścharaṇa). Below are given the details of some of the mantras commonly in vogue.

I

Durgā-mantra

ततो दुर्गामनुं वक्ष्ये दृष्टादृष्टफलप्रदम्।
माया त्रिःकर्णबीजाढ्यो भूयोऽसौ सर्गवान् भवेत्।।

पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः।
तारादिहृदयान्तोऽयं मन्त्रो वस्वक्षरात्मकः।।

ऋषिश्च नारदश्छन्दो गायत्रं देवता मनोः।
दुर्गा समीरिता सद्भिर्दुरितापन्निवारिणी।।

नमस्कारवियुक्तेन मूलमन्त्रेण साधकः।
द्रामाद्यैः सह कुर्वीत षडङ्गानि यथाविधि।।

(Śāradā-tilaka-tantra)

(a) The dhyāna-verse for this mantra :

अथ ध्यानम्।
सिंहस्था शशिशेखरामरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता।

आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीरणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु वो रत्नोल्लसत्कुण्डला।।

(b) The puraścharaṇa for the mantra.

अथ पुरश्चरणम्।
वसुलक्षं जपेन्मन्त्रं तिलैर्मधुरलोलितैः।
पयोऽन्धसा वा जुहुयात् तत्सहस्रं जितेन्द्रियः।।

इति दुर्गामन्त्रः।

II

The Mahisha-mardinī-mantra, which is eight-lettered.

अथ महिषमर्दिनीमन्त्रः।
भान्तं वियत्सनयनं श्वेतो मर्दिनि ठद्वयम्।
अष्टाक्षरी समाख्याता विद्या महिषमर्दिनी।।

(Śāradā-tilaka-tantra)

(अयं मन्त्रो मायाप्रणवाद्यन्यतमबीजाढ्यो नवाक्षरो भवति।)

(a) It becomes nine-lettered

when preceded by the seed-lettered Hrīm and Om.

त्रैलोक्यबीजभूतान्ते सम्बोधनपदं ततः।
सृष्टिसंहारकौ वर्णौ विद्यामहिषमर्दिनी॥

प्रणवाद्यां जपद्विद्यां मायाढ्यां वा जपेत् सुधीः।
बधूबीजादिकां वाऽपि कवचाढ्यां जपेत् तथा॥

(Kula-chuḍāmaṇi-tantra)

(b) A variant form :

महिषहिंसिके हुँ फट् हृदयं परिकार्तितम्।
महिषशत्रो सार्षि हुँ फट् शिरोऽङ्गं समुदाहृतम्॥

महिषं द्वेषय द्वन्द्वं हुँ फडन्तः शिखामनुः।
महिषं हनयुग्मान्ते देवि हुँ फट् तनुच्छदम्॥

महिषान्ते सूदिनि हुं फडन्तं शस्त्रमीरितम्।
मन्त्रैरेतैर्जातियुक्तैः पञ्चाङ्गानि प्रकल्पयेत्॥

(Śāradā-tilaka-tantra)

(c) The verse for contemplation

(ध्यानम्॥)
गारूडोपलसन्निभां मणिमौलिकुण्डमण्डितां
नौमि बालविलोचनां महिषोत्तमाङ्गनिषेदुषीम्।
चक्रशङ्खकृपाणखेटकवाणकार्मुकशूलकाँ-
स्तर्जनीमपि बिभ्रतौं निजबाहुभिः शशिशेखराम्॥

(d) The Puraścharaṇa for the mantra.

(पुरश्चरणम्॥)
अष्टलक्षं जपेन्मन्त्रं तत्सहस्त्रैस्तिलैः शुभैः।
(जुहुयादिति शेषः।)

III

Śūlinī- mantra

शूलिनीमन्त्रः।
ज्वलज्वलपदस्यान्ते शूलिनीति पदं वदेत्।
दुष्टाग्रहं हुमस्त्रान्ते वह्निजायावधिर्मनुः॥

पञ्चभिर्दशभिः प्रोक्तो ग्रहशत्रुविनाशनः।
ऋषिर्दिर्घतमा प्रोक्तः ककुच्छन्द उदाहृतम्॥

शूलिनी देवता प्रोक्ता समस्तसुरवन्दिता।
दुर्गे हृद्वरदे शीर्ष विन्ध्यवासिनि तच्छिखा॥

असुरान्ते मर्दिनी स्याद्युद्धपूर्वप्रिये पुनः।
त्राशयद्वितयं वर्म देवसिद्धसुपूजिते॥

नन्दिनी स्ताद्रक्षयुगं महायोगेश्वरी क्रमात्।
शूलिन्याद्या हुँ फडन्ताः पञ्चाङ्गमनवः स्मृताः॥

(Śāradā-tilaka-tantra)

(a) The verse for contemplation :

(ध्यानम्॥)
अध्यारूढां मृगेन्द्रं सजलजलधरश्यामलां हस्तपद्मैः
लंशू बाणं कृपाणीमरिजलजगदाचापपाशान् वहन्तीम्।
चन्द्रोत्तंसां त्रिनेत्रां चतुसृभिरसिना खेटकान् बिभ्रतोभिः
कन्याभिः सेव्यामानां प्रतिभटभयदां शूलिनीं भावयामि॥

(b) The puraścharaṇa for the mantra

(पुरश्चरणम्॥)
मनुमेनं जपेन्मन्त्री वर्णलक्षं विचक्षणः।
सर्पिषाऽऽज्येन होमस्तु पद्दशांशमितो भवेत्॥

IV

Vana-durgā-mantra

(वनदुर्गामन्त्रः॥)

उत्तिष्टपदमाभाष्य पुरुषि स्यात् पदं ततः।
पितामहः सनेत्रे नः स्वपिषि स्याद्धयं च मे॥

समुपस्थितमुच्चार्य यदि शक्यमनन्तरम्।
अशक्यं वा पुनस्तन्मे वदेद्भगवतिं ततः॥

शमयाग्निवधूः सप्तत्रिंशद्वर्णात्मको मनुः।
ऋषिरारण्यकश्छन्दोऽप्यत्यनुष्टुबुदाहृतम्॥

देवता वनदुर्गा स्यात् सर्वदुर्गविमोचनी।
षड्भिश्चतुर्भिरष्टाभिरष्टाभिः षड्भिरिन्द्रियैः॥

मन्त्रार्णैरङ्गकलप्तिः स्याजातियुक्तैर्यथाक्रमम्।

(a) The verse for contemplation

अथ ध्यानम्। सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनोसन्निभां शङ्कं चक्रवराभयानि दधतीमिन्दोः कलां बिभ्रतीम्।

ग्रैवेयाङ्गदरारकुण्डलधरामाखण्डलाद्यैः स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम्।।

(b) The puraścharaṇa for the mantra

एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः।
जुहुयाद्धविषा मन्त्री शालिभिः सर्षिषा तिलैः।।

V

Chāmuṇḍā-mantra, as included in Nava-durgā

(नवदुर्गात्मकचामुण्डामन्त्रः।)
अथातः संप्रवक्ष्यामि चामुण्डाया महामनुम्।
नवदुर्गात्मकं यस्य सेवनाद्भुक्तिमुक्तयः।।

सुरथो यत्प्रसादेन राज्यं प्राप्याभवन्मनुः।
संसारबन्धनिर्णाशि ज्ञानप्ताप्तं समाधिना।।

मार्कण्डेयपुराणोक्तं चरितत्रितयं स्तवः।
जपाद्यस्य फलं दद्यात् तं मनुं वच्मि साम्प्रतम्।।

वाग्लज्जकामबीजानि चामुण्डायै पदं वदेत्।
विच्चे नवार्णमन्त्रोऽयं शक्तिमन्त्रोत्तमोचमः।।

ब्रह्मविष्णुमहेशास्तु मुनयोऽस्य प्रकीर्त्तिताः।
गायत्र्युष्णिगनुष्टुप् च छन्दस्त्रयमुदीरितम्।।

देवताऽस्य महाकाली महालक्ष्मीः सरस्वती।
नन्दा शाकम्भरी भीमा शप्रियमुदाहृतम्।।

तिस्रोऽस्य शक्तयो दुर्गा भ्रामरी रक्तदन्तिका।
अग्निवायुभगास्तत्वं प्राग्वदुष्यादिकं न्यसेत्।।

(Meru-tantra)

ततः षडङ्गं कुर्वीत विभक्तैर्मूलवर्णकैः।
एकैनैकेन चैकेन चतुर्भिर्युग्मकेन च।।

नमस्तेनैव मन्त्रेण कुर्यादङ्गानि षट् क्रमात्।

(a) The verse for contemplation :

(ध्यानम्।।)
ततो देवीत्रयं ध्यायेत् कालिकाध्यानमुच्यते।
दशास्यां दशपादां च दशहस्तां विधिस्तुताम्।।

इद्रनीलद्युतिं खङ्गं चक्रं शङ्खं शिरः शरान्।
दक्षहस्तेषु दधतीं गदां शूलं भुशुण्डिकाम्।।

परिघं च धनुर्वामे दधतीं ब्रह्मसंस्तुताम्।
मधुकैटभनाशार्थं सालङ्कारां त्रिवीक्षणाम्।।

तन्त्रान्तरेऽपि।
खङ्कं चक्रगदेषुचापपरिधान् शूलं भुशुण्डीं
शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्।
नीलश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौच्छयितं हरौ कमलजो हन्तुं मधुं
कैटभम्।।

VI

Mahā-Lakshmī-mantra

(महालक्ष्मीध्यानम्।)
ततो ध्यायेन्महालक्ष्मीं महिषासुरमर्दिनीम्।
समस्तदेवतातेजोजातां पद्मासनस्थिताम्।।

अष्टादशभुजामक्षमालां पद्मं च शायकान्।
खङ्गं वज्रं गदां चक्रं दक्षहस्ते कमण्डलुम्।।

(Meru-tantra)

शङ्खं च दधतीं वामे शक्तिं च परशुं धनुः।
चर्मदण्डौ सुरापात्रं घण्टां पाशं त्रिशूलकम्।।

अन्यत्रापि।
अक्षस्त्रक्परशू गदेषुफुलिशान् पद्मं धनुः
कुण्डिकां
दण्डं शक्तिमसि च चर्म जलजं घण्टां
सुराभाजनम्।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे शैरिभमर्दिनीमिह महालक्ष्मी सरोजस्थिताम्।।

VII

Sarasvatī-mantra

(सरस्वतीध्यानम्।।)
(a) dhyāna

सरस्वतीं ततो ध्यायेच्छरच्चन्द्रसमप्रभाम्।
शङ्खं च मुशलं चक्रं बाणान् दक्षेषु बिभ्रतीम्।।

घण्टां शूलं हलं चापं वामहस्तेषु बिभ्रतीम्।
गौरीदेहसमुद्भूतां नृणामानन्ददायिनीम्।।

आदारभूतां जगतः शुम्भादिकविमर्दिनीम्।
अदिष्टात्रीं तृतीयस्य चरित्रस्य स्मरेत् सदा।।

Meru-tantra

घण्टाशूलहलानि शङ्खमुशले चक्रं धनुः
शायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुशुक्लप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यादिनीम्।।

(b) Puraścharaṇa

(पुरश्चरणम्।।)
सितपक्षतिमारभ्य चाष्टम्यन्तमिषस्य यः।
जपेल्लक्षं मनुं होमं खाद्यैस्त्रिमधुराप्लुतैः।।

प्रत्यहं पूजयेद्ददेवीं चण्डीमाद्यन्तयो पठेत्।
विप्रान् गुरून् समाराध्य वाञ्छितं लभते द्रुतम्।।

VIII

Jayadurgā-mantra

(जयदुर्गामन्त्रः।।)
तारो दुर्गेयुगं रक्तमन्त्यढान्तौ सलोचनौ।
द्विठान्ता जयदुर्गेयं विद्या वेद्या दशाक्षरी।।

तारादिदुर्गे ह्रदयं दुर्गे शिर इतीरितम्।
दुर्गायै स्याच्छिखा वर्म भूतरक्षिणि कीर्त्तितम्।।

(Śāradā-tilaka-tantra)

तारादिदुर्गेयुगलं रक्षिण्यस्त्रमुदीरितम्।

dhyāna

(ध्यानम्।।)
कालाभ्राभां कटाक्षैररिकुलभयदां
मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम्।
सिंहस्कन्धदिरूढां त्रिभुवनमखिलं तेजसा
पूरयन्तीं
ध्यायेदुदुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां
सिद्धिकामैः।।

(b) Puraścharaṇa

(पुरश्चरणम्।।)
बाणलक्षं जपेन्मन्त्रं घृतेन जुहुयात् ततः।
दशांशं संस्कृते बह्नौ ब्राह्मणानपि भोजयेत्।।

CHAPTER FIVE

ŚĀRADA-NAVARĀTRA-DURGOTSAVA

(THE NINE NIGHTS FESTIVAL)

The annual worship of Durgā during the nine nights of the Autumnal season (Śarat, hence called Śaran-navarātri) are considered especially sacred and propitious. The festival begins with the installation of the sacred kalaśa on the first day (prathamā, pratipat) of the bright half of the month Aśvin (or Āśvayuja) of the Indian

calender, corresponding usually to September-October, and continues for nine succeeding days, culminating on the tenth day (Vijayā-Daśamī).

The day suitable for commencement of the ritual-festival is of course the first day of the lunar month. But there must not a carry-over of the previous day (viz. amāvāsyā or newmoon) on that day; it would then be unsuitable. However, if the next day (dvitīyā) begins even on the first day, the day is auspicious to begin the pūjā.

The following verses bring out these details. *Mahā-kāla-samhitā* prescribes the first day as suitable for the installation of kalaśa, while *Devī-purāṇa* provides for this ritual on the seventh day (`saptamyām kalaśa-sthāpanam vakshyate'). The *Yāmala* also favours the first day for the installation (`pratipadyeva kartavyam kalaśa-sthāpanam). But the first day must be free from defects of yoga and tithi (`kuhū-koshṭhopayuktam varjayet pratipat-tithim'), according to *Devī-purāṇa.*

The worship is said to be nocturnal (nakta) (`nava-rātrā-bhidam karma nakta-vratam idam smṛtam'). However, the kalaśa-sthāpanā and kumbhābhisheka are never done in the night. According to some authorities, worship must be only during daytime. *(Matsya-purāṇa)* `na rātrau sthāpayet kumbham na cha kumbhabhishechanam'). The expression `nava-rātri' only means nine lunar days (`nava-rātra-śabdastu nava-tithi-para eva') or nine days and nights (navāhorātra)

प्रतिपद्येव शुक्लायां बोधयित्वा सुरेश्वरीं।
अभ्यर्चयेन्नवानि तन्त्रपौराणिकक्रमैः॥१॥

यदा तु षोडशभुजां महामायां प्रपूजयेत्।
दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै श्रृणु॥२॥

कन्यायां कृष्णपक्षे तु एकादश्यामुपोषितः।
द्वादश्योमेकभक्तं च नक्तं कुर्यात् परेऽहनि॥३॥

चतुर्दश्यां महामायां बोधयित्वा विधानतः।
गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः॥४॥

अयाचित बुधः कुर्यादुपवासं परेऽहनि।
एवमेव व्रतं कुर्याद्यावहै नवमी भवेत् इति॥५॥

(Mahākāla-samhitā)

पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी।
नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता॥१॥

अमायुक्ता सदा चैव प्रतिपन्निन्दिता मता।
तत्र न स्थापयेत् कुम्भं दुर्भिक्षं जायते ध्रुवम्॥२॥

(Mārkaṇḍeya-purāṇa)

श्रृणु राजन् प्रवक्ष्यामि चण्डिकापूजनक्रमम्।
आश्विनस्य सिते पक्षे प्रतिपत् सुशुभे दिने॥३॥

शुद्धे निथौ प्रकर्त्तव्यं प्रतिपच्चोर्ध्वगामिनी।
आद्यास्तु नाडिकास्त्यक्तवा षोडश द्वारशापि
वा॥१॥

अपराह्णे च कर्त्तव्यं सुद्धसन्ततिकाङ्क्षिभिः।
आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः।
कलशस्थापनं तत्र अरिष्टं जायते ध्रुवम्॥२॥

वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव।
द्वितीयादिगुणैर्युक्ता प्रतिपत् सर्वकामदा॥३॥

आश्विने प्रतिपत् पूर्णा शुद्धा या तु भवेन्नृप।
आरभ्यं नवरात्रं स्ताद्धित्वा चित्रां च वैधृतिम्॥४॥

प्रतिपद्याश्विने मासि नरो वैधृतिचित्रयोः।
आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम्॥५॥

वैधृतौ पुत्रनाशः स्ताच्चित्रायां धननाशनम्।
तस्मान्न स्थापयेत् कुम्भं चित्रायां वैधृतौ तथा॥६॥

सम्पूर्णा प्रतिपद्देवि चित्रायुक्ता यदा भवेत्।
वैधृत्या वाऽपि युक्ता स्यात् तदा मध्यन्दिने रवौ।।७।।

(Rudra-yāmala)

अभिजित् तु मुहूर्त्तं यत् तत्र स्थापनमिष्यते।
चित्रावैधृतिसम्पूर्णा प्रतिपच्चेद्भवेन्नृप।
त्याज्या ह्यंशास्त्रयस्त्वाग्रास्तुरीयांशे तु पूजनम्।।८।।

चित्रादियुक्ताऽपि द्वितीयायुता चेन्न दुष्टेत्युक्तं

(Bhavishya-purāṇa)

भद्रान्विता चेत् प्रतिपत् तु लभ्यते
विरुद्धयोगैरपि सङ्गता सती।
स वै पराह्वे विबुधैर्विधेया
श्रीपुत्रराज्यादिविवृद्धिहेतुः।।९।।

(a) Prior to the installation of the Kalaśa the preparation of the seat of the barley grains is prescribed.

भेरीमृदङ्गडमरूघण्टापटहनिःस्वनैः।
महोत्सवं प्रकुर्वीत यवारोपणकर्मणि।।१।।

प्रसृते च दशम्यां वै भद्राभद्रं विचारयेत्।
विचारस्त्वन्यत्र।
सम्यक् समुद्गता दीर्घा ऋजवश्चाङ्कुराः शुभाः।।२।।

अनुद्गताः कुण्ठिताग्रा ह्रस्वाः शुष्काश्च भङ्गुराः।
कीटाखुभुक्ताः शटिताः विषमाश्चाशुभाः
स्मृताः।।३।।

तत्र संस्थापयेत् कुम्भं विधिना मन्त्रपूर्वकम्।
सौवर्णं राजतं वाऽपि ताम्रं मृण्मयमेव वा।।४।।

(Rudra-yāmala)

Installation of Kalaśa during night is prohibited :

न रात्रौ स्थापयेत् कुम्भं न च कुम्भाभिषेचनम्।

(Mātsya-purāṇa)

भास्करोदयमारभ्य यावत् तु दश नाडिकाः।
प्रातःकाल इति प्रोक्त स्थापनारोपणादिषु।।

(Vishṇu-purāṇa)

(b) The ritual of awakening of the goddess is resorted to on the evening or night of the sixth day and is invoked in Bilva-twigs or fruits. On the seventh day, she is worshipped in the Bilva-twig.

(c) After the ceremonial installation of the sacred Kalaśa, worship for nine days must begin. The eighth day is the day for special worship and fasting, keeping awake during night (except for one who has a son) and offering of sacrifices. The ninth day is propitious. The deity must be discarded after worship on the tenth day. Kumārī-pūjā is also done on the ninth day. During worship Jayadurgā-mantra is used. On the tenth day Śābarotsava is also prescribed. It is a tribal festival.

नैमित्तिकोक्तविधिना नवाहानि प्रपूजयेत्।
उपोषणं तथाऽष्टम्यां प्रभूतबलिदानकम्।।१।।

नवम्यामाचरेद्धीमान् दशम्यां तु विसर्जयेत्।
पुत्रिणा तु महाष्टम्यामुपवासो न कार्यः।
उपवासं महाष्टम्यां पुत्रवान् न समाचरेत्।।२।।

बोधयेद्बिल्वशाखासु षष्ठ्यां देवीं फलेषु च।
सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्।।३।।

पुनः पूजां तथाऽष्टम्यां विशेषेण समाचरेत्।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि।।४।।

प्रभूतबलिदानं च नवम्यां विधिवच्चरेत्।
जपहोमसमायुक्तो भोजयेद्वै कुमारिकाः।।५।।

ध्यायेद्दशभुजां देवीं दुर्गातन्त्रेण पूजयेत्।
विसर्जनं दशम्यां तु कुर्याद्वै शाबरोत्सवैः।।७।।

(Durgā-tantra)

(d) It is prescribed that the awakening of the goddess must be done on the sixth day in the conjuction of the Jyeshṭhā constellation ; the formal invocation of the goddess is done on the seventh day when the Mūlā-constellation is present. And the discarding of the deity after worship is done at the end of the Śravaṇa-constellation on the tenth day, at night.

व्रती प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात् तिथेः॥

(Bhavishya-purāṇa)

केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपत्तिथौ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे॥१॥

दर्पणं च तृतीयायां सिन्दुरालक्तकं तथा।
मधुपर्कं चतुर्थ्यां च शक्त्याऽलङ्करणानि च॥२॥

षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत्॥३॥

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया।
रवेरुदयमिच्छन्ती न तत्र तिथियुग्मता॥४॥

(Kṛtya-tattvārṇava)

भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः॥५॥

पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं चण्डीप्रवेशे
शुभा॥६॥

पत्रीप्रवेशात् पूर्वेद्युः सायाह्ने विल्ववासिनीम्।
चण्डीमामन्त्रयेद्विद्वान्नात्र षष्ठीपुरस्क्रिया॥७॥

(Brahmāṇḍa-purāṇa)

(1) The seventh day is prescribed for the installation of the Sarasvatī-form of the deity, Durgā, when the Mūlā-constellation prevails. This form is invoked in books; and during this period (till the tenth day) no study must be undertaken, no teaching must be given; otherwise learning will not be effective. Sarasvatī is discarded in the Śravaṇa constellation on the tenth day.

मूलनक्षत्रमारभ्य पूजनीया सरस्वती।
पूजयेत् प्रत्यहं देवीं यावद्वैष्णवमृक्षकम्।।१।।

नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन।
पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमः।।२।।

आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम्।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्।।३।।

(2) The eight day is one of the two important days for worship; and is therefore called mahāshṭamī, the other day being mahānavamī. It is the day suitable not only for worship but for ritual fasting (upavāsa). But one should take care to avoid the ashṭamī if it also involves part of the Saptamī. The eighth day, when part of the ninth (navamī) overlaps with it, is regarded as especially auspicious, for the ninth day is sacred for Pārvati while the eighth is the day of Śiva. Conjunction of the two is meritorious. It is Umā-maheśvarī. The eighth day which is known as Durgotsava is similar to Krshṇāshṭamī. It is on this day that Bhadra-kālī made her appearance to destroy the sacrificial session of Daksha, in company with millions of yoginīs. The worship of this deity is to be conducted in the night.

शरन्महाष्टमी पूज्या नवमीसंयुता सदा।
सप्त मीसंयुता नित्यं शोकसन्तापकारिणी॥१॥

जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः॥२॥

तस्मात् सर्व्रयत्नेन सप्तमीमिश्रिताऽष्टमी।
वर्जनीया प्रविज्ञाय मनुजैः शुभकाङ्क्षिभिः॥३॥

सप्तमीं शल्यसंयुक्तां मोहादज्ञानतोऽपि वा।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते॥४॥

सप्तमी कलया यत्र परतश्चाष्टमी भवेत्।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम्॥५॥

(Smṛti-saṃgraha)

नाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता।
नवम्या सह कार्या स्यादष्टमी सर्वथा बुधैः॥६॥

अष्टमी नवमीयुक्ता महोत्साहो महोत्सवः॥७॥

(Nirṇayāmṛta)

सप्तमी वेधसंयुक्ता यैः कृता तु महाष्टमी।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत्॥८॥

(Devī-purāṇa)

उमाया नवमी प्रोक्ता हरस्य तिथिरष्टमी।
द्वयोरैक्ये महापुण्या उमामाहेश्वरी तिथिः॥९॥

(Bhojarājīyam)

सप्तमी शल्यसंविद्धा वर्जनीया महाष्टमी।
स्तोकाऽपि सा महापुण्या यस्यां सूर्योदयो भवेत्॥१०॥

(`stoka' here means one ghaṭikā)

यदाऽष्टमीं तु सम्प्राप्य ह्यस्तं याति दिवाकारः।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि॥११॥

यदा सूर्योदये न स्तान्नवमी चापरेऽहनि।
तदाऽष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप॥१२॥

(Smṛti-saṃgraha)

सप्तम्यामुदिते सूर्ये परतो याऽष्टमी भवेत्।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि।।१३।।

महाष्टम्यां भगवती भद्रायामपि पूजिता।
ददाति चायुरारोग्यं यते भद्रास्वरूपिणी।।१४।।

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत्।
कुजवारो भवेत् तत्र पूजनीया प्रयत्नतः।।१५।।

(Madana-ratna)

तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह।।१६।।

अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैः।
त्रिसन्ध्य पूजयेद्देवीं जपस्तोत्रपरायणः।।१७।।

आश्विनस्य सिते पक्षे या तु स्यात् तिथिरष्टमी।
तस्यां रात्रौ पूजनीया महाविभवविस्तरैः।।१८।।

(3) The ninth day is mahānavamī. It is auspicious when ashṭamī continues on this day. This was the day on which Durgā killed the demon Mahishāsura and secured the welfare of the worlds. Offerings of sacrifices as part of ritual worship must be made on this day, for it is more meritorious than what is done on the ashṭamī-day. It must be performed in the afternoon.

अष्टम्या सहिता कार्या सा महानवमी तिथिः।
अष्टम्या सहिता रिक्ता न कदाचित् परायुता।

(Brahma-siddhānta-sāra)

अष्टम्या सहिता रिक्ता न कदा चित् परायुता।।१।।

अष्टम्या नवमी विद्धा कर्त्तव्या फलकाङ्क्षिभिः।
अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता।।२।।

अष्टम्या सहिता रिक्ता प्रकर्त्तव्या सदा बुधैः।
पूर्णायुक्तां तदा कुर्यात् का चिन्नास्त्यष्टमीयुता।।३।।

(Mātsya-purāṇa)

श्रावणी दुर्गनवमी दुर्वा चैव हुताशनी।
पूर्वविद्धा च कर्त्तव्या शिवरात्री बलेर्दिनम्।।४।।

अश्वयुक् शुक्लपक्षे तु याऽष्टमी मूलसंयुता।
सा महानवमी नाम त्रिषु लोकेषु दुर्लभा।।५।।

सूर्योदयेऽपि द्विमुहर्त्तत्वमनुकल्प एव ।
द्विमुहूर्त्ताऽपि कर्त्तव्या या तिथिर्वृद्धिगामिनी।।६।।

तत्राश्वयुक्तनवमी मूहूर्त्त वा कला यदि।
सा तिथिः सकला
ज्ञेयालक्ष्मीविद्याजयार्थिभिः।।७।।

(Saura-purāṇa)

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत्।
प्रभाते वलिदाने तु कियन्मात्राऽपि लभ्यते।
नवम्यां तत्र सम्पूज्य दुर्गां दुर्गार्त्तिनाशिनीम्।।९।।

पूजाङ्गबलिदानमष्टम्यामपि कर्त्तव्यम्।
अष्टम्यामधिकं देयं सप्तमीबलिदानतः।।
इति महाकालोक्तेः। किन्तु प्रभूतबलिदानं तत्र निषिद्धम्। प्रभूतबलिदानं तु न कुर्यान्नवमीं
विना।।१०।।

एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणोदये।
घातयेन्महिषान् मेषान् रटतो नतकन्धरान्
शातमर्धशतं वाऽपि तदर्धं वा यथेच्छया
।।११।।

नवम्यामपराह्ने तु वलिदानं प्रशस्तते।
दशामीं वर्जयेत् तत्र नात्र कार्या विचारणा।।१२।।

या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः।।१३।।

नवमीशेषयुक्तायां दशम्यामपराजिता।
ददाति विजयं देवी पूजिता जयवर्धिनी।।१४।।

(Nirṇaya-sindhu)

(4) The tenth day is prescribed for the worship of the goddess in her Aparājitā form. It is to be done in the afternoon, when the daśamī-tithi prevails for a longer period. This must be followed by yātrā in the evening, signifying victory over

evil forces. Hence the day is known as Vijaya-daśamī. Rāma is said to have begun his expedition against Rāvaṇa on this day. The Yātrā is to take place when Śravaṇā constellation prevails. The deity is also to be formally discarded (visarjana) during this period, but care must be taken that the ritual of visarjana is done when there is still day-time, for night is prohibited for visarjana as for sthāpanā.

दशम्यां तु नरैः सम्यक् पूजनीयाऽपराजिता।
ऐशानीं दिशमाश्रित्य चापराह्ने प्रयत्नतः।।१।।

असत्त्वे तु एकादशमुहूर्त्तव्यापिनी ग्राह्या।।२।।

(Skānda-purāṇa)

आश्विनस्य सिते पक्षे दशम्यां सर्वरात्रिषु।
सायंकाले शुभा यात्रा दिवा वा विजयक्षणे।।३।।

एकादशो मुहूर्त्तोऽपि विजयः परिकीर्तितः।
तत्र सर्वै विंधातव्या यात्रा विजयकाङ्क्षिभिः।।४।।

उदये दशमी किंचित् संपूर्णैकादशी यदि।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा।।५।।

श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः।
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः।।६।।

श्रवणान्वितायां दशम्यां केवलायामेव दशम्यां वा विसर्जनं कार्यम्।।

III

(1) This festival of Navarātra is both kāmya (optional) and nitya (imperative). It is kāmya in that it fulfills all desires, and nitya for its nonperformance entails the sin of omission. Śaran-navarātri is similar to Vasanta-navarātri (associated with Rāma's victory over Rāvaṇa). The background story is given here. Even the Vasanta-navarātri celebrates Durgā , due to whose grace Rāma became victorious.



Hence both navarātris are to be celebrated by devotees.

अधुना कथयिष्यामि सरहस्यं विशेषतः।
शारदीयां च वासन्तीमर्चां नानाफलप्रदाम्॥१॥

मनीषिणो विदधति विचारानत्र भूयशः।
स्मृत्यध्वचारिणः सर्वे कौलिकाः सर्व एव च॥२॥

त्रैविध्यमध्ये किंरूपाः भवतीयं समर्हणा।
यस्याकरणतः पापं जायते नित्यमेव तत्॥३॥

विधानाद्यस्य च फलं जायते काम्यमेव तत्।
अननुष्ठानतो यस्य पापमुत्पद्यते परम्॥४॥

विधानाच्च फलं वाऽपि तन्नैमित्तिकमुच्यते।
इयं या शारदी पूजा कथ्यते सा किमात्मिका॥५॥

केचित् काम्यां वदन्त्येनां केचिन्नैमित्तिकीमपि।
पूर्वं फलश्रवणतः शरदागमनात् परे।
नित्यामेनामेव के चिद्वदन्ति कुलमार्गगाः।
त्रिपुरघ्नाय यद्वाक्यं पुरोवाच सुरेश्वरी॥६॥

शारदीयामिमां पूजां न करिष्यन्ति ये नराः।
ते पतिष्यन्ति निरये पापाः पूजापहारकाः।
इत्यादिवाक्यान्नित्यत्वमभिधानादथ श्रुतेः॥७॥

घटते काम्यता चास्यास्तत्र हेतुं वदामि ते।
अत्रापि चण्डिकावक्त्राम्बुजोद्भूतसुधासमम्॥८॥

वचः कलय कल्याणि काम्यताप्रतिपादकम्।
शरत्कालीनपूजां ये कर्त्तारो भक्तिभाविताः।
तेषां दास्याम्यहं शम्भोः स्वर्लोकि वसतिं सदा॥९॥

इत्थं नानाफलोल्लेखश्रवणात् काम्यताऽपि च।
शरदागमने हेतुमुपन्यस्यास्य ये बुधाः॥१०॥

नैमित्तिकत्वं ब्रुवते न ते पण्डितबुद्धयः।
कालो न स्यादुपादानकारणं कस्य वस्तुनः॥११॥

तदागमनहेतुत्वे नित्यस्यापि न नित्यता।
अकृते जायते नैनः कृते च न भवेत् फलम्॥१२॥

नैमित्तिकस्येदृशं हि ब्रुवाणैर्लक्षणं प्रिये।
फलाद्याधायके किं नो दृश्यते वचने उभे॥१३॥

तस्मादत्र हि विज्ञेया नित्यकाम्यत्वमीश्वरि।
यथा च शारदीयार्चा वासन्त्यर्चा तथैव च॥१४॥

नानयोर्विद्यते भेदः स्वल्पोऽपि निगमादिषु।
आसीत् पूर्वं महापूजा वासन्त्येव जगत्त्रये।
रामरावणयोर्युद्धे जाते त्रेतायुगान्तरे॥१५॥

कालिकाङ्गीतकृत्वेन हन्तुं रामेऽशकन्न तम्।
ततो वै चिन्तितो भूत्वा ब्रह्मा सुरगणैर्वृतः॥१६॥

कालिकां बोधयामास हिमालयकृतालयाम्।
त्वदुपासकयोर्देवि युध्यतो घोरमाहवे॥१७॥

अस्त्रशिक्षां लाघवं च समागत्यावलोक्य च।
एवमभ्यर्थिता देवि अकाले बोधिता तथा॥१८॥

जगाम ब्रह्मणा सार्धं लङ्कां द्रष्टुं रणं तयोः।
शुक्लप्रतिपदीषस्य प्राप्तां तं देशमीश्वरी॥१९॥

सप्तरात्रं निराहारं महद्युद्धमहर्निशम्।
तयोर्दिव्यास्त्रप्रयोगसंहारपरयोरभूत्॥२०॥

रामः शशाक नो हन्तुं राक्षसं काल्युपासकम्।
स चापि नाशकद्रामं स्वयं विष्णुमुपागतम्॥२१॥

समीक्ष्य राक्षसो बाहुबलं देवीं तुतोष ह।
स्वभक्त इति कृत्वाऽस्मिन् पक्षपातं चकार च॥२२॥

रक्षस्यनुग्रहं दृष्ट्वा ब्रह्मा सर्वैः सुरैः सह।
संतुष्टाव स्तवैर्दिव्यैर्भक्तया प्रणतकन्धरः॥२३॥

काकूक्तया प्रणिपातैश्च नमस्कारैः स्तवैरपि।
तुष्टा ब्रह्माणमूचे सा हृत्स्थं वत्स वरं वृणु॥२४॥

वरं वव्रे ततः सार्धं त्रिदशैश्च चतुर्मुखः।
त्वत्पादयोर्भक्तमपि त्यजैनं दुष्टराक्षसम्॥२५॥

मय्यनुग्रहलेशेन विष्णोर्मान्यतयाऽपि च।
कृपादृष्ट्या च देवेषु धर्मसंस्थापनाय च॥२६॥

त्रिलोकी जायतां सुस्था देवाः सन्तु मखाशिनः।
तपस्तपन्तु मुनयश्चातुर्वर्ण्यं प्रवर्त्तताम्॥२७॥

एष वीरजिताँल्लोकाञ्छस्त्रपूतश्च गच्छतु।
पूजां प्रवर्त्तयिष्यामि तव देव्यमरैः सह॥२८॥

तिथिमाद्यां समारभ्य यावद्रक्षोवधो भवेत्।
दिनानि नव ते पूजा भविष्यति जगत्त्रये॥२९॥

नवम्यां निहते वीरे रावणे विश्वकण्टके।
प्रीतिमुत्पादयिष्यामः प्रभूतवलिभिस्तव॥३०॥

अपरेऽह्नि दशम्यां ते नीराजनमहोत्सवम्।
गीतैर्नृत्यैस्तथा वाद्यैर्जलकर्दमकेलिभिः॥३१॥

अश्लीलवेशवचनैः शस्त्रास्त्ररचनैरपि।
रथद्विरदवाहानां सज्जनाविधिभिस्तथा॥३२॥

सुराः प्रवर्त्तयिष्यन्ति मनुष्याश्च महीतले।
भक्तोऽयं रावणो यद्वत् पादयोस्तत् कालिके॥३३॥

रामो भविष्यति तथा सदैव तव पूजकः।
मन्त्रः कोऽपि च ते देवि रामोपासितसंज्ञया॥३४॥

सद्यस्तव प्रीतिकरः ख्यातिं जगति यास्यति।
इत्युक्त्वावा ब्रह्मणा काली बभूवास्य
पराङ्युखी॥३५॥

ततो जघान दिव्यास्त्रै राघवो रावणे रणे।
तत आरभ्य देवेशि शारद्यर्चा प्रवर्त्तिता॥३६॥

अथ एव द्वयो कार्या वासन्ती शारदी तथा।
केषांचिदपि वासन्त्यां मतभेदो न विद्यते॥३७॥

(2) While Vasanta-navarātri is of one type only, Śaran-navarātri may be celebrated in one of the three *variant ways : (1) from* navamī of the dark fortnight in Aśvin to Navamī of the bright fortnight; (2) from the first day of the bright fortnight for nine succeeding days; and (3) on the evening of the sixth day the goddess is invoked in the bilva-twig, and the worship lasts for three days, viz. from the seventh to ninth. The third option is said to be the best. The reasons are adduced from Purāṇic legends.

शारद्यां तु त्रयो भेदाः कथ्यन्ते ते मयाऽधुना।
आश्विनाशितपक्षस्य नवमी या शिवर्क्षयुक्॥१॥

बोधयित्वेश्वरीं तस्यां शरदर्चनमाचरेत्।
यावत् स्यान्नवमी शुक्ला तावत् पूजा प्रवर्त्तते॥२॥

इत्येकः पक्ष उदितो द्वितीयमवधारय।
प्रतिपद्येव शुक्लायां बोधयित्वा सुरेश्वरीम्।।३।।

अभ्यर्चयेन्नवाहानि तन्त्रपौराणिकक्रमैः।
उदीरितो द्वितीयोऽयं तृतीयं कथयाम्यथ।।४।।

सायाह्ने बिल्वशाखायां षष्ठ्यां देवीं प्रबोधयेत्।
प्रातः प्रवर्त्तते पूजा सप्तम्यादिदिनत्रये।।५।।

(3) Legends are given here justifying the celebration of Navarātri in honour of the eighteen-armed goddess called Ugra-chaṇḍī who killed the demon Mahisha, who was reborn in three different kalpas : Rambhā-kalpa, Nīla-lohita-kalpa and Śveta-varāha-kalpa. In the final kalpa, the demon became her devotee, but sought to end his demoniac existence by fighting with the goddess. He was granted the boons that he be killed in her pacific form, that she should always place her left foot on his head, and that he be accorded a place in the worship of the goddess. And the goddess disclosed that the demon was in reality Rudra himself, who was forced to assume the form of a demon for three aeons owing to the curse of the sage Kātyāyana.

रम्भकल्पे पुरा देवी रम्भासुरतनूद्भवम्।
अष्टादशभुजा भूत्वा महाघोरतराकृतिः।।१।।

उग्रचण्डा स्वरूपेण जघान महिषासुरम्।
सितेन करवालेन मृतमेनं जहौ तथा।।२।।

पतितं च क्षितावस्य व्यशीर्यत कलेवरम्।
नीललोहितकल्पे तु पुनरेव व्यजायत।।३।।

उद्वेगकृद्देवतानां तथा यज्ञविनाशकृत्।
इति कृत्वा महामाया भद्रकाली वपुर्धरा।।४।।

सम्भूय षोडशभुजा विशिषेण शितेन हि।
अवधीत् तं पुनश्चापि तत्याज गलितं भुवि।।५।।

श्वेतवाराहकल्पादावजायत पुनः स हि।
जैगीषव्यप्रसादेन पूर्वजातिस्मरोऽभवत्।।६।।

वारद्वयं हतं ज्ञात्वा देव्यात्मानं पुराऽसुरः।
स्त्रीवध्यतां च विज्ञाय स्वस्यामुष्यां जनावपि।।७।।

कात्यायनमुनेः शापात् स्वप्रदर्शनतोऽपि च।
एकान्ते भक्तिमास्थाय त्रिविधां महिषासुरः।।८।।

आराधयामास कालीं स्वोदर्कपरिशुद्धये।
दिव्यद्वादशसाहस्रवर्षानन्तरमीश्वरी।।९।।

प्रत्यक्षमागता तस्य वरं वृण्विति चाब्रवीत्।
ततोऽसुरः स ऊचे तां निरीक्ष्य पुरतः स्थिताम्।।१०।।

वरं पश्चाद्गृहीष्यामि देवि त्वत्तो मनोगतम्।।
आदौ मे संशयं छिन्धि जागरूकं हृदि स्थितम्।।११।।

वारद्वयं मामवधीः सुरारिरणमूर्धनि।
धृत्वा कां कामाकृतिं त्वमघोरामथ भीषणाम्।।१२।।

जन्मन्यस्मिन्नपि पुनः केनाकारेण कालिके।
मां हनिष्यसि दुर्वृत्तं निखिलामरकण्टकम्।।१३।।

निशम्येऽदृग्वचस्तस्य विहस्य जगदम्बिका।
चालयन्ती शिरः किञ्चिदुवाच मधुराक्षरम्।।१४।।

मदीयतादृशाकारदर्शनेन फलं तव।
किं भविष्यति दैत्येन्द्र किन्तु त्रासमवाप्स्यसि।।१५।।

दिदृक्षसे चेदथ तां करालामाकृतिं मम।
पश्येत्युक्त्वा जगद्धात्री विहाय ललितं वपुः।।१६।।

उग्रचण्डा तनूरूपं दर्शयामास दानवम्।
ज्वालाकरालवदनमष्टादशभुजान्वितम्।।१७।।

दिव्यशस्त्रास्त्रकलितं मुण्डमालाभयङ्करम्।
विदीर्णसृक्कयुगलं घोरदंष्ट्रातिभीषणम्।।१८।।

चलत्सौदामिनीतुल्यरसनं नाददारुणम्।
तद्रूपं दितिजो वीक्ष्य न्यमीलयत लोचने।।१९।।

कृताञ्जलिपुटो भूत्वा प्रत्युवाच च कालिकाम्।
घोरमीदृशमाकारं न शक्नोमि तवेक्षितुम्।।२०।।

त्रैलोक्यत्रासनं रूपं देवि संहर संहर।
इत्युक्ताऽसुरराजेन पुनः सा प्राकृतं वपुः।।२१।।

कृत्वा तं दर्शयामास ततः सुस्थो बभूव सः।
भद्रकाली वपुर्भूत्वा पुनः सा परमेश्वरी।।२२।।

निरीक्षयामास रूपं द्वितीयं जीवनापहम्।
तद्रूपदर्शनेऽप्येष पुनस्त्रासमुपेयिवान्॥२३॥

तस्यापि परिवृत्तौ स प्राकृतः सम्बभूव ह।
गतमीरथ तां देवीमुवाच दितिजाधिपः॥२४॥

ईदृशाकारधारिण्या कथं देवि त्वया सह।
समरे योद्धुमशकमहं वरमदेद्धतः॥२५॥

गरुत्मता सह यथा डुण्डुभस्य रणस्पृहा।
दावाग्निना पतङ्गानां तिमिरस्य च भास्वता॥२६॥

मृगाणां हरिणा चैव द्रुमाणां वायुना तथा।
भेकानामहिना चापि प्राणिनां शमनेन च॥२७॥

तद्वद्भवत्या समं मे कथमासीन्महाव्रणः।
यदतीतमतीतं तदिदानीं ते वरत्रयम्॥२८॥

वृणेऽहं मम तद्देहि मनोरथपदातिगम्।
एकं सौम्याकारधरा भूत्वाऽस्मिन् जन्मनीश्वरि॥२९॥

त्वं मां वधिष्यसि त्राणहेतोरध्वरभोजिनाम्।
द्वितीयं ते मच्छिरसि वामपादाम्बुजं सदा॥३०॥

स्थास्यति प्राणयुक्तस्य पश्यतस्त्वन्मुखच्छविम्।
तृतीयं देवि यज्ञस्य भागं प्राप्नोमि कंचन॥३१॥

इत्येवमुक्ते महिषे वचनेन सुरारिणा।
उवाच सस्मितं देवी भक्तिप्रणतकन्धरम्॥३२॥

दैत्येन्द्र श्रृणु मद्वाक्यं यथार्थं मधुराक्षरम्।
रम्भासुरस्ते जनकस्तपस्तप्त्वा सुदारुणम्॥३३॥

शङ्करं तोषयामास रम्भकल्पे हिमालये।
वच ऊचे हरस्तुष्टो महाभाग वरं वृणु॥३४॥

हित्वा सोऽन्यवरं वव्रे भवान् पुत्रो भवत्विति।
भक्त्या नियन्त्रितः कार्यगतित्वात् स महेश्वरः॥३५॥

वरं ददौ स आत्मानं पुत्राकृतममुष्य हि।
तस्माज्जातो हि महिषीगर्भे त्वं
काममोहितात्॥३६॥

साक्षात् त्वं रुद्र एवासि न सामान्या हराकृतिः।
शिवस्त्वं वरदानेन रम्भस्य सुततां गतः।
मन्वन्तरत्रयं साग्रं भुक्तवाँश्च जगत्त्रयम्॥३७॥

अतः परं न वस्तव्यं त्वया दितिजदेहिना।
स्वपुरं प्रतिगन्तव्यं मम लोकादधः स्थितम्।।३८।।

कात्यायनस्य शापाच्च शिरश्छेदनहेतुकात्।
युक्तकाले स्थास्यति नो भक्तिरेतादृशी तव।।३९।।

कपोतशापादीदृक्षादित्युक्ताः पञ्चहेतवः।
महिषायेऽदृशं दत्वा वरमुक्त्वा पुराकथाम्।।४०।।

सपद्यन्तर्दधे काली वर्षासु चपला यथा।
देव्यामन्तर्हितायां स सर्वं विस्मृतवान् क्षणात्।।४१।।

बभूव पूर्ववद्दुष्टो यज्ञदेवद्विजन्मनाम्।
प्रणष्टा भक्तिरस्यापि देव्यामव्यभिचारिणी।।४२।।

पूर्वदत्तमतिर्भ्रष्टा ज्ञानमन्तर्हितं चरेत्।
इति ते कथितो देवि वृतान्तः पूर्वसम्भवः।।४३।।

सिद्धान्तमनयोर्बोद्धुं रीत्या शक्त्या विचक्षणात्।
सिद्धान्तनिर्णयकृते
कथिताऽऽख्यायिकाऽप्यसौ।।४४।।

(4) The legend also explains the assumption by the goddess of three iconic forms. The eighteen-armed Ugra-chaṇḍā, sixteen-armed Mahā-Kālī and ten-armed Durgā. These forms distinguish the three variant methods of worship, mentioned above ; Ugra-chaṇḍā, receives worship from Krshṇa-navamī to Śukla-navamī in the month of Āśvin; Mahā-Kāli for nine days beginning with Śukla-pratipat; and Durgā for three days (Saptamī to Navamī).

इयं हि शारदी पूजा मूर्तिभेदात् त्रिधा मता।
तत्तद्द्रव्यमधिष्ठाय नृणां गृह्णति सार्चनम्।।१।।

येऽष्टादशभुजां देवीमुग्रचण्डाभिधां प्रिये।
पिपूजयिषवो मर्त्यास्तदुपासकतामिताः।।२।।

तथाऽऽश्विननवम्यां वै कृष्णायां सुसमाहिताः।
करवाले बोधयेयुर्मध्याह्ने शङ्खनिःस्वनैः।।३।।

खगानजान् वा महिषानेणान् वाऽन्यवलीनपि।
रीतिं संकलितां कृत्वा दद्युः षोडशवासरान्।।४।।

एषाऽऽद्या महिषालम्भकर्तृपूजाविधिर्मतः।
अत माध्यमिकः पक्ष झषस्याद्यतिथौ सिते।।५।।

प्रातः पटहनिःस्वानैः सढकानकगोमुखैः।
ईश्वरीं षोडशभुजां भद्रकालीति नामिकाम्।।६।।

सम्बोध्य ये पूजयेयुर्दिनानि नव वै प्रिये।
अपूपमोदकप्रायवलिसंकलितक्रमैः।।७।।

तृतीयः पक्ष ईदृक्ष उदितस्त्रिपुरारिणा।
अश्वयुक्सितषष्ठ्यां वै शाखायां
बिल्वशाखिनः।।८।।

सायंकाले बोधयित्वा वाद्यैरुच्चावचोद्धतैः।
दुर्गादेवीमर्चयीत सप्तम्यादिदिनत्रये।।९।।

दशबाहुधरां देवीं महासौन्दर्यशालिनीम्।
रीतिसंकलितं पात्रे विल्वपत्रस्य कीर्त्तिता।।१०।।

अथ वा करवीरस्य शक्त्या च महिषाजयोः।
स्वस्वशक्त्यनुसारेण सर्वमन्यत् प्रकीर्त्तितम्।।११।।

होमो जपः कुमार्यर्चा साधकानां च भोजनम्।
उपोषणमथो मौनं प्रभूतफलहेतवे।।१२।।

हननात् खड्गबाणाभ्यां तत्र तत्र तु बोधनम्।
आविर्भावो विल्वतरोरत्र बोधनमाचरेत्।।१३।।

तत्तन्नक्षत्रलाभे तु फलभूमा प्रजायते।
नक्षत्राणामलाभे तु केवलायां तिथौ चरेत्।।१४।।

सत्यां शक्तौ चतुर्थ्यां वै देव्याः केशं विमोचयेत्।
तत्र पूजा विधातव्या महाविभवविस्तरैः।।१५।।

उद्वर्त्तनं कण्टकिकां केशबन्धनडोरकम्।
नखरञ्जं शलाकां च सिन्दुरालक्तकज्जलम्।।१६।।

सुगन्धितैलोष्णजलपि ट्रतामलकादिकम्।
दद्याद्देव्यै विशेषेण भक्तिभावेन पार्वति।।१७।।

(5) Again, the worship is of two kinds : Purāṇic and tāntrik. The elaborate Purāṇic method is told by Nandikeśvara, the moderately detailed method by the goddess herself to the sage Kapila, and the brief method by Aurva to Sagara. The tāntrik method occurs in a large variety, specific to several cults. It is also Kaulika in orientation, while the purāṇic method is Vedic.

पूजायाः कथितं तत्र द्वैविध्यं मुनिपुङ्गवैः।
पौराणिकं तान्त्रिकं च कालिकाप्रीतिसिद्धये॥१॥

श्रुतध्वजाय प्राङ्नन्दिकेश्वरेण यदीरितम्।
तद्वै बहुलविस्तारं शारदीयार्चनं मतम्॥२॥

यद्देव्या स्वयमाख्यातं कपिलाय महर्षये।
तन्नातिबहुलं नातिस्वल्पं मध्यममुच्यते॥३॥

यदौर्वेण समाख्यातं सगराय महीभृते।
तद्विज्ञेयं सुरेशानि कनीयः शरदर्चनम्॥४॥

तान्त्रिकं बहुतन्त्रोक्तं सर्वैः स्वस्वमतागतम्।
यो येनैव क्रमेणैतां शरदर्चां वरानने॥५॥

विधत्ते स समाप्नोति फलं तत्तत्क्रमेण हि।
इयं हि पूजा द्विविधा पौराणी तान्त्रिकी तथा॥६॥

तान्त्रिके कौलिकी रीतिः पुराणे वैदिकी मता।
यद्येभ्यो रोचते देवि प्रतिनन्दति ते हि तत्॥७॥

(6) The icons or forms in which the worship of the goddess may be conducted is next mentioned : icon in metal (pratimā), yantra, bilva-leaf, sthaṇḍila (bare platform) smeared with cow-dung, maṇḍala in saffron, war-weapons, book, painting, linga, water or fire. The nine leaves (nava-patrikā) which are propitious for worship are also listed.

अतः पूजा प्रकर्त्तव्या केषु केषु स्थुलेषु हि।
तन्नोत्तरं ते वदामि श्रृणुष्वावहिता सती॥१॥

तैजसे प्रतिमा यन्त्रेऽथ वा माहेयदारवे।
शैलेय अथवा देवि धातवे गिरिसम्भवे॥२॥

विल्ववृक्षपत्रिका च घटः पूर्ववदीरितः।
गोमयेनोपलिप्तं वा स्थण्डिलं जगदीश्वरि॥३॥

सिन्दूराङ्के मण्डलं वा शूलखड्गशरास्तथा।
पुस्तकं वा चित्रपटं सर्वतोभद्र एव वा॥४॥

अनादिपीठं च तथा शिवलिङ्गं तथैव च।
जलमग्निस्तथा खातनृकरोटिस्थलं शुभम्॥५॥

एवमादीनि चान्यानि स्थानान्यर्चनहेतवे।
पत्रिकाश्च परिज्ञेयाः कदलीविल्वदाडिमाः॥६॥

हरिद्राशोककच्व्यौ च जयन्ती धान्यमालिनी।
रम्भा कची हरिद्रा च जयन्ती विल्वदाडिमौ।
अशोको मानकश्चैव धान्यानि नव पत्रिकाः॥७॥

(7) The prescribed method of worship is given here step by step. The Sarvatobhadra-maṇḍala with 81 cells is written and painted on the wall or screen for worship. It represents the goddess. The awakening of the goddess (bodhana) is done in the evening of the sixth day in the bilva-twig with ceremonial samkalpa etc : Then the deity is formally invoked (āvāhana), and ritually placed (adhivāsana). Preliminary worship is offered; and all preparations like the installation ofthe icon, installation of pītha, yantra

एकाशीतिपदं चक्रं सर्वतोभद्रमण्डलम्।
भित्तौ चित्रीकृता देवी पूजिता फलदायिनी॥१॥

अष्टम्यां तु विशेषेण पूजा कार्याऽत्र पार्वति।
प्रभूतबलिदानं तु नवम्यां होम एव च॥२॥

अष्टमीनवमीसन्धौ विशेषात् पूजनं चरेत्।
नवम्यां बलिदानानु कुमारीपूजनं तथा॥३॥

दिनत्रयेऽपि च महादेव्याः स्नानं प्रकल्पयेत्।
तथा।
उपवासं तथा कुर्यादष्टम्यां कालिकामुदे।
सिद्ध्यर्थं स्वाभिलाषाणां तथाऽन्येषां च शर्मणाम्॥४॥

किन्तु पुत्री न कुर्वीत कृते पुत्रो विनश्यति।
स्त्र्युपयोगीनि वस्तूनि रचनादीनि यानि हि॥५॥

तानि देव्यै प्रदेयानि विभवाद्यनुरूपतः।
तिथौ शुक्लप्रतिपदि कृत्वोपक्रममीश्वरि॥६॥

षष्ठेऽह्नि सायंसमये कृतनित्यक्रियो दिवा।
बोधयेद्विल्वशाखायां देशिकः परमेश्वरीम्॥७॥

सङ्कल्पं पुरतः कृत्वा स्वस्तिवाचनपूर्वकम्।
सरासिमासपक्षस्य तिथेरुल्लिखनक्रमात्॥८॥

स्वगोत्रनामोच्चारणं यजमानो विधाय हि।
दुर्गाबोधनकर्माहं करिष्ये इति कीर्त्तयेत्॥९॥

भूतशुद्धिं ततः कृत्वा षडङ्गं सर्षिततत्परम्।
आवाह्य विल्वशाखायामथ वा मूर्त्तिपीठयोः॥१०॥

उपचारैः षोडशाभिर्मूलमन्त्रेण देशिकः।
पूजयित्वा जगद्धात्रीमर्धमस्तमिते रवौ॥११॥

विल्ववृक्षं च सम्पूज्य गन्धपुष्पाक्षतादिभिः।
शङ्खतूर्यनिनादैश्च मुरजध्वनिगीतिभिः॥१२॥

बोधयेत् स्तुतिसंलापैर्वन्दीव वसुधाधिपम्।
प्रोच्यमानं समुच्चार्य मन्त्रं संचालयेच्छिवाम्॥१३॥

तारमैधे शाकिनी च कूटं स्वप्नागतं तथा।
विसन्धिभगवत्युक्त्वोत्तिष्ठद्वयमुदीरयेत्॥१४॥

निद्रां जहि युगं चापि प्रतिबुद्ध्यस्व च द्वयम्।
मम शत्रून् हन द्वन्द्वं पातय द्वितयं तथा॥१५॥

रावणस्य वधार्थाय रामस्यानुग्रहाय च।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा॥१६॥

अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयामि वै।
शक्रेणापि च सम्बोध्य राज्यं प्राप्तं सुरालये॥१७॥

तस्मादहं त्वां प्रति
बोधयामिविभूतिराज्यप्रतिपत्तिहेतोः।

यथैव रामेण हतो दशास्यस्तथैव शत्रुं
विनिपातयामि॥१८॥

षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षेऽधिवासनम्।
रजन्याद्ये मुहूर्ते तु चण्डिकामधिवासयेत्।
सुगन्धितैलपाताभ्यां पञ्चभिर्गन्धजातिभिः॥१९॥

(Mahākālasamhitā)

पुष्पजातिविशेषैश्च तावद्भिरधिवासयेत्।
सर्वमाङ्गल्यवस्तूनि विधायैकत्र भाजने॥२०॥

प्रशस्तवदनं देव्याः कारयेत् तदनन्तरम्।
समांसमीनसिद्धान्नबलिं भूतेभ्य उत्सृजेत्॥२१॥

गीतवाद्यैश्च नाद्यैश्च नमस्कारैश्च जागरैः।
देवीं सन्तोष्य वचनैर्व्याजस्तुत्याद्यानिन्दनैः॥२२॥

सिद्धार्थकैर्मन्त्रपाठपूर्वं रक्षां विधाय च।
पूर्ववत् सर्वमाभाष्य मासपक्षतिथिक्रमैः॥२३॥

शरत्कालीनपूजाङ्गं ततश्च कृत्यपत्रिकाः।
अथ वा प्रतिमापीठयन्त्रस्थापनकर्मणि॥२४॥

दुर्गादिव्या गन्धपुष्पपट्टवासस्त्रगादिभिः।
अधिवासनकर्माहं कुर्वीयेत्यभिजल्प्य वै॥२५॥

पूर्ववद्भूतशुद्धिं च सर्षिं करषडङ्गकम्।
प्राणायामत्रयं चापि कृत्वाऽर्घस्थापनं चरेत्॥२६॥

गणेशमथ दिक्पालान् मातृग्राहाँस्तथैव च।
वटुकान् क्षेत्रपालाँश्च द्वाराध्यक्षाँश्च योगिनीः॥२७॥

शक्त्योपचारैः सम्पूज्य पत्रिकापीठमूर्त्तिषु।
आवाह्य देवीमिष्टां च मूलमन्त्रोपचारकैः॥२८॥

शताहरिद्रातैलानि एकीकृत्य समानि हि।
चैतन्यकमलालज्जागन्धचारेरुडस्त्रकम्॥२९॥

उच्चार्य दद्यादलिके शिरस्यपि च पादयोः।
ततः कुङ्कुमकर्पूरकस्तूरीमलयोद्भवैः॥३०॥

एकीकृतैर्डाकिनीह्रन्मन्त्रैस्तान्येव भूषयेत्।
विल्वपत्रजवापद्मकरवीरापराजिताः॥३१॥

एकीकृत्यार्पयेन्मूर्ध्नि वदन्मदनमस्तके।
माल्यैरापूरयेद्यन्त्रं प्रतिमां पत्रिकामपि॥३२॥

हरिद्रास्वस्तिकालक्तदध्यक्षतफलाम्बुजम्।
धूपदीपौ मधुघृते कुमारीकरतन्तवः॥३३॥

घनसारो मृगमदं कल्लोलं कुङ्कुमं तथा।
महौषधिगणाः सिद्धार्थफलं स्वर्णमणी तथा॥३४॥

रौप्यं व्याघ्रनखोऽम्भोजं विष्णुक्रान्ताऽपराजिता।
एवमादीनि माङ्गल्यद्रव्याण्युक्तानि यानि वै॥३५॥

एकस्मिन् भाजने तानि एकीकृत्य पृथक् पृथक्।
देव्याः शिरो वक्षसि च तारमैघत्रपाशिरः॥३६॥

प्रोच्चरन् समनुत्तोल्य त्रिवारं स्पर्शयेच्छनैः।
भूतादिभ्यो वलिं दद्यात् तत्तद्बीजं पुरः स्मरन्॥३७॥

तत्तन्नामाभ्यसन्तं च सन्धिनैष वलिर्नमः।
दशदिक्षु क्षिपेच्चापि राजिकाश्वेतसर्षपौ॥३८॥

ताराद्रक्षयुगं चास्त्रं शिरः कूर्चोऽन्तिमे तथा।
वर्णैश्चतुर्भिः संवेष्ट्य ताँश्च कल्माषतन्तुभिः॥३९॥

अस्त्राण्यस्याः पुरः कृत्वा जागृयात् सकलां निशाम्।

(8) The rites prescribed for the seventh day (the first of the three days set apart for worship) are detailed here. The deity is invoked preliminarily in the bilva-twig and duly worshipped with prayers. Then the deity is installed and ceremonially bathed. Bathing the deity is the most important detail here. It is immediately followed by offering of bali to the evil and obstructing spirits, and sending them away well pleased, from the site of worship. Door-keepers are worshipped and the deity is invoked to come and dwell on the seat specially prepared.

(a) Invoking the Devī in bilva-twig

अथो उषसि सप्तम्यां कृतनित्यक्रियो बुधः।
पूर्ववद्बिल्वशाखायां देवीमभ्यर्च्य मानवः॥१॥

शितां गृहीत्वा छुरिकां मन्त्रमेनं समुच्चरेत्।
फलद्वययुतां शाखां छिन्द्याद्बिल्वस्य साधकः॥२॥

चैतन्यं प्रणवं माया रोषरावौ च डाकिनी।
इमां शाखां छिन्धि युगं छेदय द्वितयं तथा॥३॥

अस्त्रयुग्मं शिरश्चापि गृहीत्वा तां करद्वये।
बद्धाञ्जलिश्चतुर्मन्त्रान् पठेत् पौराणिकान् प्रिये॥४॥

मेरुमण्डलकैलाशाहिमवच्छिरवरे गिरौ।
जातः श्रीफलवृक्षस्त्वमम्बिकायाः सदा प्रियः॥५॥

श्रीशैले शिखरे जातः श्रीफलः श्रीनिकेतनः।
नेतव्योऽसि मया गच्छ पूज्यो दुर्गास्वरूपतः॥६॥

विल्ववृक्ष महाभाग सदा त्वं शङ्करप्रिय।
गृहीत्वा तव शाखां हि देवीपूजां करोम्यहम्॥७॥

शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया तरो।
देवैर्गृहीत्वा शाखां ते पूजिताऽम्बेति विश्रुतिः॥८॥

पुनरन्यत् पद्मरूपं मन्त्रं ब्रूयाच्च साधकः।
पुत्रायुर्धनवृद्ध्यर्थं नेष्यामि त्वामुमाप्रियाम्॥९॥

विल्वशाखां समाश्रित्य राज्यं देवि प्रयच्छ मे।
आगच्छ चण्डिके देवि सर्वकल्याणहेतवे॥१०॥

कात्यायनि ग्रहाणार्चां नमस्ते शङ्करप्रिये।
ततः पूर्वोदिताश्चान्या आहरेदष्ट पत्रिकाः॥११॥

पत्रिकास्ताः समानीय गीतवाद्यपुरःसरम्।
ब्रह्मघोषादिभिः सार्धं नीत्वाऽन्यस्येद्गृहाङ्गणे॥१२॥

(b) Installation

ता एकीकृत्य लतयाऽपराजितसमाह्वया।
संवेष्ट्य वसनेनापि पूजासङ्कल्पमाचरेत्॥१३॥

पूर्ववत् सर्वमुच्चार्य पत्रिकापीठमूर्त्तितः।
ततश्च स्थापनमहं किरष्ये इति कीर्त्तयेत्॥१४॥

पत्रिकायां तथा मूर्त्तौ खड्गे वा यन्त्रमूर्त्तयोः।
देवीमावाह्य सम्पूज्य विल्वपत्राञ्जनित्रयम्॥१५॥

(c) offering ritual bath

दत्वा शक्तौ प्रकुर्वीत देव्याः स्नानं महत्तरम्।
तद्वै पौराणवैदिक्यमपि संकीर्त्तयामि ते॥१६॥

शक्तौ दिनत्रयं कुर्यादशक्तौ तु दिनद्वयम्।
सर्वाभावे नवम्यां तु स्नानमावश्यकं मतम्॥१७॥

कुर्यादत्रापि सङ्कल्पं काम्यमेतद्यतः प्रिये।
शतजन्मकृतात् पापान्मोचने प्रथमं स्मृतम्॥१८॥

नवाऽपि पत्रिका शुद्धतोयेन स्नापयेत् ततः।
प्रत्येकं तत्तदाख्याभिमूर्त्यै नाम्ना धियाऽपि च॥१९॥

मन्त्राणां पद्मरूपाणामादौ तारस्त्रपा स्मरः।
रमा मैधं रावरौषौ डाकिन्यष्ट च वै नव॥२०॥

प्रत्येकं देवि देयानि तान्त्रिकस्नापनक्रमे।

कदलीतरुसंस्थाऽसि सम्भुवक्षःस्थलस्थिते॥२१॥

स्नापयाम्यद्य पत्रि त्वां नमस्ते हरवल्लभे।
कच्चित् त्वं स्थावरीभूता सद्यः
सिद्धिविधायिनी॥२२॥

दुर्गारूपेण सर्वत्र स्नानेन विजयं कुरु।
हरिद्रे हर दुःखानि शङ्करस्य सदा प्रिये॥२३॥

रुद्ररूपाऽसि देवि त्वं सर्वशान्तिं प्रयच्छ मे।
जयन्ती जयरूपाऽसि जगतां जयकारिणी॥२४॥

स्थापयामीह देवि त्वा जयं देहि गृहे मम।
श्रीफल श्रीनिकतोऽसि सदा विजयवर्धन॥२५॥

देहि मे धर्मकामार्थान् प्रसन्नो भव सर्वदा।
दाडिम्यघप्रणाशाय क्षुन्नाशाय तथा नृणाम्॥२६॥

निर्मिताऽसि पुरा धात्रा प्रसीद त्वमुमाप्रिये।
स्थिरा भव सदा लोके दुर्गे शोकविनाशिनि॥२७॥

मया त्वं पूजिता नित्यं स्थिरा भव हरप्रिये।
ब्राह्यु मानो मानेषु माननीयः सुरासुरैः॥२८॥

स्नापयामि महादेवीं मानं देहि नमोऽस्तु ते।
लक्ष्मीस्त्वं धान्यरूपाऽसि प्राणिनां
प्राणदायिनी॥२९॥

स्थिराऽत्यन्तं हि नो भूत्वा गृहे कामप्रदा भव।
ततो द्वित्रिनदीतोयं कृत्वा कलशगर्भगम्॥३०॥

चन्दनालोडितं चापि स्नापयेत् तेन चण्डिकाम्।
शीता चालकनन्दा च चक्षुर्भद्रादृषद्वती॥३१॥

तुङ्गभद्रा कृष्णवर्णा पयोष्णी नर्मदा तथा।
तापि भीमरथी सिप्रा वितस्तैरावती तथा॥३२॥

गोदावरी विपासा च शतद्रुः सिन्धुरेव।
चर्मण्वती च कावेरो ताम्रपर्णी महानदी॥३३॥

करतोया बाहुदा च शोणा वेत्रवती तथा।
देविका भैरवः कोका गोमती चोत्पलावती॥३४॥

आत्रेयी भारती गङ्गा यमुना च सरस्वती।
सरयूर्गण्डकी चापि श्वेतगन्धा च कौशिकी॥३५॥

भोगवती च पाताले स्वर्गे मन्दाकिनी तथा।
एताश्चान्याश्च या नद्यो भाषिता याश्च नेरिताः॥३६॥

देवखातानि तीर्थानि कूपा निर्झरसंज्ञकाः।
सरांसि सिन्धवश्चापि सम्भेदा ये च भूतले॥३७॥

सर्वे त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा संकर्षणः प्रभुः॥३८॥

प्रद्युम्नश्चानिरुद्धश्च भवतीं स्नापयन्त्विमे।
ख्याता ये द्वादशादित्या रुद्रा एकादशापि
च॥३९॥

मरुतश्चोनपञ्चाशद्वसवोऽष्टर्त्तवश्च षट्।
आखण्डलोऽग्निर्भगवान् यमो वै
निर्ऋतिस्तथा॥४०॥

वरुणाः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितः शेषो दिक्पालाः
स्नापयन्त्वमी॥४१॥

कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा रतिः।
बुद्धिर्लज्जा क्रिया शान्तिस्तुष्टिः कान्तिश्च
मातरः॥४२॥

एतास्त्वामभिषिञ्चन्तु शक्तिरूपधरास्तव।
आदित्यश्चन्द्रमा भौमबुधजीवसितार्कजाः॥४३॥

राहुः केतुश्च भवतीं स्नापयन्तु ग्रहा नव।
ऋषयो मनवो गावो देवमातर एव च॥४४॥

देवपत्न्योऽध्वरा नागा दैत्याश्चाप्सरसां गणाः।
त्रिशूलचक्रचापर्ष्टिभुशुण्डी परिघो गदा॥४५॥

कुन्तमुद्गरखट्वाङ्गशक्तितोमरपर्शवः।
पट्टिशो मुद्गलः प्रासभिन्दिपालकटङ्कका॥४६॥

हूता शतघ्नी कुलिशपाशकर्त्तृहलानि च।
चत्वार ऋग्यजुःसामाथर्वणो निगमा हि ये॥४७॥

अङ्गानि शिक्षा कल्पश्च छन्दो व्याकरणं तथा।
निरुक्तं ज्यौतिषं चापि पुराणान्यखिलानि च॥४८॥

मीमांसान्यायवेदान्ताक्षपात्सांख्यपतञ्जलाः।
स्मृतिशास्त्राणि सर्वाणि दण्डनीतिर्विधाऽपि
च॥४९॥

गन्धर्वायुर्धनुर्वेदाश्चतुःषष्टिश्च याः कलाः।
अस्त्राणि सर्वशस्त्राणि वाहनानि नृपास्तथा॥५०॥

औषधानि च सर्वाणि शिल्पविद्यादिकानि वा।
मुक्तामाणिक्यवैदूर्यवज्रेन्द्रमणयस्तथा॥५१॥

गोमेदपद्मरागौ च प्रवालः श्याम एव च।
रत्नानि यानि चान्यानि कालस्यावयवाश्च ये।।५२।।

मन्वन्तराणि सर्वाणि चत्वार्यपि युगानि हि।
अब्दमासर्तुपक्षाहोरात्रायनकलालवाः।।५३।।

राशिनक्षत्रयोगाश्च कलांशाश्चापि सूक्ष्मकाः
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।।५४।।

देवदानवगन्धर्वा यक्षराक्षसपन्नगाः।
एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये।।५५।।

सिन्धुरैवतशोणाद्या ये ह्रदा भुवि विश्रुताः।
सर्वे सुमनसो भूत्वा भृङ्गारैः स्नापयन्तु ते।।५६।।

तक्षकाद्याश्च ये नागाः पातालतलवासिनः।
स्नापयन्तु जगद्धात्रि भृङ्गारैस्त्वां सुवासितैः।।५७।।

सर्वेषामधिपो देव ईशानो नाम नामतः।
शूलपाणिर्महादेवः स त्वां संस्नापयेत् प्रभुः।।५८।।

स्नापयेच्छङ्खतोयेन मन्त्रमेनमुदीरयेत्।
मन्दाकिन्यास्तु यद्वारि सर्वपापहरं परम्।।६०।।

स्वर्गस्रोतःसमुद्भतं स्नानं भवतु तेन ते।
गाङ्गेन वारिणा देवीं स्नापयेन्मनुनाऽमुना।।६१।।

उष्णं सुखस्पर्शकरं ज्योतिर्वह्निसमन्वितम्।
मलापहारकं कल्यं तेन स्नानं समाचर।।६२।।

स्नापयेत् वाथसोष्णेन पठन्मन्त्रममुं प्रिये।
गन्धाढ्यं शोभनं चैव शीतलं सुमनोहरम्।।६३।।

सर्वपापहरं तोयं तत् ते स्नानाय कल्पताम्।
अमुनाऽऽमोदिसलिलकुम्भेन
स्नापयेच्छिवाम्।।६४।।

पुण्यं पवित्रं स्वच्छं च शीतलं स्वादु यज्जलम्।
स्नानाय कल्पतां तत् ते तथैव श्रमशान्तये।।६५।।

मेध्याच्छशीतलाम्भोभिः स्नापयेदमुनेश्वरीम्।
गावः पवित्रा ह्यनघा गावो विश्वस्य मातरः।।६६।।

गावोऽध्वराणां धात्र्यश्च गोषु सर्वं प्रतिष्ठितम्।
तदङ्गप्रसृतैः पञ्चगव्यैस्त्वां स्नापयाम्यहम्।।६७।।

इति सामान्यतो मन्त्रं पठित्वा तदनु प्रिये।
प्रत्येकं पञ्चगव्येन स्नापयेज्जगदम्बिकाम्।।६८।।

गवां मूत्रेण पुण्येन सर्वाघपरिमोषिणा।
स्नापयामि जगद्धात्रीं पुत्रायुर्धनवृद्धये॥६९॥

एतेन स्नापयेद्देवीं गोमूत्रेण शनैः शनैः।
पवित्रताकरं भूमेर्विभूतेः कारणं परम्॥७०॥

गोमयं सर्वपापघ्नं तेन त्वां स्नापयाम्यहम्।
मन्त्रमेनं पठेद्देवीं स्नपायेद्गोमयाम्भसा॥७१॥

यद्गवामङ्गसम्भूतं हविषः कारणं हि यत्।
यदि तत् तेऽङ्गलावण्यकरणाय भवत्विदम्॥७२॥

दध्नाऽयुना भगवत्स्नपयामि हरप्रियाम्।
गृणन्नमुं गोदुग्धैः स्नापयेज्जगदम्बिकाम्॥७३॥

यद्धोमसाधनत्वेन प्रथितं निगमादिषु।
यच्चाप्यग्निमुखेनैव भुञ्जते निखिलाः सुराः॥७४॥

यस्मात् पवित्रं नैवास्ति बलवीर्यकरं च यत्।
तेन त्वां स्नापयाम्यद्य गव्येन हविषेष्वरीम्॥७५॥

कालीममूभ्यां मन्त्राभ्यां घृतेन स्नापयेद्बुधः।
एकीकृत्य ततः पञ्चगव्यानि सकलानि हि॥७६॥

तथाऽनामिकायऽऽलोड्य कुशमूलेन वा प्रिये।
यस्मात् परं नापरमस्ति मेध्यं देहेगतं यदृजिनं निहन्ति॥७७॥

स्नापयेत् पञ्चगव्येन मन्त्रेणानेन कालिकाम्।
गव्यं पयो दधि घृतं माध्वीकं सितशर्कराः॥७८॥

पञ्चामृतमिदं प्रोक्तममुना स्नापयेदुमाम्।
सारं गृहीत्वा जगतां त्रयाणां यन्निर्मितं यज्ञकृते विधात्रा॥७९॥

उँ कात्यायन्यै विद्महे भगवत्यै धीमहि तन्नो दुर्गा प्रचोदयात्।
एतेनेक्षुरसेनैव स्नापयीत सुरेश्वरीम्॥८०॥

महौषधीभिः सर्वाभिः सर्वकामार्थसिद्धये।
या औषधीति मन्त्रेण स्नापयेज्जगदम्बिकाम्॥७१॥

Alternately :

सहस्रधारकुम्भेन स्नापयेज्जगदम्बिकाम्।

(d) Bali offering to the bhūtas etc :

गृहीत्वा तममूभ्यां वै मनुभ्यामुत्सृजेद्बलिम्।
भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले॥१॥

ते गृह्णन्तु मया दत्तं बलिमेनं प्रसाधितम्।
पूजिता गन्धापुष्पाद्यैर्वलिभिस्तर्पितास्तथा॥२॥

देशादस्माद्विनिःसृत्य पूजां पश्यन्तु मत्कृताम्।
ताररावौ कूर्चभूतौ भ्यसन्तो भूत एव च॥३॥

ससन्ध्येष बलिर्हच्च मन्त्रावेतावुदाहृतौ।
अकृते बलिदाने तु महास्नानादनन्तरम्।
अफलं तद्भवेद्देवि पूजाङ्गं हीयते तथा॥४॥

(e) Sending them away :

विलुम्पन्ति सदा लुब्धा न च गृह्णन्ति देवताः।
तस्माद्यत्नेन कर्त्तव्यं भूतानामपसारणम्॥१॥

लाजचन्दनसिद्धार्थभस्मदूर्वाक्षतादिकम्।
गृहीत्वा तारशेषानुनिः श्रेण्यसमुदीरयेत्॥२॥

अपसर्पन्तु भूतास्ते ये भूताः शारदार्चिकाः।
भूतानामविरोधेन देवीपूजां करोम्यहम्॥३॥

वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः।
अपसर्पन्तु सर्वत्र मन्त्ररूपारवताडिताः॥४॥

(f) Door-keepers worshipped :

अन्ते मनूनामेतेषां हूँ अः फडिति कीर्त्तयेत्।
भूतादीनपसार्याथ द्वारपालेभ्य एव च॥१॥

त्रपाह्वद्विल्वशाखान्ते वासिन्यै तदनन्तरम्।
दुर्गायै कूर्चमस्त्रं च मन्त्रेणानेन पार्वति॥२॥

पाद्यादिभिः समभ्यर्च्य कुर्यान्नीराजनाविधिम्।
द्वारदेशं समानीय कुर्यान्निर्मन्थनं ततः॥३॥

धृत्वाऽऽसनं ततो देवीं पत्रिकां मृन्मयीमपि।
सचाल्य गीतवाद्यादीनिमं मन्त्रं समुच्चरेत्॥४॥

(g) Installation of the deity :

स्थापयेत् सुस्थिराकारां ततः कल्पित आसने।
तारत्रपारावलक्ष्मीयोगिनीकामयोषितः॥१॥

डाकिनीं चापि फोत्कारीं चण्डिके भगवत्यपि।
चलद्वयं चालय द्विर्वज्रकापालिनीत्यपि॥२॥

पूजालयं द्विः प्रविश हूँ फट् स्वाहा ततः परम्।
आगच्छ मद्गृहे देवि सह शक्तिभिरष्टभिः॥३॥

पूजां गृहाण विधिवत् सर्वकल्याणहेतवे।
अनेन स्थापयेद्देवीं सर्वकल्याणदायिनीम्॥४॥

दिनत्रयस्य पूजार्थं वेदिकाद्यासनादिषु।
तारचिद्रावडाकिन्यः स्थाँ स्थीँ त्वमम्बिके तथा।
स्थिरीभव शिरश्चेति स्थिरीकुर्यात् ततः परम्॥५॥

(h) Installation of the holy kalaśa on the sarvatobhadra-maṇḍala, decorated and spread over with grains :

कलशस्थापनम्॥
ततः पुनर्विरचिते सर्वतोभद्रमण्डले।
चित्रितं पञ्चवर्णेन दध्यक्षतफलान्वितम्।
पञ्चरत्नेन हेम्ना च गर्भगेन विभूषितम्॥१॥

व्रीहीनां वा यवानां वा स्थापयित्वोपरि प्रिये।
वैदिकेन विधानेन कलशस्थापनं चरेत्॥२॥

भूमिं स्पृष्ठा जपेन्मन्त्रं भूरसीति वरानने।
अथ धान्यमसीत्युक्तवा व्रीहिने वाऽभिमन्त्रयेत्॥३॥

आजिघ्रेत्युच्चरन्मन्त्रं कलशं तत्र विन्यसेत्।
वरुणस्तेति मन्त्रेण पाथोभिः परिपूरयेत्॥४॥

काण्डात् काण्डादिति प्रोच्य पल्लवं विन्यसेत् ततः।
फलं वा फलिनीत्युक्तवा श्रीश्रेचेत्युक्ता प्रसूनकम्॥५॥

गन्धद्वारेत्यथो गन्धं सहस्रेत्यक्षतं न्यसेत्।
स्थिरीभवेति मन्त्रेण स्थिरीकरणमाचरेत्॥६॥

वल्मीककुञ्जररदनदीसङ्गमपर्वतात्।
गोकुलादेवनृपतिद्वारादपि च मृत्तिकाः॥७॥

आहृत्य हार्दमन्त्रेण प्रत्येकं निःक्षिपेद्घटे।
हार्दमन्त्रेण नम इति मन्त्रेण।

पूर्ववत् सर्ववस्त्वादिशोधनं विदधीत वै।
प्रागुदीरितमन्त्रेण तथैवालोकनेन च॥८॥

यदात्मनाऽनवज्ञातं पूजाद्रव्यादिदूषणम्।
अस्पृश्यस्पर्शनं वाऽपि यदन्यायार्जितं च वा॥९॥

तथा निर्माल्यसंस्पृष्टं कीटारोहणदूषितम्।
नश्यन्ति तानि सर्वाणि दूषणान्यवलोकनात्॥१०॥

भूतापसारणं कृत्वा भूतशुद्धिं विधाय च।
सम्पूज्यासनमात्मीयं गणेशगुरुदेवताः॥११॥

नत्वा विदध्यात् तदनु प्राणायामत्रयं बुधः।
पत्रिकायास्ततः कुर्यादृष्यादि यतमानसः॥१२॥

The method of worshipping Durgā has been visualized by the sage Nārada ; the mantra used is in gāyatri metre, and the deity invoked is Durgā. The sankalpa for all three days is done only once. Then the customary nyāsa, dhyāna and so on are gone through. The elaborate visualization of the Devī killing Mahishāsura is undertaken. Then the usual sequences of worship follow.

शरत्कालीनदुर्गार्चाविधेरस्य हि नारद।
ऋषिश्छन्दश्च गायत्री श्रीदुर्गा देवता मता॥१॥

बीजं ह्रोमिति निर्दिष्टं शक्तिः श्रीमपि पार्वति।
कीलकं क्लीमिति प्रोक्तं पूजायां विनियोगता॥२॥

अस्मिन्नेव ह्यवसरे सङ्कल्पं केऽपि कुर्वते।
काम्यत्वान्नेतरे चास्य निम्यत्वान्नित्यकृत्यवत्॥३॥

क्रियते यदि सङ्कल्पस्त्र्यहस्याप्येक एव हि।
एकप्रयोगसंहारात् फलैक्याच्च विसर्जनात्॥४॥

पीठे मूर्त्तौ च नित्यं तमृषिं तत्तन्मनोश्चरेत्।
मृत्मर्त्तिपत्रिकापक्षे मन्त्रं सर्षि निशामय॥५॥

आदौ वेदादिमालेख्य द्विवारं दुर्ग ईरयेत्।
सम्बुद्धिरथ रक्षिण्याः शिरसा सह कीर्त्तयेत्॥६॥

Dhyāna :

निस्तप्तस्वर्णवर्णाभां नवतारुण्यशालिनीम्।
पूर्णचन्द्राभवदनां जटामुकुटमण्डिताम्।।१।।

लोलदीर्घासितत्र्यक्षां खण्डेन्द्वाबद्धशेखराम्।
दाडिमीकुसुमाकारदन्तपंक्तिविराजिताम्।।२।।

उत्तुङ्गपीनवक्षोजां वलित्रयविराजिताम्।
अतिक्षामोदरीं देवों नितम्बाभोगभासुराम्।।३।।

त्रिभङ्गस्थानकृतया भज्यन्मध्यामिव स्थिताम्।
बाहुभिर्दशभिर्युक्तां सर्वालङ्करणान्विताम्।।४।।

शूलं कृपाणं चक्रं च बाणं शक्तिं च दक्षिणे।
धारयन्तीमथो वामे पाशचर्माङ्कुशं धनुः।।५।।

कण्ठीरवोपरिन्यास्तदक्षिणाङ्घ्रिसरोरुहाम्।
संमुखस्थितसंछिन्नमहिषासुरमस्तकाम्।।६।।

कण्ठनालोत्थदितिजसकिरीटकचोच्चयाम्।
पाशं वामकरेणैव बिभ्रतीं परमेश्वरीम्।।७।।

शूलेन हृदि निर्भिन्नं पश्यन्तीं दानवं रुषा।
पाशाकारमहानागवेष्टितोदरबाहुकम्।।८।।

भ्रूकुटीभीषणाकारं शोणितार्द्रकलेवरम्।
आकृष्टासिनिगलितकश्रोणिं हरिणा हठात्।।९।।

स्रवद्रुधिरसंदोहवदनेन महात्मना।
स्तूयमानां सुरैः सर्वैर्ब्रह्माजेशमुखादिभिः।।१०।।

लीलया दानवं हत्वा किञ्चित् किञ्चिद्धसन्मुखीम्।
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।।११।।

चण्डा चण्डवती चैव चण्डरूपा च चण्डिका।
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।।१२।।

WORSHIP PROPER

चिन्तयेदीदृशीं दुर्गां धर्मकामार्थमोक्षदाम्।
ध्यात्वेत्थं मानसैरेवोपचारैः परिपूज्य च।।१।।

पूर्वोक्तेनैव विधिना विदध्यादर्घसंस्थितिम्।
नैमित्तिकविधानेन विस्तारो यत्र कीर्त्तितः।।२।।

सत्यां शक्तौ तु पाद्यादीन् पृथक्त्वैव प्रविन्यसेत्।
अर्घश्चोत्तरतः कार्यं पाद्यमाचमनीयकम्।।३।।

स्नानीयं मधुपर्कं च उपचारास्तथा मया।
अस्मिन्नेव क्षणे देवीपञ्चायतनपूजकः।।४।।

गणेशार्कहरीशानां सम्भारैः कल्पितैर्यजेत्।
पीठार्चनं ततः कुर्यात् सामान्यं प्रथमं बुधः॥५॥

सर्वशेषे योगरत्नं शेषमन्त्रोपबृहितम्।
विधाय च पुनर्ध्यानमावाहनमथाचरेत्॥६॥

मुद्राविभक्तिकलितं साधको मीलितेक्षणः।
मूलमन्त्रेणाथ सावयवीकृत्य विभावनैः॥७॥

मन्वक्षरैः षडङ्गानि विन्यसेत् तदुपस्पृशन्।
मूलपीठप्रतिष्ठायां यो मनुः प्रागुदीरितः॥८॥

यन्त्रमुर्त्योस्तु तेनैव प्रतिष्ठां स्थिरयोश्चरेत्।
मृन्मूर्त्तिपत्रिकाकुम्भमाहेयप्रतिमादिषु।
ताँस्ते वदामि सुतनु नन्दिकेश्वरभाषितात्॥९॥

(i) Paurāṇic Invocation of Durgā :

हस्तं दत्वा पत्रिकायां तारादि तत्सदित्यपि।
त्रिरुदीर्य पठेन्मन्त्रानैवैतान् स्थिरपीठयोः॥१॥

आगच्छ मद्गृहे देवि अष्टाभिः शक्तिभिः सह।
पूजां गृहाण विधिवत् सर्वकल्याणकारिणि॥२॥

एह्येहि भगवत्यम्ब शत्रुक्षयजयप्रदे।
भक्तितः पूजयामि त्वां नवदुर्गे सुरार्चिते॥३॥

दुर्गे देवि समागच्छ सान्निध्यं चापि कल्पय।
यज्ञभागं गृहाण त्वमष्टाभिः शक्तिभिः सहः॥४॥

शारदीयामिमां पूजां करोमि त्रिदशार्चिते।
आज्ञापय महादेवि दैत्यदर्पनिषूदनि॥५॥

दुष्पारे घोरसंसारे सागरे पतितं सदा।
त्रायस्व वरदे देवि नमस्ते शङ्करप्रिये॥६॥

ये देवा याश्च देव्यश्च चलितायां चलन्ति हि।
आवाहयामि तान् सर्वाश्चण्डिके परमेश्वरि॥७॥

प्राणान् रक्ष यशो रक्ष रक्ष दारान् सुतं धनम्।
सर्वरक्षाकरी यस्मात् स्वं हि देवि जगत्प्रिये॥८॥

प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत् पूजां करोम्यहम्।
मेनानन्दकरे देवि सर्वसिद्धिं च देहि मे॥९॥

आगच्छ चण्डिके देवि सर्वकल्याणहेतवे।
पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये॥१०॥

आवाहयामि देवि त्वां मृन्मये श्रीफले तथा।
त्रिशूले कलशे खड्गे मण्डले चित्र एव च॥११॥

कैलासशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात्।
आगत्य विल्वशाखायां चण्डिके कुरु
सन्निधिम्॥१२॥

स्थापिताऽसि मया देवि पूज्ये त्वां प्रसीद मे।
चण्डे चण्डात्मिके चण्डि चण्डविग्रहधारिणि॥१३॥

विल्वशाखां समाश्रित्य तिष्ठ देवि गणैः सह।
अथ वा मृन्मये कुम्भे त्रिशूले खड्ग एव च॥१४॥

तथा चित्रपटे वाऽरिनृमण्डे वह्निमण्डले।
सर्वगा त्वं समागत्य सान्निध्यमिह कल्पय॥१५॥

देवि त्वं जगतां मातः सृष्टिसंहारकारिणि।
मण्डलेषु समस्तेषु सान्निध्यमनुकल्पय॥१६॥

चतुर्विंशतिसंख्ये अधिष्ठेयेषु चण्डिके।
आगत्य शारदीं पूजां गृह्य देवि प्रसीद मे॥१७॥

आवाहिताऽसि देवि त्वं निखिले मण्डले तव।
भूत्वाऽत्रैव स्थिरात्म त्वं मद्गेहे कामदा भव॥१८॥

चण्डि त्वं चण्डरूपाऽसि सुरतेजसमुद्भवे।
परिवारैः समागत्य स्थितिमत्र कुरु द्रुतम्॥१९॥

(ii) Prāṇa-pratishṭhā:

अष्टादशैतान् प्रजपेन्मन्त्रान् पौराणिकान् प्रिये।
ततो हंसः शुचीत्येवं प्रतद्विष्णुस्तवेस्यपि॥१॥

तथा विष्णुर्योनिमिति तार्त्तीयकतयोदितम्।
तारव्याहृतिपूर्वा च गायत्री तारपश्चिमा॥२॥

त्र्यम्बकं चेति पञ्चैतान् वैदिकान् प्रजपेन्मनून्।
इमानपि स्थिरे पीठे मूर्त्तौ वा परिकल्पयेत्॥३॥

अतः प्राणप्रतिष्ठां वै कुर्वीत मनुविस्तरैः।
आद्येन नित्यख्यातेन निमित्तोक्तेन तत्परम्॥४॥

आख्यास्यमानतार्त्तीयमनुना तदनन्तरम्।
तच्च शारदपूजायां नेतरस्यां कदाचन॥५॥

पीठमूर्त्योरिपि तथा मण्डले नेतरत्र च।
तारमैधत्रपारावयोगिन्यो डाकिनी तथा॥६॥

फेत्कारीकूर्चवनिता बीजानीमानि वै नव।
एह्येहि भगवत्येवं ततो ब्रूयात् पदत्रयम्॥७॥

त्रयस्त्रिंशत्कोटिपदात् तथा त्रिदशशब्दतः।
तेजःकल्पितशब्दाच्च शरीरे परिकल्पयेत्॥८॥

पदात् तथा च महिषासुरतो मर्दिनीत्यपि।
ततो जगत्रयेत्युक्त्वा पालिनि प्रतिकीर्त्तयेत्॥९॥

कामप्रसादपाशाश्च नृसिंहकमले ततः।
आगच्छ द्वितयं चापि सान्निध्यं कल्पय द्वयम्॥१०॥

पूजालयं प्रविश्योक्त्वा तिष्ठयुग्ममतः परम्।
ततो विसन्ध्यष्टशक्तिपदात् परिवृते वदेत्॥११॥

ज्वलयुग्मं प्रज्वलयुगं स्फुर प्रस्फुर चेदृशम्।
अङ्कुशप्रेतभैरव्योऽमाहारप्रलयास्ततः॥१२॥

विद्युन्महाक्रोधताराः शिरः शेषे ततः परम्।
शतमष्टादशोपेतं वर्णानामत्र वै मनौ॥१३॥

मन्त्रत्रयेणामुनैव कुर्यात् प्राणप्रतिष्ठितम्।
मृन्मूर्त्तिपत्रिकाकुम्भादिषु सर्वान्तिमं मनुम्॥१४॥

(iii) Invocation :

श्रौति पठेन्मनोजूतिरिति कौलेतरो नरः।
नैमित्तिकोक्तेन तथा कुर्यादावाहनं ततः॥१॥

मन्त्रेण त्रिरुदीर्णेन न पत्र्यां पीठ एव हि।
अथ कौलादयः कुर्युरस्मिन्नवसरे प्रिये॥२॥

नैमित्तिकेन विधिना पात्रस्थापनमुत्तमम्।
न्यासौघान् पुरतः कृत्वा नैमित्तिकविधीरितान्॥३॥

शक्तौ तु पञ्चकान् सर्वान् षोढात्रितयमेव हि।
माहेयपत्र्योर्नैतां वै प्रकुर्वीत कदाचन॥४॥

(iv) worship in the Paurāṇika manner :

सा कल्पना च ते मन्त्राः स क्रमः संस्थितिश्च सा।
ते न्यासाः शोधनं तच्च वस्तु वा तर्पणं च तत्॥१॥

शरदर्चापीठमूर्त्त्योर्नैमित्तिकसमर्हणात्।
कस्यापि मत ईशानि नैवाणुरपि भिध्यते॥२॥

विशिष्यातो मया तन्त्रपौराणिकविधिद्वयम्।
उच्यते स मनुः प्रायो बुद्धिमद्बुद्धिगोचरः॥३॥

पत्रिकादिषु पौराणं तान्त्रिकं पीठ एव हि।
वस्त्वर्पणस्य प्रत्येकं ये मन्त्राः पूर्वमीरिताः॥४॥

नैमित्तिकार्चनविधौ ग्राह्यास्तेऽत्रापि पार्वति।
प्रत्येकं मनवो ये वै पत्रिकादिषु संस्थिताः॥५॥

तानिदानीं प्रवक्ष्यामि तत्तद्वस्त्वर्पणाविधौ।
यथा तत्तन्मनूच्चारादनुमूलमनूदितान्॥६॥

कथ्यते वस्तुदानाय तथाऽत्रापि सुरेश्वरि।
पौराणिकमनुं प्रोच्य तदन्ते परिकीर्त्तयेत्॥७॥

द्वात्रिंशद्वर्णकं मन्त्रमथ वा भैरवोदितम्।
कात्यायनोपासितं जयदुर्गादशाक्षरम्॥८॥

ताभ्यां पौराणिकार्चायां वस्तुदानसमुद्धृतेः।
द्वयोरशक्तावेकं वा आवश्यकतयेरयेत्॥९॥

वक्ष्ये तयोरुद्धृतिं तदाद्यं नन्दीश्वरार्चितम्।
तारत्रपाभ्यां ङेन्ता स्ताद्दक्ष्यज्ञविनाशिनी॥१०॥

महाघोराऽपि च तथा योगिनीकोटिशब्दतः।
तद्वत् परिवृता कार्या मायाबीजं ततः परम्॥११॥

पूर्ववद्भद्रकाली च हृन्मन्त्रः सर्वशेषगः।
अथ वा तारतो दुर्गा इति वारद्वयं वदेत्॥१२॥

सम्बुद्ध्यन्तां रक्षणिं च तर्जनीमनुरन्त्यगः।
यद्यपीमौ मनू देवि तान्त्रिकौ समुदीरितौ॥१३॥

तथाऽपि पौराणिकान्ते नियोज्यौ तत्तदर्हणे।
अत सर्वोपचारीयान् वक्ष्ये पौराणिकान्मनून्॥१४॥

पूर्वमेवोदिताः सन्ति निमित्तार्चासु तान्त्रिकाः।
त एवात्र नियोक्तव्याः प्रत्येकं तत्तदर्पणे॥१५॥

पत्रिकादिषु पौराणाः पीठमूर्त्त्यास्तु तान्त्रिकाः।
आसनं पाद्यमर्घ्यं च ततोऽन्वाचमनीयकम्॥१६॥

मधुपर्कं स्नानजलं वस्त्रं भूषणचन्दने।
पुष्पं धूपं च दीपं च नेत्राञ्जनमतः परम्॥१७॥

अलक्तं चापि नैवेद्यं प्रदक्षिणनमस्कृती।
उपचारा इमे प्रोक्ता देवीतुष्टिविधायकाः॥१८॥

यद्यद्दै दीयते द्रव्यमलङ्कारादिकाञ्चनम्।
तेषां दैवतमुच्चार्य कृत्वा च प्रोक्षणार्चने॥१९॥

उत्सृज्य तत्तन्मन्त्रेण तत्तन्नाम्ना निवेदयेत्।
सर्वशुद्धिं तु पौराणक्रमेण धरयाऽऽचरेत्।।२०।।

(v) Āsana :

इदं त आसनं दत्तं मया सुरवरार्चिते।
भवैतस्मिन्निषण्णा त्वं यावत् पूजां
करोम्यहम्।।२१।।

(vi) Pādya :

दूर्वापराजितापद्मश्यामाकसहितं जलम्।
पाद्याय कल्पते देवि विशेषार्चासु नान्यथा।।२२।।

पाद्यं गृह्ण मय दत्तं सर्वदुःखापहारकम्।
त्रायस्व वरदे देवि घोरादस्माद्भवार्णवात्।।२३।।

(vii) Madhuparka :

स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम्।
तच्च स्वधापदैर्दद्यान्मधुपर्कं तथा प्रिये।।२४।।

Arghya :

अर्घं स्वाहापदेनैव सर्वमन्यन्नमः पदैः।
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपान्।।२५।।

विल्वपत्रक्षीरदूर्वासहितं सलिलं शुचि।
शङ्खपात्रगतं कृत्वा कालिकायै निवेदयेत्।।२६।।

दूर्वाक्षतसमायुक्तं विल्वपत्रसमन्वितम्।
शोभनं शङ्खपात्रस्थं गृहाणार्घं हरप्रिये।।२७।।

नानातीर्थोद्भवे वारि सर्ववस्तूपकल्पितम्।
गृहाणार्घमिमं देवि जगद्धात्रि नमोऽस्तु ते।।२८।।

(viii) Āchamanīya :

चन्द्रजातीलवङ्गैलाकल्लोलसहितं जलम्।
विशेषाचमनीयं वै दद्याद्देव्यै फलच्छया।।२९।।

आमोदवस्तुसुरभीकृतमेतदनुत्तमम्।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम्।।३०।।

इमा आपो मया भक्त्या तव पादतलेऽर्पिताः।
आचामय महादेवि प्रीता शान्तिं प्रयच्छ मे।।३१।।

(ix) Madhuparka in place of Surā :

सुराभावे घृतदधि मधु कांस्ये निवेदयेत्।
मधुपर्कं तदुद्दिष्टं प्रार्थनीयं दिवौकसाम्।।३२।।



मधुपर्कं महेशानि ब्रह्मणा परिकल्पितम्।
मया निवेदितं तुभ्यं गृहाण जगदीश्वरी॥३३॥

(x) Punar-achamaniya :

मधुपर्कप्रदानान्ते पुनराचमनीयकम्।
दातव्यं प्राशतान्तेऽस्य यत उच्छिष्टता भवेत्॥३४॥

(xi) Snāna :

वारीदं हि ममामोदि प्रसन्नं मेध्यमेव च।
मया निवेदितं भक्त्या स्नाह्यनेन सुरेश्वरि॥३५॥

(xii) Vastra :

नानावर्णसमायुक्तपट्टसूत्रादिनिर्मितम्।
वासः शुक्लं तथा रक्तं गृहाण त्रिदशेश्वरि॥३६॥

देहशोभाकरं पूतं रञ्जितं नागवस्तुभिः।
परिधत्स्व जगद्धात्रि वासो भक्त्या निवेदितम्॥३७॥

वाससः परिधानान्ते पुनराचमनीयकम्।
दातव्यं भक्तिभावेन स्मृत्युक्तत्वान्मनुष्यवत्॥३८॥

(xiii) Alankāra :

दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः।
अलङ्कारास्तवाङ्गानि शोभयन्तु सुरेश्वरि॥३९॥

(xiv) Anulepana :

अनुलेपनमेतत् ते महासुरभि शीतलम्।
मया निवेदितं देवि गृहीत्वा लेपयाङ्गकम्॥४०॥

(xv) Pushpa :

इदं कुसुमामामोदि ग्रामारण्यसमुद्भवम्।
प्राणसन्तर्पणं हृद्यं मयां दत्तं प्रगृह्यताम्॥४१॥

(xvi) Dhūpa :

कर्पूरागुरुसंमिश्रो वनस्पतिरसोद्भवः।
मया निवेदितो धूपो देवदेवि प्रगृह्यताम्॥४२॥

(xvii) Dipa

अग्निज्योती रविज्योतिश्चन्द्रज्योतिस्तथैव च।
ज्योतिषामुत्तमज्योतिर्दीपोऽयं प्रतिगृह्यताम्॥४३॥

त्वं चन्द्रसूर्यज्यातींषि विद्युदग्न्योस्तथैव च।
त्वमेव जगतां ज्योतिर्दीपोऽयं प्रतिगृह्यताम्।।४४।।

(xviii) Ābharaṇa

स्निग्धमुष्णं हृद्यतमं दृशां शोभाकरं तव।
गृहीत्वा कज्जलं सद्यो नेत्राण्यञ्जय पार्वति।।४५।।

त्वत्पादाम्भोजनखरद्युतिकारि मनोरमम्।
अलक्तकमिदं देवि मया दत्तं प्रगृह्यताम्।।४६।।

(ix) Naivedya :

नानाविधानि रम्याणि स्वादूनि रसवन्ति च।
मया दत्तानि गृह्यन्तां नैवेद्यानि सुरार्चिते।।४७।।

फलफूलानि सर्वाणि ग्रामकाननजानि च।
नानाकारसुगन्धीनि गृहाण परमेश्वरि।।४८।।

चतुर्विधमिदं भोज्यं देवि षड्भी रसैर्युतम्।
सदा तृप्तिकरं रम्यमिदमन्नं प्रगृह्यताम्।।४९।।

गव्यसर्पिःपयोयुक्तं नानामधुरमिश्रितम्।
निवेदितं देवि मया परमान्नं प्रगृह्यताम्।।५०।।

अमृतै रचितं दिव्यं घृतखण्डविनिर्मितम्।
पिष्टकं विविधं स्वादु गृहाण हरवल्लभे।।५१।।

मोदकं स्वादु रुचिरं कर्पूरादिभिरन्वितम्।
मिश्रं नानाविधैर्द्रव्यैः प्रतिगृह्याशु भुज्यताम्।।५२।।

(xx) Nārikelodaka :

ताम्रपात्रे स्थितं सीधुं पयो गव्यमथात्र वा।
नारिकेलोदकं कांस्ये गृहाण शङ्करप्रिये।।५३।।

(xxi) Pānīya :

पानीयं शीतलं स्वच्छं प्रसन्नं घनसारयुक्।
भोजने तृप्तिकृद्देवि कृपया प्रितगृह्यताम्।।५४।।

(xxii) Punar-āchamana :

भोजनान्ते प्रदातव्यं पुनराचमनीयकम्।
पूर्वोक्तेनैव मन्त्रेण सर्वत्रैव शुचिस्मिते।।५५।।

(xxiii) Tāmbūla :

फलपत्रकसंयुक्तं कर्पूरादिसुवासितम्।
मुखकान्तिकरं हृद्यं ताम्बूलं प्रतिगृह्यताम्।।५६।।

(xxiv) Durvā-dāna :

दूर्वाङ्कुरं ततो देव्यै दद्यात् साधकसत्तमः।
नमस्ते सर्वगे देवि नमस्ते भुक्तिमुक्तिदे॥५७॥

(xxv) Bilva-patra-nivedana :

दूर्वां गृहाण देवि त्वं मां निस्तारय सङ्कटात्।
विल्वपत्रं ततो देव्यै पृथक्त्वेन निवेदयेत्॥५८॥

(xxvi) Pavitra :

अमृतोद्भवं श्रीयुक्तं महादेवप्रियं सदा।
पवित्रं ते प्रयच्छामि पत्रं मालूरशाखिनः॥५९॥

(xxvii) Stana-bandha :

नानापुष्पेण रचितां स्तनबद्धां सुगन्धिनीम्।
प्रभ्रष्टां लम्बनां चापि तव देवि निवेदये॥६०॥

(xviii) Sindūra

सर्वशेषे प्रदातव्यं सिन्दूरं पत्रिकार्चने।
अनुलेपनकाले तु पीठमूर्त्योर्भिदेयति॥६१॥

अलिकादिकशोभायाः कारकं रागसम्भवम्।
अतिरागि समुत्पिञ्चसिन्दूरं प्रतिगृह्यताम्॥६२॥

(xix) Chāmara :

चमरीपुच्छजं श्वेतं हेमदण्डि सुलोम च।
मयाऽर्पितं राजचिह्नं चामरे प्रतिगृह्यताम्॥६३॥

(xxx) Vyajana :

बर्हिबर्हकृताकारं मध्यदण्डसमन्वितम्।
गृह्यतां व्यजनं देवि देहस्वेदापनुत्तये॥६४॥

(xxxi) Ghaṇṭā :

येन भीषयसे दैत्यान् येन पूरयसेऽम्बरम्।
तां घण्टां ते प्रयच्छामि महिषघ्नि प्रगृह्यताम्॥६५॥

(xxxii) Ārātrika :

दीपैरनेकैर्विहितमारात्रिकमिदं शुभम्।
निवेदयामि ते देवि संहाराज्ञानजं तमः॥६६॥

(xxxiii) Pushpāñjali :

सर्वशेषे प्रदातव्यं पुष्पाणामञ्जलित्रयम्।
तन्मनुस्तु वरारोहे दुर्गागायत्र्युदीरिता॥६७॥

उँ चण्डिकायै विद्महे भगवत्यै धीमहि तन्नो गौरी प्रचोदयात्।

(xxxiv) Phala-stuti :

अनेन विधिना यस्तु मन्त्रैरेभिश्च पार्वति।
महिषघ्नीं महामायां पत्रिकासु प्रपूजयेत्॥६८॥

अश्वमेधफलं प्राप्य स गच्छेच्चण्डिकालयम्।
इहापि च भवेत् सद्यः कल्याणानां
सभाजनम्॥६९॥

Prārthanā :

तथैव मन्त्रमेकैकं क्रमेण प्रब्रुवेऽधुना।
ब्रह्माणि स्वं ससागच्छ सान्निध्यामिह कल्पय॥७०॥

रम्भारूपेण सर्वत्र शान्तिं कुरु नमोऽस्तु ते।
महिषासुरयुद्धेषु कच्वीभूताऽसि कालिकं॥७१॥

मनुष्यानुग्रहार्थाय लोकमेनमुपागता।
हरिद्रे वरदे देवि दुर्गारूपाऽसि शोभने॥७२॥

मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे।
निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः पुरा॥७३॥

जयन्ती पूजिताऽसि त्वमस्माकं वरदा भव।
महादेवप्रियकरो वासुदेवप्रियः सदा॥७४॥

सदा कालीप्रीतिकरो विल्ववृक्ष नमोऽस्तु ते।
दाडिमि त्वं पुरा युद्धे रक्तबीजस्य संमुखे।
चामुण्डाप्रीतिमकरोत् तस्मात् त्वां
पूजयाम्यहम्॥७५॥

हरप्रीतिकरो वृक्षो ह्यशोकः सदा कुरु।
यस्य पत्रे वसेद्देवी मानवृक्ष शचीप्रिय॥७६॥

मैवानुग्रहार्थाय पूजां गृह्ण सुरेश्वरि।
जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा॥७७॥

उमाप्रीतिकरं धान्यं तस्मात् त्वं रक्ष मां सदा।
पत्रिके नवदुर्गे संगृह्य रक्ष मां त्रिदशेश्वरि।
प्रत्येकमित्थं संपूज्य मन्त्रैरेतैरुदीरितैः॥७८॥

नामाभ्यामपि ङन्ताभ्यामुक्ताभ्यां पूर्वमेव ते।
सामान्यपीठन्यासोक्तनामभिर्ङेन्तबृंहितैः॥७९॥

दिक्पालानपि नित्योक्तवाहनायुधसंयुतान्।
वस्तुभिः पीठमूर्त्योस्तु नित्यनैमित्तिकोदितैः॥८०॥

प्रावृत्यार्चनविस्तारैर्यजेत परमेश्वरीम्।
यावती कथिता नित्य इतिकर्त्तव्यता मया॥८१॥

(9) The worship to be performed on the eighth day is substantially the same as on the previous day. The form of the deity on this day is that of Ugra-chaṇḍā and therefore involves some additonal tāntrik rituals. Astra-pūjā, worship of weapons is also a special feature in this day's worship. Likewise, the worship of Simha, the vehicle of the goddess, and Mahisha, the demon whom she killed are also worshipped on this day. Bali is offered this day in greater abundance than on the previous day.

एतावत् सप्तमीकृत्यमथाष्टम्यर्चनं श्रृणु।
सप्तम्युक्तविधानं हि पूर्वमेवानुवर्त्तते॥१॥

अधिकं यत् तदाख्यास्यं सर्वमन्यत् पुरोक्तवत्।
शोधनं द्रव्यजातानामासनोदेस्तथैव च॥२॥

प्राणायामो भूतशुद्धिर्मातृकान्यास एव च।
तथा पीठषडङ्गख्यन्यासौ न्यासान्तराण्यपि॥३॥

विधाय पूर्वोक्तरीत्या च महास्नानं तथैव च।
दर्पणे प्रतिबिम्बं च कारयित्वा पुरोक्तवत्॥४॥

दन्तकाष्ठं निवेद्याथ संकल्पं विरचय्य च।
अर्घसंस्थापनादीनि विधाय च पुरोक्तवत्॥५॥

समाप्यात्मार्चनं चापि घटे गणपतिं यजेत्।
सूर्यादीनपि पञ्चायतनान् संपूज्य यन्त्रन्तः॥६॥

ध्यात्वाऽथ मानसैरेवोपचारैः परिपूज्य च।
उपचारैः षोडशभिर्महामायां समर्चयेत्॥७॥

तैस्तैर्मन्त्रैस्तदनुक्रमतश्चापि पार्वति।
मुद्राप्रदर्शनैस्तैस्तैरुपचारनिवेदनैः॥८॥

पीठमूर्त्त्योस्तान्त्रिकोक्तरीत्या पूजनमाचरेत्।
पत्रिकासु च पौराणक्रमतो जगदीश्वरि॥९॥

कृत्वाऽवरणपूजां हि पीठे द्वाभ्यां समाचरेत्।
नित्यनैमित्तिकोक्ताभ्यां महाष्टम्यर्चनक्रमे॥१०॥

विशेषकञ्चिदाख्यास्ये पत्रिकायाः प्रपूजने।
पूर्वादिवसुकोणेषु दशोपचरणैर्यजेत्॥११॥

देव्याः शक्तीः क्रमेणैवोग्रचण्डाद्या विशेषतः।
मन्त्रमालामयीसंस्थैर्मन्त्रैरासां तु कौलिकः॥१२॥

नन्दिकेशपुराणोक्तैर्मनुभिः पद्यरूपिभिः।
श्रुत्यध्वन्याः पूजयेयुरुग्रचण्डादिकाः प्रिये॥१३॥

मनूँस्तदीयानधुना ब्रवीमि तव सुन्दरि।
तारह्रीकमला आदौ मध्ये ङेन्ताभिधा तथा॥१४॥

अन्ते हृन्मनुरेवं हि परिपाटी प्रकीर्त्तिता।
उग्रचण्डा तु भयदा मध्याह्नर्कसमप्रभा॥१५॥

(a) Prayer to Ugra-chaṇḍā

सा मे सदाऽस्तु वरदा तस्यै नित्यं नमो नमः।
प्रचण्डे पुत्रदं नित्यं प्रचण्डगणसंवृते॥१॥

जगदानन्ददे देवि प्रसन्ना भव सर्वदा।
चण्डोग्रे भूतरूपाऽसि सर्वभूतभयप्रदा॥२॥

सौम्या भूता मयि सदा वरदा भव शोभने।
या सिद्धिरिति नाम्ना तु देवेशेन प्रकाशिता॥३॥

शासि त्वं साऽसि देवेशि नमस्ते चण्डनायिके।
देवि चण्डात्मिके चण्डे चण्डारिविजयप्रदे॥४॥

धर्ममोक्षप्रदाऽसि त्वं नित्यं मे वरदा भव।
या सृष्टिस्थितिसंहारगुणत्रयसमन्विता॥५॥

यस्याः परा न चान्याऽस्ति चण्डवत्यै नमो नमः।
चण्डरूपा महाचण्डा चण्डनायकचण्डिका॥६॥

सर्वसिद्धिप्रदा देवि तस्यै नित्यं नमो नमः।
बालाकारुणनेत्रा या सर्वदा भक्तवत्सला॥७॥

(b) worship of 64 yoginīs in the petals of the eight-petalled lotus (maṇḍala)

चण्डासुरस्य मथनी वरदा साऽस्तु चण्डिका।
ततोऽऽष्टदलपद्मस्य अष्टावृत्या दलेषु च॥१॥

यजेच्चतुःषष्टिमिता योगिनीगणरूपिणीः।
तारत्रयं पुरो दत्वा शेषे नम इदं पदम्॥२॥

ङेन्तं ततो नाम तासां मध्ये कृत्वा नियोजयेत्।
उपचारैः पञ्चभिर्वा पुष्पैर्वा केवलाक्षतैः॥३॥

ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी तथैव च।
कौमारी भैरवी दुर्गा नारसिंही च कालिका॥४॥

चामुण्डा शिवदूती च वाराही कौशिकी तथा।
माहेश्वरी शङ्करी च जयन्ती सर्वमङ्गला॥५॥

करालिनी मुक्तकेशी शिवा शाकम्भरी तथा।
भीमा शान्ता भ्रामरी च रुद्राणी चण्डरूपिणी॥६॥

क्षमा धात्री स्वधा स्वाहा अपर्णा च महोदरी।
घोररूपा महाकाली विद्युज्जिह्वा कपालिनी॥७॥

क्षेमङ्करी महामाया मेघमाला बलाकिनी।
शुष्कोदरी चण्डघण्टा महाप्रेता प्रियङ्करी॥८॥

खरतुण्डी ऋक्षकर्णी बलप्रमथनी तथा।
मनोमथन्यपि तथा सर्वभूतदमन्यपि॥९॥

उमा तारा महानिद्रा विजया च जया तथा।
शैलपुत्री महोल्का च त्रिशूलिन्यञ्जनप्रभा॥१०॥

कूष्माण्डी विश्वसंत्रासा तथा कात्यायनी परा।
कालरात्रिर्महागौरी चतुःषष्टिरिमा मताः॥११॥

पूजयेन्मण्डलस्यान्ते सर्वकामार्थसिद्धये।
पुनश्च कोटियोगिन्यः पूज्या एकाख्याया प्रिये॥१२॥

पद्मपत्राग्रहाग्रेषु पूर्ववन्मन्त्रकल्पनैः।
ततो देवीसन्निधाने सम्यग्दुर्गा फलप्रदा॥१३॥

(c) worship of the seven mātṛkās as forms of Durgā :

ऐशान्यादिक्रमे द्वे द्वे मध्ये वा नव पूजयेत्।
आसामप्युग्रचण्डादिवन्मन्त्रः परिकीर्त्तितः॥१॥

पाद्यादिभिः पूर्ववच्च तत्तन्मन्त्रैः प्रपूजयेत्।
मृत्युञ्जयप्राणसंस्थैरथ पौराणिकैरपि॥२॥

पूर्वपक्षः कौलिकानामुत्तरः श्रुतिशालिनाम्।
तन्मन्त्रानधुना वक्ष्ये सावधाना निशामय॥३॥

चतुर्मुखीं जगद्धात्रीं हंसारूढां वरप्रदाम्।
सृष्टिकर्त्रीं महाभागां ब्रह्माणीं तां नमाम्यहम्।।४।।

वृषारूढां शिवां भद्रां त्रिनेत्रां वरदां शिवाम्।
माहेश्वरीं नमस्यामि जगत्संहारकारिणीम्।।५।।

कौमारीं पीतवसनां मयूरवरवाहिनीम्।
शक्तिहस्तां शोणदेहां नमामि वरदां सदा।।६।।

शङ्खचक्रगदापद्मधारिणीं कृष्णविग्रहाम्।
स्थितिरूपां खगेन्द्रस्थां वैष्णवीं प्रणमाम्यहम्।।७।।

वराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम्।
शुभदां नीलवसनां वाराहीं तां नमाम्यहम्।।८।।

नृसिंहरूपिणीं भीमां दैत्यदानवघातिनीम्।
विकरालनखां शुभ्रां नारसिंही नमाम्यहम्।।९।।

इन्द्राणीं गजकुम्भस्थां सहस्रनयनां शुभाम्।
नमामि वरदां देवीं सर्वदेवनमस्कृताम्।।१०।।

चामुण्डां मुण्डमथनीं मुण्डमालोपशोभिताम्।
अट्टाट्टहासमुदितां नमाम्यात्मविभूतये।।११।।

(d) worship of Kātyāyanī-durgā :

कात्यायनीं दशभुजां महिषासुरमर्दिनीम्।
प्रसन्नवदनां देवीं वरदां प्रणमाम्यहम्।।१।।

चण्डिके नवदुर्गे त्वं महादेवप्रिये सदा।
पूजां समस्तां संगृह्य रक्ष मां त्रिदशेश्वरि।।२।।

कात्यायन्याश्च दुर्गाया मन्त्रद्वयमिदं मतम्।
इमे तेनैव मन्त्रेण पूजयेत् सुरवन्दिते।।३।।

(e) Eleven forms of Devī :

पुनः पूर्वाक्तविधिना देवीरेकादशार्चयेत्।
जयन्तीं मङ्गलां कालीं भद्रकालीं कपालिनीम्।।

(f) Worship of Devī's weapons :

दुर्गां क्षमां शिवां धात्रीं स्वधां स्वाहां च पूजयेत्।
ततोऽस्त्रपूजां कुर्वीत सप्तम्यर्चनतोऽधिकाम्।।१।।

प्रणवाद्यैर्नमोऽन्तैश्च मन्त्रैरेव सुरेश्वरि।
आदौ तु दक्षिणे भागे ततो वामे प्रपूजयेत्।।२।।

पाद्यादिभिस्त्रिशूलादीन् केवलैरक्षतैरथ।
सर्वायुधानां प्रथमो निर्मितस्त्वं पिनाकिना॥३॥

शूलसारं समाकृष्य कृत्वा मुष्टिग्रहं शुभम्।

असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः॥४॥

श्रीगर्भो विजयश्चैव धर्मपाल नमोस्तु ते।
चक्र त्वं विष्णुरूपोऽसि विष्णुपाणौ सदा स्थितः॥५॥

देवीहस्तगतश्चासि चक्रराज नमोऽस्तु ते।
सर्वायुधानां श्रेष्ठस्त्वं दैत्यसेनानिषूदन॥६॥

भयेभ्यः सर्वदा रक्ष तीक्ष्णबाण नमोऽस्तु ते।
सर्वायुधानां श्रेष्ठस्त्वं दैत्यसेनानिषूदन॥७॥

भयेभ्यः सर्वदा रक्ष तीक्ष्णबाण नमोऽस्तु ते।
शक्ते त्वं सर्वदेवानां गुहस्य च विशेषतः॥८॥

शक्तिरूपेण सर्वत्र रक्षां कुरु नमोऽस्तु ते।
रक्षारूपेण खेट त्वमरिसंहारकारकः॥९॥

सदा देवीकरगत मां रक्ष बहुसङ्कटात्।
सर्वायुधमहामात्र सर्वासुरनिषूदन॥१०॥

चाप मां सर्वतो रक्ष साकं सायकसत्तमैः।
पाशा त्वं नागरूपोऽसि विषपूर्णो विषोदरः॥११॥

शत्रूणां दुःसहो नित्यं नागपाशा नमोऽस्तु ते।
अङ्कुशोऽसि नमस्तुभ्यं गजानां त्वं नियामकः॥१२॥

देवानामपि रक्षार्थं पार्वत्याऽसि धृतः करे।
यस्या निनादमाकर्ण्य शकृन्मूत्रे प्रसुस्रुवः॥१३॥

दैत्यसङ्घाः पाहि सा त्वं घण्टे नानाविधाद्भयात्।
पारशो त्वमतितीक्ष्णोऽसि सवेवैरिविमर्दन॥१४॥

देवीहस्तगतश्चासि सदा तुभ्यं नमो नमः।
यानि यानीह मुख्यानि प्रसिद्धान्यायुधानि च॥१५॥

क्षयकारीणि शत्रूणां विख्यातानि जगत्त्रये।
यानि यान्यम्बिका धत्ते करेषु स्वेषु सर्वदा॥१६॥

भृशुण्डीपाशपरिघभिन्दिपालास्तु लागुडाः।
मुष्टितोमरकुन्ताश्च पट्टिशो मुशलस्तथा॥१७॥



गदाशतघ्नीकुणपच्छरिकाकर्त्तरीमुखाः।
सर्वां स्तान् पूजयाम्यद्य महाष्टम्यां विशेषतः॥१८॥

सर्वे रक्षन्तु मां नित्यं सर्वसिद्धिं ददत्वपि।
तारात् कूर्चाच्च दुर्गायै सर्वायुधपदान्यपि॥१९॥

(g) Worship of Devi's ornaments :

धारिण्यै नम उच्चार्य दद्यात् पुष्पाञ्जलित्रयम्।
ततो देव्याः किरीटादीनलङ्कारान् प्रपूजयेत्॥

(h) Worship of Devi's throne (viz. lion)

ताराद्येन नमोऽन्तेन नाम्ना ङेन्तेन तस्य च।
ततः प्रपूजयेद्देव्याः सिंहासनमनुत्तमम्॥१॥

ताराद्वज्रनखदंष्ट्रायुधाय परिकीर्त्त्य हि।
महासिंहाय हुँ हृच्च सिंहमेतेन पूजयेत्॥२॥

यथोपकल्पितैरेवोपचारैः कुसुमाक्षतैः।
तदन्तं मनुनैतेन देव्याः सिंहासनं यजेत्॥३॥

आसनं चासि देव्यास्त्वं घोरदंष्ट्रोत्कटान्वितः।
हिमाद्रिशिखराकारसिंहराज नमोऽस्तु ते॥४॥

(i) Worship of Mahisha :

देव्या दत्तवरत्वेन विशेषान्महिषासुरम्।
अष्टम्यां च नवम्यां च पूजयेद्बहुविस्तरैः॥१॥

यावच्छक्योपचारैस्तु पाद्यादिभिरनेकधा।
नमोऽन्तः प्रणवादिश्च ङेन्तोऽन्तर्महिषासुरः॥२॥

एतेन मनुना सर्वोपचारानस्य चार्पयेत्।
न सामान्यासुरधिया साक्षाद्रुद्रदियैव हि॥३॥

पूजान्ते कीर्त्तयेन्मन्त्रानमून् बद्धाञ्जलिः प्रिये।
रुद्रोऽस्यसुरराज त्वं देवानां दर्पनाशकः॥४॥

वितुर्वरप्रार्थनया महिषीगर्भसम्भवः।
कात्यायन्या समं योद्धुं सामर्थ्यं कस्य विद्यते॥५॥

केनासुरेण विधृतः समरे मधुसूदनः।
केनान्येन विजित्याजौ त्रिदशाः सेवकीकृताः॥६॥

मन्वन्तरत्रयं केन भुक्तं राज्यमकष्टकम्।
बभूव कस्य वा सेना परार्धशतसंमिता॥७॥

रुद्ररूपधरायातो महिषासुर ते नमः।
ततः संपूजयेद्देवि चतुरो वदुकानपि॥८॥

(j) Worship of the four vaṭukas

सिद्धपुत्रं ज्ञानपुत्रं तथा सहजपुत्रकम्।
शेषे समयपुत्रं च मन्त्रमेषां निशामय॥१॥

वेदादिकमलाबीजे पुरतोऽन्ते नमोऽपि च।
तत्तन्नाम्ना सह तथा वटुको विग्रहीकृतः॥२॥

सङेन्त इति मन्त्राः स्युरेतेषां जगदीश्वरि।
समस्तैरुपचारैस्तु यथाविभवकल्पितैः॥३॥

(k) Worship of the eight Kshetra-pālas

पूजयेद्वटुकानेताञ्छृण्वन्यावृत्तिपूजनम्।
पूजयेत् क्षेत्रपालाँश्च मध्ये किञ्जल्कपक्षयोः॥१॥

हेतुकं त्रिपुरघ्नं च अग्निजिह्वं तथैव च।
अग्निवेतालसंज्ञं च कालं चाथ करालकम्॥२॥

एकपादं भीमनाथमुत्तरादिक्रमेण तु।
अधुना मन्त्रमेतेषां ब्रवीमि श्रृणु पार्वति॥३॥

तारकूर्चक्षेत्रपालबीजत्रयमिदं पुरः।
एतन्नाम्ना सह पुनः क्षेत्रपालः सविग्रहः॥४॥

ङेन्तो महाभीषणश्च तद्वदेव प्रकीर्त्तितः।
क्रोधो हृच्छिरसी चापि मन्त्र एषां वरानने॥५॥

Worship of the nine Bhairavas in the four directions of the maṇḍala

मण्डलस्य चतुर्दिक्षु द्वौ द्वौ मध्ये च पूजयेत्।
भैरवान् नव देवेशि शरदर्चनकर्मणि॥१॥

असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च।
आनन्दश्च कपाली च भीषणस्तदनन्तरम्॥२॥

संहारी सर्वशेषे स्यात् कीर्त्तिता नव भैरवाः।
तारत्रपारोषबीजं तत्तन्नाम ततः परम्॥३॥

Worship of the ten Dikpālakas :

भैरवान्तं विग्रहे च ङेन्तं हृन्मन्त्रसंयुतम्।
दिक्ष्वष्टसु बहिः पद्माद्दिगीशानष्ट पूजयेत्॥१॥

इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणस्तथा।
वायुः सोमश्च ईशान एतन्नाम्ना परिस्थिताः॥२॥

वज्रं शक्तिश्च दण्डश्च खड्गः पाशोऽङ्कुशस्तथा।
ध्वजशूले अमीषां तु शस्त्राणि कथितानि ते॥३॥

नैर्ऋतो वरुणश्चपि मध्येऽनन्तः प्रकीर्त्तितः।
तदस्त्रं चक्रमुदितं यथेन्द्रेशानमध्यतः॥४॥

ब्रह्मा सपद्म इत्येते दिगीशा दश ईरिताः।
मन्त्ररीती इदानीं त्वं समाकल्पय भामिनि॥५॥

प्रणवं पुरतो दत्वा तत्तन्नाम ततः परम्।
ततः परं तत्तदस्त्रं सशब्दपरिबृँहितम्॥६॥

सवाहनपरीवारं सायुधं तदनन्तरम्।
शब्दाश्चत्वार इत्येते ङेत्येते ङेन्ताः कार्या
नमस्ततः॥७॥

Bali-dāna :

ततो दद्याद्बलिं देव्यै पूर्वोदितविधानतः।
अष्टम्यामधिकं दद्यात् सप्तमीबलिदानतः॥१॥

ततो यथाशक्ति जपं कृत्वा स्तोत्रमुदीरयेत्।
बलिदानविधिः स्तोत्रं चाग्रे वक्ष्यते।
साष्टाङ्गे प्रणमेद्भूमौ देवीं भक्तिपरायणः।
ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धये।
इच्छेत विजयं राज्ये सुभिक्षं चात्मनो नृपः॥

(10) Sandhi-pūjā : The eighth day (ashṭamī) is a day of great festivities. The devotee keeps awake in the night, and worships the goddess when the eighth day passes into the ninth (navamī), viz. at midnight of ashṭamī or a little later. The form of the goddess at this period is Chāmuṇḍā.

पुनः पुनः प्रणम्याशु संस्मरेद्हृदये शिवाम्।
सर्वं कृत्वेति कौरव्य अष्टम्यां जागरं निशि।
नटनाटकघोषैश्च कारयेच्च महोत्सवम्॥१॥

अष्टमीनवमीसन्धौ कुर्वते केचिदर्चनम्।
तत्सन्धिपूजनमिति पुराणादिषु कीर्त्तितम्॥२॥

नवम्यामर्धरात्रे वा तत्परेणापि पूजनम्।
तान्त्रिकाः केचिदिच्छन्ति सिद्धिं तूभयथाऽर्चने॥३॥

चामुण्डारूपधारिण्यास्तत्र देव्यास्तु पूजनम्।
विहितं नान्यरूपिण्याः कृत इत्येष निर्णयः॥४॥

एवं ध्यात्वा च सम्पूज्य विविधोपायनादिभिः।
शक्तौ तु मार्त्तिकिः स्थालीः पूरयोदन्नतेमनैः॥५॥

पक्कान्नैराममांसैश्च रुधिरैर्देयपक्षिणाम्।
ताश्च संपूज्येद्गन्धै रक्तपुष्पाक्षतैरपि॥६॥

उपरिष्टाद्धूपदीपैरखिलैर्मनुभिश्च यः।
वलिं समुत्सृजेत् तेन महतीं श्रियमश्नुते॥७॥

शक्तियामे ततः पश्चात् केचित् कुर्वन्ति कौलिकाः।
तद्विधानं पुरैवोक्तं तेनैवैतां समापयेत्॥८॥

(11) The ninth day marks the culmination of the Navarātri-pūjā. It was on this day that the Devī killed the demon Mahishāsura. The form of the goddess on this day is that of Mantra-Chaṇḍikā or Jagad-ambikā. All the sequences of worship prescribed for the eighth day are repeated on the ninth in greater detail especially the bali-offering. Kumārī-pūja is another detail, specially meant for this day. Durgā-sapta-śati from *Mārkaṇḍeya-purāṇa* is read.

नवम्यां श्रीसमायुक्ता देवैः सर्वैः सुपूजिता।
जघान महिषं दुष्टमवध्यं देवतादिभिः॥१॥

लब्ध्वाऽभिषेकं वरदा शुक्ले चाश्वयुजस्य च।
तस्मात् सा तत्र सम्पूज्या नवम्यां चण्डिका
बुधैः॥२॥

महत्त्वं हि यतः प्राप्ता तत्र देवी सरस्वती।
तदर्थं महती प्रोक्ता नवमीयं सदा बुधैः॥३॥

पूजयित्वा महादेवीं नवम्यां मन्त्रचण्डिकाम्।
महत्त्वं प्राप्तवान् वीर ब्रह्मविष्णुस्तथाऽमराः॥४॥

तस्मादियं महापुण्या नवमी पापनाशिनी।।५।।
उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः।।६।।

पूर्वोत्तरेण ऋक्षेण संयुक्ता विधिवन्नृप।
विशेषतो नृपाद्यैश्च बालैर्वृद्धैः सयौवनैः।।७।।

ततो महानवम्यां च पूजयेज्जगदम्बिकाम्।
अष्टम्यां यावती प्रोक्ता विस्तरेण समर्हणा।।८।।

नवम्यामपि कर्त्तव्या तावत्येव वरानने।
विशेषस्तत्र कर्त्तव्यं प्रभूतवलिदानकम्।।९।।

नैमित्तिकक्रमेणैव पीठमूर्त्यर्चनं चरेत्।
शक्तौ नित्योदितावृत्यर्चनं कुर्वीत साधकः।।१०।।

नान्यां पूजां वरारोहे व्यवस्थेयं शिवोदिता।
पीठमूर्त्तौ पत्रिकामृन्मूर्त्तौ यो भक्तिभावितः।।११।।

कुरुते तस्य विहितं पूजनद्वितयं तदा।
पत्रिकायाः पुरः पूजा पीठमर्त्त्योस्ततः परम्।।१२।।

सर्वाऽपि तान्त्रिकी रीतिः पीठमर्त्त्योरुदीरिता।
पत्रिकादिषु पौराणी रीतिरुक्ता पुरारिणा।।१३।।

असंसृष्टं पृथक्कृत्य द्वयमेतन्मयोदितम्।
ततः परं सुरेशानि पाठयेदथ वा पठेत्।।१४।।

(a) Prescriptions and prohibitions while reciting the text of *Durgā-sapta-śatī*, which is to be done as a ritual and in all seriousness and devotion.

मार्कण्डेयपुराणान्तर्गतां भगवतीस्तुतिम्।
समग्रां वा पठेदाहो वधं शुम्भनिशुम्भयोः।।१५।।

महिषासुरस्याप्यथ वा मधुकैटभयोरपि।
कुर्यादुभयमेवात्र विधिं संकल्पपूर्वकम्।।१६।।

ब्राह्मणान् वरयित्वैव वस्त्रालङ्करणासनैः।
विदध्यात् कामनोल्लेखं पूजां शक्त्या च पुस्तके।।१७।।

शनैः पठेत् पाठकोऽपि वर्णोच्चारणपूर्वकम्।
सुव्यक्तं नातिविश्लिष्टं न शिरश्चालगीतवत्।।१८।।

तनुमान्दोलयन् नापि न हसन् न रुदन् व्रजन्।
नाश्नन्नान्यैरालपँश्च न मध्ये च्छिन्नवत् तथा।।१९।।

आचान्तः कृतशौचश्च पदोरुद्गमनीयवान्।
एतेन विधिनाऽधीते तुष्यते जगदम्बिका॥२०॥

यथोक्तफलदात्री च भवति प्राणवल्लभे।
यथैतत्पाठतो देवी प्रीता स्याद्द्रुतमीश्वरी॥२१॥

न तथा धूपदीपस्रग्बलिनैवेद्यविस्तरैः।
पठनं पाठने वाऽपि तस्मादेतस्य यत्नतः॥२२॥

(b) The fire-ritual (homa) as part of worship :

कार्यं शारदपूजायां कालिकातुष्टिमिच्छता।
देवीशारदपूजायां यथैतनस्य हि नित्यता॥१॥

होमस्यापि तथा ज्ञेया मुख्ये अङ्गे इमे मते।
हस्तमात्रं विधायादौ स्थण्डिलं श्रद्धया मृदा॥२॥

तत्राग्निस्थापनं कृत्वा वैदिकैर्मनुभिः प्रिये।
घृताहुतिं वा जुहुयात् तिलमिश्रामथापि वा॥३॥

(c) The sixteen-lettered mantra :

बिल्वपत्रं यवां पद्मं पायसं वा मधूक्षितम्।
मन्त्रस्तत्र तु विज्ञेया भारती षोडशाक्षरी।
अथवा जयदुर्गाया मन्त्रो यः परिनिष्ठितः॥१॥

सप्तशत्यास्तथा देवी एकैकश्लोक एव वा।
मन्त्रे सहस्रसंख्या स्याच्छक्तावयुतमेव वा॥२॥

उभयत्रापि दातव्याः कर्मान्ते दक्षिणाः शुभः।
इदं कर्मद्वयं देवि मूर्तेः पुरत आचरेत्॥३॥

देवी सप्तशतीपाठं गृह्णति विधिवत् कृतम्।
विधिना वाऽप्यविधिना पुनर्होमं प्रयच्छति॥४॥

तस्माद्यत्नेन कर्त्तव्यो होमः शारदपूजने।
होमः सप्तशतीपाठो बलिर्वादित्रवादनम्॥५॥

चतुष्टयमिदं शस्तं मासीषे कालिकार्चने।
प्रभूतवलिदानं च कार्यं भूत्यनुसारतः॥६॥

Then the details of bali-dāna are given. Bali is of three types : tāntrika (killing living beings as offering to the goddess), smārta (offering pumpkin, coconut, sugar-cane etc to the goddess according

to the prescriptions of Dharma-śāstra, and vaidika (offering cooked rice). The tāntrika offering is called `jīva-bali' and is made in two ways : āgamika (tāntrika proper) and Śrauta (in accordance with ones own customs). The Sāttvika bali avoids the killing or hurting of living creatures. The buffalo is represented by pumpkin, goat by water-gourd, and so on, as detailed below.

महिषत्वेन कूष्माण्डं छागत्वेनैव कर्कटीम्।
वृन्ताकं कुक्कुटत्वेन मेषत्वेन च तुम्बिकाम्॥१॥

रम्भापुष्पं बीजपूरं पिण्डं जीवं कलौ भवेत्।
मानुषत्वेन पनसं मत्स्यत्वेनेक्षुदण्डकम्॥२॥

शूरणं शम्बरत्वेन तथा कोशातकं मृगे।
पायसं तु गजत्वेन मार्जारत्वे कुलित्थकम्॥३॥

पटोलं शूकरत्वेन शर्करावालुकं तथा।
खड्गत्वेन महेशानि मत्स्यत्वे कदलीफलम्॥४॥

मूषत्वे मूलकं चैव सारङ्गत्वे कलिङ्गकम्।
करित्वे नारिकेलं च कल्पयेत् परमेश्वरि॥५॥

(12) As the final detail of worship on the ninth day, Kumārī-puja (worship of young girls as representatives of the goddess is conducted during the pradosha period. The girls selected must be seven, eight or nine years in age. The girl of Brāhmaṇa caste is to be selected for fulfilling all desires; the girl of Kshattriya caste for securing celebrity, the girl of vaiśya caste for procuring wealth, and the girl of the Śūdra caste for being favoured with progeny.

ततः कुमारीयजनं कुर्यात् साधकसत्तमः।
यस्मिन् कृते तु विधिवत् कर्मणः साङ्गता भवेत्॥१॥

अकृते चाङ्गहानिः स्योद्विशेषाच्छरदर्चने॥१॥

(Mahākāla-samhitā)

समाप्य पूजामासायं प्रदोषे पर्युपस्थिते।
कुमारीपूजनं कुर्याद्विधिना पञ्चमं हितम्।।२।।

भक्तभद्राभद्रमुभे तदनक्ति सुरेश्वरि।
स्वयं तद्रूपमास्थाय मूढभावमुपेयुषी।।३।।

दिदृक्षुरायाति शिवा भक्तिपूजनसम्भृतिः।
तस्मात् तत्रादरः कार्यो भक्तिभावं च जानता।।४।।

न तथा तुष्यति शिवा बलिहोमस्तुतीरणैः।
कुमारीपूजनेनात्र यथा सद्यः प्रसीदति।।५।।

कौलानां निशि पूजोक्ता स्मार्त्तानामपराह्णके।
नित्या तु शारद्यर्चायां काम्या नैमित्तिकीतरा।।६।।

Desirable traits in the girls to be selected :

सुस्नातां रक्तपीतादिनानारागोज्ज्वलांशुकाम्।
सर्वालङ्कारचित्राङ्गीमज्ञातानङ्गचेष्टिताम्।।१।।

अजातपुम्मनःसङ्गां सप्ताष्टनववार्षिकीम्।
अनीचजातिं गौराङ्गी पितृमातृमतीमपि।।२।।

अदीर्घकेशीमुद्दीप्तां सुस्मितास्यामलोभनाम्।।३।।

Undesirable traits :

श्यामां दीर्घदलीमोतुनयनां पिङ्गमूर्धजाम्।
तनुमूनगतिं क्रुद्धां कुब्जां खञ्जां च खर्विकाम्।।१।।

भ्रूकेशाल्पत्वसहितां तथा चैव गलद्रणाम्।
जातस्तनरजोऽनङ्गां प्रयत्नेन विवर्जयेत्।।२।।

अधिकाङ्गीं च हीनाङ्गीं रोगिणीं च व्रणाङ्किताम्।
अन्धां काणां केकरां च कुरुपां लोमशां त्यजेत्।।

एतद्भिन्ना कुमारी तु वरणीयऽर्चनक्रमे।

(Meru-tantra)

Names of girls to be worshipped according to their age :

यः कुमारीं यजेन्मन्त्री सर्वपर्वसु सर्वदा।
तेनार्चिता महादेवी सत्यं सत्यं न संशयः।।१।।

सन्ध्यैकवर्षा संप्रोक्ता द्विवर्षा च सरस्वती।
त्रिधामूर्त्तिस्त्रिवर्षा च चतुरब्दा चा कालिका।।२।।

सुभगा पञ्चवर्षेयमुमा षडार्षिकी भवेत्।
मालिनी सप्तवर्षा च अष्टमी कुब्जिका मता।।३।।

नवाब्दा कालसंकर्षा दशबर्षाऽपराजिता।
एकादशाब्दा रुद्राणी द्वादशाब्दा च भैरवी।।४।।

तत्परा स्यान्महालक्ष्मीस्तत्परा कुलनायिका।
क्षेत्रज्ञा तत्परा प्रोक्ता षोडशाब्दा च चण्डिका।।५।।

एवं क्रमेण विज्ञेया विनापुष्पं कुमारिका।

(Skānda)

Number of girls who may be worshipped is one to nine

एकैकां पूजयेत् कन्यामेकवृद्ध्या तथैव च।
द्विगुणं त्रिगुणं वाऽपि प्रत्येक नवकं तु वा।।१।।

नवभिर्भजते भूमिमैश्वर्यं द्वियुणेन तु।
एकवृद्ध्या लभेत् क्षेममेकैकेन श्रियं लभेत्।।२।।

एकवर्षां तु या कन्या पूजार्थे तां विवर्जयेत्।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते।।३।।

उत्तमा सा परिज्ञेया सप्ताष्टनवहायना।
मध्यमा पञ्चवर्षा च षडब्दा दशहायना।।४।।

The manner of worship :

गीतवादित्रनिर्घोषैरानन्दादरपूर्वकम्।
नीत्वा पूजागृहद्वारि कुमारीस्ता अयुग्मिकाः।।१।।

देवोबुद्धिं विधायास्यां साधको विगतत्वरः।
गृहीतमदिरामत्तः कल्पितार्चनसम्भृतिः।।२।।

प्राणायामं विधायादौ ततो भूतापसारणम्।
गुरुं गणपतिं नत्वा वामदक्षिणयोस्ततः।।३।।

मध्ये कुमारीं च तथा मूलदेवीस्वरूपिणीम्।
छोटिकाभिस्तथा तालत्रितयैर्बन्धनं दिशाम्।।४।।

कुमर्या मूलभूतायाः पादौ प्रक्षालयेत् ततः।
तज्जलं मस्तके दद्याद्देवीपादोदप्रज्ञया।
स्वोत्तरीयांशुकेनैव पादाम्बूपनयेत् ततः।।५।।

पुनरक्षतमादाय विघ्नानुत्सारयेत् प्रिये।
उदीर्यमाणमन्त्रेण तालत्रयपुरःसरम्।।६।।

तारपाशकलाकूर्चास्त्राणि प्रथमतो वदेत्।
भूतान्यपसारय च विघ्नान् नाशय चेत्यपि॥७॥

हृच्छीर्षे चरमे दद्यादेकविंशाक्षरो मनुः।
कुमार्या सहिताः सर्वे तया देवीस्वरूपया॥८॥

दर्शनार्थं समायान्ति यावन्तो देवयोनयः।
प्रेता भूताः पिशाचाश्च गन्धर्वा गुह्यका अपि॥९॥

राक्षसा दानवा यक्षा ये चान्ये क्रूरकर्मिणः।
सह प्रविश्य कौमार्या मण्डपं शारदार्चनम्॥१०॥

लुम्पन्ति च कुमार्यर्चां पूजां विध्वंसयन्ति च।
अतो वारद्वयं कार्यं विघ्नस्योत्सारणं प्रिये॥११॥

ततः स्ववामहस्तेन कुमार्या दक्षिणं करम्।
गृहीत्वा दक्षचरणविनिःक्षेपपुरसःरम्॥१२॥

पङ्क्तीभूताः कुमारीस्ताः श्लोकरूपं मनुं पठन्।
पूजागृहान्तः शनकैर्नमन्मौलिः प्रवेशयेत्॥१३॥

समस्तजगतामाद्ये जगदाधाररूपिणि।
कुमारीरूपमास्थाय प्रविशेदं गृहं मम॥१४॥

भवत्याः कीदृशं रूपं जाने मातरहं न हि।
कुमारीरूपमेवेदं पश्यामि नरचक्षुषा॥१५॥

भक्तिं मदीयां विज्ञाय त्वत्पादाम्बुजयोः शिवे।
त्वया प्रकटितं रूपमीदृशं सर्वसिद्धये॥१६॥

दृष्टिः कार्या न मे पापे सञ्चारेणासतः पथः।
दृढायां केवलं भक्तौ दातव्या सुरवदिन्ते॥१७॥

शिवाद्यास्तव रूपं हि कीदृशं नेति जानते।
ज्ञास्यामि को वराकोऽहं पाञ्चभौतिकविग्रहः॥१८॥

इति पञ्च पठन् श्लोकान् स्वपृष्ठेनैव तारयेत्।
अनीक्षमाण एवेशि गीतवाद्यपुरःसरम्॥१९॥

(Yāmala)

स्नापिता गन्धतैलेन नानाभरणभूषिता।
आनीय देवतापार्श्वे स्थापनीया सुधीमता॥२०॥

मुख्यं तत्पूजनं प्रोक्तं मुख्याया एव तन्मनुम्।
तत्पूजयैव ताः सर्वाः पूजिताः स्युर्न संशयः॥२१॥

बलिं दत्वा ततो देवयोनिभ्यः परमेश्वरि।
आरभेत् निरालस्यः मुमारीन्यासमुत्तमम्॥२२॥

नामान्यादौ खलु महाचण्डयोगेश्वरी मता।
ततः सिद्धिकराली च पुनः
सिद्धिविकराल्यपि॥२३॥

महान्ता मार्यथ ज्ञेया वज्रकापालिनी ततः।
मुण्डमालिन्यट्टहासिन्येते द्वे परिकीर्त्तिते॥२४॥

चण्डकापालिनी कालचक्रेश्वर्यप्यनन्तरम्।
गुह्यकाली ततः कात्यायनी कामाख्याया सह॥२५॥

चामुण्डा सिद्धिलक्ष्मीश्च कुब्जिका तदनन्तरम्।
मातङ्गी तदनु ज्ञेया चण्डेश्वर्यथ कीर्त्यते॥२६॥

अङ्गान्यतो वच्मि शिरो मुखं तदनु चक्षुषी।
कर्णौ नासापुटे चापि कपोलौ तत्पुरौ पुनः॥२७॥

अधरोष्टौ दन्तपंक्ती स्कन्धौ हृदयमेव च।
बाहु च जठरं पृष्टमूरुजानू तथैव च।
जङ्घे पादौ च सर्वाङ्गं तावन्त्येव स्थलानि च।
कलादि च कलान्तं ताः पूजयेद्विधिना बुधः।
उपवेश्यासने दिव्ये कुमारीं साधकोत्तमः॥२९॥

वक्ष्यमाणेन विधिना देहेऽस्या न्यासमाचरेत्।
कुमारिका स्यात् प्रथमा द्वितीया नायिका मता॥३०॥

तृतीया भैरवी ख्याता तुर्या वागीश्वरी भवेत्।
पालिका पञ्चमो प्रोक्तो सम्बुद्ध्यन्ताः
कुलादिकाः॥३१॥

न्यस्याः पञ्चाङ्गयोगेन कुमारीणां कलेवरे।
वामावर्त्तक्रमादास्यचतुष्कं पूजयेत् क्रमात्॥३२॥

ततः सिद्धा जया पूर्वा जयाऽन्या कुब्जिका
परा।
कालिका पञ्चमी प्रोक्ता विज्ञेया बोधिता इमाः॥३३॥

पूर्वादिवक्तसंयुक्ता चतुर्थ्यन्ता नमोऽन्तकाः।
तत्तत्स्थानेषु विन्यास्याः स्वधिया क्रमपूर्वकम्॥३४॥

पञ्चप्रणवयोगेन चैतन्यमनुना सह।
न्यासजालं हि पूर्वोक्तं कुर्यात् साधकसत्तमः॥३५॥

ततोऽर्घस्थापनं कुर्यान्नित्यके यदुदाहृतम्।
पूजोपकरणस्यापि शुद्धिरुक्ता पुरोक्तवत्॥३६॥

त तो ध्यानं प्रकुर्वीत कुमार्या वक्ष्यमाणकम्।
सस्मितां दिव्यकन्याभिः क्रीडारसपरायणाम्।

ध्यायेत् कुमारिकां बालां
स्वभक्ताभीष्टसिद्धिदाम्''।।३७।।

उपचाराँस्ततः सर्वान् पाद्यादीन् स्तुतिपश्चिमान्।

(''समर्पयेदिति शेषः''।)

यष्टव्या पूर्वमार्गेण वक्ष्यमाणेन वा पुनः।
स्वनामभिश्चतुर्थ्यन्तैस्त्रितारांद्यैर्नमोऽन्तकैः।।३८।।

देवतापश्चिमे मन्त्री यजेद्देताः सलक्षणाः।
आद्या शुद्धा कालिकाऽन्या तृतीया ललिता
स्मृता।।३९।।

चतुर्थी मालिनी ख्याता पञ्चमी स्याद्वसुन्धरा।
सरस्वती रमा गौरी दुर्गा तु नवमी भवेत्।।४०।।

पञ्चाब्दं नववर्षं च यजेद्बालं विचक्षणः।
पञ्चाब्दो वटुकः प्रोक्तो नववर्षा गणेश्वरः।।४१।।

प्रदद्यादासनं वाचा ह्रिया पाद्यं समर्पयेत्।
रमयाऽर्घं निवेद्याथ स्त्रिया चन्दनमर्पयेत्।।४२।।

कुमार्यै शक्तिबीजेन प्रदद्यात् कुसुमोच्चयम्।
चैतन्यमनुना मन्त्री धूपदीपादीकं न्यसेत्।।४३।।

तारा एते समाख्याता भृगुर्भवसमन्वितः।
विन्दुनादसमाक्रान्तश्चैतन्यमनुरीरितः।।४४।।

भूषणानि दुकूलानि सिन्दुरालक्तकावपि।
कज्जलादर्शविख्याततालवृन्तानि पेटिका।।४५।।

परिकर्माधारचोलमञ्चिकापीठदेलिका।
पाञ्चालिका च मञ्जूषा पादुके कुथपट्टके।।४६।।

चन्द्रातपोपसङ्ख्यान तथोद्वर्त्तनभाजनम्।
शय्योपधानपर्यङ्का समुद्गं च प्रसाधनी।।४७।।

प्रतिग्राहश्च हिन्दोला तथा सीमन्तवर्त्तिका।
गोरोचनामृगमदौ कर्पूरं कुङ्कुमं तथा।।४८।।

एव मादीनि चान्यानि यावच्छक्यानि सुन्दरि।
प्रदातव्यानि वस्तूनि कुमारी तुष्यते यथा।।४९।।

ततो यत् स्थापितं पात्रं कुमार्यै प्रतिपादयेत्।
स्वीकुर्यात् सा च तत्रैव तथा यत्नं समाचरेत्।।५०।।

अगृहीते तु तत्पात्रे महान् दोषोऽभिजायते।
अतो यत्नस्तथा कार्यः स्वीक्रियेत तथा तया।।५१।।

ततो गृहीत्वा कुसुमाक्षतं तस्याः कलेवरे।
पञ्चाशत्सङ्ख्यकाः शक्तीः क्रमतः परिपूजयेत्।।५२।।

ता इदानीं प्रवक्ष्यामि सावधाना निशामय।
आद्या जया च विजया ऋद्धिदा माययाऽन्विता।।५३।।

कला च सिद्धिदा सूक्ष्मा प्रभा स्यात् सुप्रभा ततः।
विद्युता च विशुद्धिश्च नन्दिनी च विशुद्धियुक्।।५४।।

अपराजिता च ललिता लक्ष्मीर्गौरी तथैव च।
अथ मेधा च गायत्री सावित्री च स्वधा पुनः।।५५।।

स्वाहेच्छे च क्रिया विद्या प्रज्ञा दीप्ता च चेतना।
भद्रा ज्येष्ठा तथोमा च शिवा च मुदिता क्षमा।।५६।।

श्रद्धाऽथ विमला कौमुद्यपि वै विशदा ततः।
अशोका ज्ञानदा चैव बलदा राज्यदाऽपि च।।५७।।

मैत्री तदनु रुद्राणी भवानि च मृडान्यपि।
सर्वज्ञा चण्डिका चापि कुमारी सर्वशेषगा।।५८।।

पञ्चाशत्सङ्ख्यका एताः कुमार्याः शक्तयः स्मृताः।
भैरवानष्ट तदनु पूजयेदक्षतादिभिः।।५९।।

भैरवीभ्यस्ततो विघ्नविनायकेभ्य एव च।
वटुकक्षेत्रपालाभ्यां योगिनीभ्यस्तथैव च।।६०।।

भूतेभ्यः प्रेतयक्षेभ्यो डाकिनीभ्यस्तथैव च।
एतत्पूजां प्रकुर्वीत सदूर्वाक्षतचन्दनैः।।६१।।

पुनरष्टौ सर्वशेषे ङेन्ता देवीर्यजेत् प्रिये।
महामाया कालरात्री ततो वै सर्वमङ्गला।।६२।।

पूज्या डमरुका पश्चाद्राजराजेश्वरी तथा।
सम्पत्प्रदा भगवती कुमारी तदनन्तरम्।।६३।।

समाप्येत्थ कुमार्यर्चां तत्पुरो भुवि वारिणा।
बर्त्तुलं मण्डलं कृत्वा तन्मध्ये कुलकामिनीम्।।६४।।

विलिख्य जलकुसुमाक्षतचन्दनानागजैः।
पूजयेन्मण्डलं तच्च शुमदायै नमो वदेत्॥६५॥

स्थालीगतं च तत्सर्वमन्नं तत्र निवेश्य हि।
नानाविधां च सामग्रीं लेह्यचोष्यादिघट्टिताम्॥६६॥

मांसमीनसुरापूर्णां भक्ष्यचर्व्यादिपूरिताम्।
कुमारीदक्षहस्तं च स्थापयित्वाऽन्नमूर्धनि॥६७॥

उत्तानं वक्ष्यमाणेन मनुनाऽन्नं समुत्सृजेत्।
अन्नोत्सर्गमन्त्रस्तु।
ऐँ ह्रीँ श्रीँ स्त्रीँ सौँः सर्वशक्तिस्वरूपायै
सर्वसिद्धिदायै भगवत्यै कुमार्यै
भक्ष्यभोज्यनानाविधान्नकल्पितषड्रसोपेतमिदं
महाभोगनैवेद्यं तुभ्यमहं निवेदयामि गृहाण २
भङ्क्ष्व २ प्रसीद ३ सर्वसिद्धिं मे प्रयछ २
ऐँ ह्रीँ श्रीँ नमः स्वाहा।६८॥

इतरासां कुमारीणां प्रत्येकं पूजनं चरेत्।
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैरन्नसङ्कुलैः॥६९॥

पूजिता शरदर्चायां या कुमार्युक्तलक्षणा।
सर्वपर्वसु सा पूज्या यावत् पुष्पं न दृश्यते॥७०॥

कुमारीपूजिता हन्ति कलुषं पूर्वसञ्चितम्।
कुमारिकां विजानीयात् साक्षात्
प्रकृतिरूपिणीम्॥७१॥

पत्रं पुष्पं फलं तोयं यत्किञ्चिद्वस्तु शोभनम्।
अनन्तफलदं प्रोक्तं कुमार्यै चेत् समर्पयेत्॥७२॥

भोजिता चेत् कुमारी स्याद्भोजितं भुवनत्रयम्।
ब्राह्मणाय सुशीलाय कुमारीं यः समर्पयेत्॥७३॥

पृथिवीदानजं पुण्यं सोऽश्नुते नात्र संशयः।
स सर्वसिद्धिमाप्नोति यः कुमारीं समर्चयेत्॥७४॥

वसन्ति सततं देहे कुमार्या योगिनीगणाः।
अतः पुज्या नमस्या सा लालनीया
तदिच्छया॥७५॥

(13) Pūjā-samāpana

The ritual worship must be finished with a prayer to the goddess.

ततः प्रदक्षिणीकृत्य पतित्वा दण्डवद्भुवि।
भक्तिनाम्नः स्तुतिं जल्पेत् काकुग द्गया गिरा॥१॥

आयुर्देहि यशो देहि भगं भगवति देहि मे।
पुत्रान् देहि धनं देहि कामान् सर्वांश्च देहि
मे॥२॥

प्रचण्डे पुत्रदे नित्यं सुप्रीते सुरनायिके।
कुलोद्योतकरे चोग्रे जयं देहि नमोऽस्तु ते॥३॥

उग्रचण्डे प्रचण्डासि प्रचण्डबलनाशिनि।
नमस्ते सर्वदा देवि विश्वेश्वरि नमोऽस्तु ते॥४॥

दुर्गोत्तारिणि दुर्गे त्वं सर्वाशुभनिषूदनि।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव॥५॥

दुर्गे देवि महाभागे त्राहि मां शरणागतम्।
महिषासृङ्गदोन्मत्ते प्रणतोऽस्मि प्रसीद मे॥६॥

हर पापं हर क्लेशं हर शोकं हराशुभम्।
हर रोगं हर क्षोभं हर मानं हरप्रिये॥७॥

कालि कालि महाकालि कालिके पापहारिणि।
धर्मकामप्रदे देवि नारायणि नमोऽस्तु ते॥८॥

संग्रामे विजयं देहि धनं देहि सदा गृहे।
धर्मकामर्थसम्पत्तीर्देहि देवि नमोऽस्तु ते॥९॥

महिषघ्नि महामाये चामुण्डे मुण्डमालिनि।
आयुरारोग्यविजयं देहि देवि नमोऽस्तु ते॥१०॥

आयुर्ददातु मे काली पुत्रानपि सदाशिवा।
अर्थकामौ महामाया विभवं सर्वमङ्गला॥११॥

शिरो मे चण्डका पातु कण्ठं पातु सुरेश्वरी।
हृदयं पातु चामुण्डा सर्वतः पातु कालिका॥१२॥

ब्रह्माणी चैव कौमारी वाराही वैष्णवी तथा।
माहेश्वरी नारसिंही इन्द्राणी शिवदूत्यपि॥१३॥

महाकाली च चामुण्डा भैरवी कौशिकी तथा।
उग्रचण्डा च प्रचण्डा च चण्डोग्रा
चण्डनायिका॥१४॥

चण्डा चण्डवती चैव अतिचण्डा च चण्डिका।
एताश्चान्याश्च रुद्राणि यास्ते तिष्ठन्ति
शक्तयः॥१५॥

ताभिः सहैव मां रक्षसंग्रामे संकटे तथा।
नानापुराणवाक्येन नानादेवर्षिभाषितैः॥१६॥

सदाशिवाज्ञया चापि त्वमेव शरणं मम।
त्वां विहायेतरां नैव संश्रये देवतां शिवे॥१७॥

अगताऽसि यतो दुर्गे माहेश्वरि ममालयम्।
अर्घ्यं पुष्पं च नैवेद्यं धूपं दीपं बलिं तथा॥१८॥

गृहाण वरदे देवि कल्याणं कुरु सर्वदा।
कृत्वैदं विधिना दण्डप्रणामस्तुतिपूर्वकम्॥१९॥

पूजां समर्पयेद्देव्यै गृहीत्वा पाणिना जलम्।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि॥२०॥

यदर्चितं मया देवि परिपूर्णं तदस्तु मे।
गृहीतुं शारदीं पूजां मर्त्यमण्डलमागताम्॥२१॥

चण्डिके त्वां नमाम्यद्य पूजेयं प्रतिगृह्यताम्।
कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम॥२२॥

अन्तश्चरसि भूतानां ज्ञात्री त्वं स्र्वसाक्षिणी।
एतावत् कृत्यमुदितं शारदीयार्चनक्रमे॥२३॥

प्रातरारभ्य देवेशि रात्रेर्यामत्रयावधि।
शिवाबलिं कुमार्यर्चां प्रभूतं बलिमेव वा॥२४॥

(14) During the worship of Durgā, Revanta, the deity of the horses, is worshipped by chieftains and rulers, to secure the welfare of the horses. This is done from the second day of the Aśvin month till the ninth. Revanta is the son of Chhāyā and Sūrya. After the worship of horses, elephants are worshipped and also the weapons of warfare.

रेवन्तादिपूजाविधिः॥

शान्तये वृद्धयेऽश्वानामात्मनो विजयाय च।
द्वितीयादिनवम्यन्तं रेवन्तं पूजयेन्नृपः॥१॥

(Skānda-purāṇa)

आश्विनस्य सिते पक्षे नवमीं यावदेव हि।
द्वितीयां तिथिमाभ्य पूजयेद्विविधार्हणैः॥२॥

रेवन्तमुच्चैः श्रवसं तुरङ्गानभिरक्षितान्।
वर्धन्ते वाजिनस्तेन सर्वोपद्रववर्जिताः॥३॥

सा भारेणाक्रान्ता क्रुद्धाऽन्यान्यान्निरीक्षते वाहान्।
तेषां तेजः सत्वं बलं च कृत्स्नं निगृह्णाति॥४॥

सञ्जायन्ते रोगा महोपसर्गैः समन्विताः कष्टाः।
तस्मात् स्वात्युपतापे वाजिषु पीडा भवेन्महती॥५॥

एवं च सप्तरात्रं स्वातेः सम्पात एव निर्दिष्टः।
तत्र दिवाकरकिरणैरस्पृष्टा वाजिनो रक्षयाः॥६॥

(*Śālihotra*)

तानश्वान् समलङ्कृत्य वाजिशालं प्रवेश्य च।
प्रतिमायां चित्रपटे स्थण्डिले मण्डलेऽथ वा॥७॥

नानोपचारसम्भारे रेवन्तं देवमर्चयेत्।
नमो देवाधिदेवाय तुरङ्गवलचारिणे॥८॥

सूर्यपुत्राय देवाय तुरङ्गानां हिताय च।
तुरङ्गपरिषद्यस्य नृगजोपरि धावति॥९॥

साश्वमश्वाधिपं रक्ष शरणं त्वां व्रजाम्यहम्।
इति पुष्पाञ्जलिं दत्वा रेवन्ताय बलिं हरेत्॥१०॥

तथा।

सूर्यपुत्र महावाहो छायाहृदयनन्दन।
शान्तिं कुरु तुरङ्गानां रेवन्ताय नमोऽस्तु ते॥११॥

गजपूजामन्त्रस्तु॥

पान्तु वो बसवो रुद्रा आदित्याः समरुद्गणाः।
भत्तरिं रक्ष नागेन्द्र समयः प्रतिपाल्यताम्॥१२॥

अवाप्नुहि जयं युद्धे समये स्वस्ति नो व्रज।
श्रीस्तु सोमाद्बलं कृष्णात् तेजः
सूर्याज्जवोऽनिलात्॥१३॥

स्थैर्यं मेरोर्जयो रुद्राद्यशो देवात् पुरन्दरात्।
युद्धे रक्षन्तु नागास्त्वां दिशश्च दैवतैः॥१४॥

(15) On the tenth day (Daśamī), the ritual of disbanding of the icons and other objects of worship is resorted to. It marks the close of the nine-nights festival, and return to normal and secular duties and responsibilities.

अथ दशमीकृत्यम्।।

ततो दशम्यां निर्वाह्य स्नातो नित्यक्रियां निजाम्।
यावच्छक्त्युपचारैस्तु पूजयेन्न्यासमुज्जहन्।।१।।

कृताञ्जलिः पठेत् पश्चाद्विसर्जनमनूनिमान्।
विधिहीने क्रियाहीनं भक्तिहीनं यदर्चितम्।।२।।

पूर्णं भवतु तत्सर्वं त्वत्प्रसादन्महेश्वरि।
शक्नुवन्ति न ते पूजां कर्तुं ब्रह्मादय सुराः।।३।।

अहं किं वा करिष्यामि मृत्युधर्मा नरोऽल्पधीः।
न जानेऽहं तेऽम्ब रुपं शरीरं न वा गुणान्।।४।।

एकामेव हि जानामि भक्तिं त्वच्चरणाब्जयोः।
तां भक्तिं हृदि सम्भाव्य शारद्यर्चां प्रगृह्य च।।५।।

गच्छ देवि निजस्थानं मह्यं दत्वा वरान् बहून्।
एतान्मन्त्रान् समुच्चार्य चरलग्ने चरांशके।।६।।

प्रतिमां पत्रिकां वाऽपि चालयेत् पूजकः शनैः।
निर्माल्येन ततो देव्याः पूजयेत् कलशोपरि।।७।।

निर्माल्यवासिनीं देवीं ङेन्तां नमः पटेन हि।
प्रदर्श्य योनिमुद्रां च ऐशान्यां दिशि निःक्षिपेत्।।८।।

निर्माल्यं भगवत्यास्तच्चण्डेश्वर्यै नमो वदन्।
मृन्मूर्त्तिं पत्रिकां वाऽपि जलेऽगाधे विनिःक्षिपेत्।।९।।

स्त्रोतस्यथो मज्जयित्वा नदीवेगेन हारयेत्।
पीठमूर्त्तौ स्वके स्थाने चालयित्वा निवेशयेत्।।१०।।

चालने यन्मनुद्वन्द्वं तदिदानीं निशामय।
उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य मे।।११।।

कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि
चण्डिके।।१२।।

यत् पूजितं मया देवि परिपूर्णं तदस्तु ते।
गम्यतामर्थलाभाय क्षेमाय विजयाय च।।१३।।

शत्रोर्दर्पविनाशाय पुनरागमनाय च।
व्रज त्वं स्त्रोतसि जले मद्गेहे तिष्ठ भूतये।।१४।।

आगामिवत्सरे च त्वं पुनारायास्यसि ध्रुवम्।
इति देवीं चालयित्वा मनुना कथयिष्यता।।१५।।

KALPATHARU RESEARCH ACADEMY

BANGALORE

The Kalpatharu Research Academy, established in 1981, was inaugurated by the then Minister for Tourism and Civil Aviation, Government of India. It has strided across the horizon of indological research and publication with giant - steps since then. An institution dedicated to the cause of preservation of ancient heritage in India, it has encouraged research in the fields of Agama, Veda, Tantra, Jyothisha, Mantra-sastra, Vastu, Yoga, Silpa, Ayurveda, etc.

Among its prestigious publications (numbering more than fifty till now), are six Vols of **Pratima-Kosha**, Twelve Vols of **Agama-Kosha**, Three Vols of the **Art and Architecture of Indian Temples**, and several Koshas like **Ganesha-Kosha, Lalitha-Kosha** and **Navagraha-Kosha, Oshadhi-Kosha**, etc.

The Academy has plans of undertaking intensive research in the field of Veda and Vedanga, and intends publishing **Bharatiya-Samskriti-Sarvasva-Kosha,** an encyclopaedic work in several volumes dealing with all aspects of Indian Culture. It seeks to promote education, culture, science, art, and learning in all its branches. The approach will be broad-based and multi-disciplinary.

An extensive, comprehensive and specialist reference library has been built up, to assist the research workers engaged by the Academy, and also other workers in the indological disciplines. A valuable collection of palm-leaf manuscripts relating to Veda, Vedanta, Vedanga and allied subjects has already been made; the collection work is continuing.

The Academy has been running a Guru-Kula type of Institution, on ancient lines to impart Vedic education to selected boys in a rural-set-up since 1988.

The intention of the Academy is to develop as a national centre for higher learning in Veda and Vedanga and facilitate the founding of a unique Sanskrit and Vedic University of national and international stature.

This publication is the **Fifty-Sixth** of its achievement in this field.